संस्कृत-अकाडमी-षष्ठ्यब्दग्रन्थमाला – 8

In Public domain. Digitization Muthulakshmi Research Academy

ब्रह्मश्रीः पेरुमाण्ड्डाचार्यकविना विरचितः

श्रीवेङ्कटेशचम्पूप्रबन्धः

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः
दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः
आचार्यः के नीलकण्ठम्
निदेशकः

सहसम्पादकौ परियोजना-अनुसन्धातारौ च
डा वि सुब्रह्मण्यम्, उपनिदेशकः
डा जोशी सन्तोषकुमारः, शोधसहायकः

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2021

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत-अकाडमी-षष्ठ्यब्दग्रन्थमाला – 8

ब्रह्मश्रीः पेरुमाण्ड्लाचार्यकविना विरचितः

श्रीवेङ्कटेशचम्पूप्रबन्धः

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः
आचार्य के नीलकण्ठम्
निदेशकः

सहसम्पादकौ परियोजना-अनुसन्धातारौ च
डा वि सुब्रह्मण्यम्, उपनिदेशकः
डा जोशी सन्तोषकुमारः, शोधसहायकः

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2021

In Public domain. Digitization Muthulakshmi Research Academy

Śrī Veṅkaṭeśacampūprabandhaḥ
(Re-printing of rare book project)
This Publication is published with the financial support under Ashtadashi Scheme of Central Sanskrit University, New Delhi)

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sansthan
Osmania University Campus,
Hyderabad – 500 007

Phone & Fax:
040 - 27070281

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Data Entry by
Dr. Nagendra

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Śrī Veṅkaṭeśacampūprabandhaḥ
ISBN – 978-93-80171-61-6

© Sanskrit Academy
Year : 2021
Copies : 500
Pages : xl+135
Price : Rs 250
$ 25

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Shashtyabda Granthamala - 8

Śrī Veṅkaṭeśacampūprabandhaḥ

of

Brahmaśrī perumāṇḍlācāryakavi

(Published under 'Re-printing rare books project' of Ashtadashi Scheme of Central Sanskrit University, New Delhi)

Chief Editor

Prof K Neelakantham

Director

Associate Editors and Project Investigators

Dr. V. Subrahmanyam, Deputy Director

Dr. Joshi Santosh Kumar, Research Assistant

Sanskrit Academy

Adarsha Shodha Sansthan

(Recognised by

Central Sanskrit University, New Delhi)

Osmania University Campus, Hyderabad – 500 007

2021

In Public domain. Digitization Muthulakshmi Research Academy

Śrī Veṅkaṭeśacampūprabandhaḥ
(Re-printing of rare book project)

This Publication is published with
the financial support under
Ashtadashi Scheme of Central
Sanskrit University, New Delhi)

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sansthan
Osmania University Campus,
Hyderabad – 500 007

Phone & Fax:
040 - 27070281

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Data Entry by
Dr. Nagendra

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Śrī Veṅkaṭeśacampūprabandhaḥ
ISBN – 978-93-80171-61-6

© Sanskrit Academy

Year	:	2021
Copies	:	500
Pages	:	xl+135
Price	:	Rs 250 $ 25

In Public domain. Digitization Muthulakshmi Research Academy

ओम्

श्री गुरुभ्यो नमः

॥ श्रीशङ्करभगवत्पादाः विजयन्ते ॥

Preface

'A narrative in mixed prose and verse has been called Champu' is the definition given by rhetoricians of Sanskrit. And "this variety of composition enlarges the scope and ease of the poet's expression and entertains the reader by the presentation of combinative of varying melodies" said by Bhojaraja in ChampuRamayana. Many prose passages have been seen in the midst of the verses in the Puranas, but there is not any instance of classical poetry of this recognized class known earlier. The rhetoricians of Sanskrit literature from Bhamaha of 6th century A. D. have given the definition to ChampuKavya. Hence it is thought that Kavyas in the form Champu must have been composed even before the 6th A.D. "But the earliest works of such class are found only after the 10th century A.D. And then on wards Champus became very popular and particularly they were composed largely in South India" said by M. Krishnamachariar, Sri Baladev Upadhyaya and other authors of history of Classical Sanskrit Literature. According to these, 257 ChampuKavyas have been traced out till now and some of them were published from various institutes and especially most of the ChampuKavyas were written by the poets belonged to Telangana, Andhra Pradesh, Tamilnadu, Karnataka and Kerala.

Yashastilakachampu of Somadeva / Somaprabhasuri, *Yuddhakanda* of Bhoja's *ChampuRamayana* composed by Laksmanasuri, *Sreenivasavilasachampu* of Krishnakavi, *Bhadrachalachampu* of Raghavarya, *Raghunathavijayachampu* of Krishnasuri, *Rameshwaravijayachampu* of Brahmatantraparakalaswamy are some of the famous champukavyas belong to Telangana.

In Public domain. Digitization Muthulakshmi Research Academy

We have recently published ***Ramakrishnayudhisthiracharitachampu*** of Sriman Perumalla Venkatarajakavi of Bacchannapet of Telangana state. And now we are very happy to bring out another beautiful *ChampuKavya* authored by scholarly poet of Telanagana State **Sriman Shirisinahal Perumandlacharya** who composed a delightful Kavya ***Sri VenkateshaChampuPrabandha.*** This book was published in Telugu Script in 1978 from Sri Rama MudraNalaya, Nirmal in Adilabad district of Telangana State. It could not gain a place in the history of Champukavya in Sanskrit since it was published from a remote area in those days.

Sriman Shirisinahal Perumandlacharya was born on 29th October 1908 (Keelaka samvatsare Kartika shukla chaturthyam). He was the fourth son of Sriman Shirishinahal Venkatacharya and Smt. Ranganayakamma. He studied Sanskrit shastras from his elder brother Shataavadhaani Krishnamacharyulu who was a versatile scholar of various shastras and great poet. Sriman Perumandlacharya, at the age of 20, started doing Ashtaavadhaanams in Telugu. He worked as a teacher for a few years in government schools and gave up the teaching profession for propagating the Indian tradition and culture through the spiritual speeches like *Puranapravachanam* and tried to teach importance of social responsibilities to the people in the villages around Adilabad area of Telangana. Later at the request of the people who were very much enthusiastic to listen to his spiritual speeches, he shifted his residence to Nirmal, a town near Adilabad. There he had taken up the reconstruction of Temple of Sri Lakshmi-Venkateshwara with the help of business community in Nirmal in 1956. "Once Sri Lakshmi-Venkateshwara appeared in his dream and advised him to compose a Champu Kavya on the story of Lord himself" it is said by Sriman Perumandlacharya in the beginning slokas of this ChampuKavya (स्वप्नेऽवतीर्य भगवान् मम वेङ्कटेशः मामाह्वयत्तदिह तत्करुणेव कर्त्री I-6).

In Public domain. Digitization Muthulakshmi Research Academy

Sriman Perumandlacharya was well versed in the Puranas and Itihasas. He had thorough Knowledge of ***Sri VenkatachalaMahatmyam*** depicted in many Puranas. Especially the three Bhavishyottarapurana, Varahapurana and Skandapurana have a detailed note on lord Venkateshvara and his consort Padmavati. Sriman Perumandlacharya has followed the tradition set by the early writers of Champukavya and his language is simple and beautiful. He has good command over alamkaras and has shown his eminence in characterization. I am sure this ChampuKavya with all its merits will delight the Sahridayas. Sriman Perumandlacharya, at the age of 92, passed away on 08-07-2000 (Vikrama samvatsare Aashadha shukla Saptami)

We had been to Nirmal to have darshan of Sri LakshmiVenkateshwara and met with Sriman Nambuladrachari son of Sriman Perumandlacharya. We also met with Sri Umamaheshwara siddhanti a well-known astrologer in Telangana studied Sanskrit under Sriman Perumandlacharya. Sri Umamaheshwara siddhanti has great regards for his teacher. I offer my sincere thanks to these two for sharing their experiences with the scholarly poet.

I do appreciate the sincere efforts of Dr.V. Subrahmanyam Dy. Director and Dr. Joshi Santhosh Kumar, Research Assistant. These two have been working tirelessly for bringing out many books under the project of reprinting of rare books sanctioned by the Central Sanskrit University, New Delhi. Here Dr.V. Subrahmanyam and Dr. Santhosh have referred all the Puranas in which the story of Lord Venkateshwara and goddess Padmavathi is narrated. I congratulate them and convey my thanks to Dr. K. Varalakshmi, Dy. Director and Mr. Suryaprakash research assistant for their support at every movement.

My sincere pranaams to **President Awardee Mahamahopadhyaya Sriman Samudrala Rangaramanujaacharylu** Director Jeeyar Integrated Vedic

In Public domain. Digitization Muthulakshmi Research Academy

Academy Hyderabad, his guidance and encouragement in research and publications of Sanskrit Academy is noteworthy. He made a thorough study of this book and wrote an excellent foreword to it.

I thank Prof Subba Rayudu Hon'ble V.C. and Prof. Subrahmanya Sharma Registrar Central Sanskrit University, New Delhi for their continuous encouragement and for sanctioning this project to Sanskrit Academy. I thank our chairman Prof. D. Ravinder Hon'ble V. C. and Prof. P. Lakshminarayana Registrar of Osmania University for his amicable support for the development of Sanskrit Academy.

I should not forget to convey my thanks to Karshak Art Printers Hyderabad and Dr. Nagendra for his DTP work.

सुधीजनविधेयः

Prof. K. Neelakantham
Director

In Public domain. Digitization Muthulakshmi Research Academy

Om Namo Narayanaya
'Mahamahopadhyaya' 'Sastra Bhaskara'
'Sastraratnakara'
Hon'ble President Awardee
Dr. S. V. Rangaramanujacharyulu
Q. No. 108, JIVA Campus,
Jeeyar Integrated Vedic Academy Quarters
Email : svrracharyulu@gmail.com
acharyulusvrr@yahoo.in

Srimathe Ramanujayanamah
Mobile : 9441562863, 9676825361
Director
Vedic Research and Publications
Jeeyar Integrated Vedic Academy (JIVA)
Srirama Nagar, Muchintal,
Palmakol (P.O.), Shamshabad (M),
RR District, Telangana - 509325.

श्रीवेङ्कटेशचम्पूप्रबन्धः सर्वस्पृहणीयः

'गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते' इति लक्षणमात्रमेव लक्षणकारैः कृतं, लक्ष्यं तु पौराणमेव। उपनिषदां, पुराणानां भगवदादीनामपि गद्यपद्योभयात्मकतया चम्पूत्वम् असन्दिग्धपरिलक्ष्यमेव।

श्रीमद्वेङ्कटेशवैभवप्रकाशकं सारस्वतं संस्कृते विशेषेण महीयते। श्रीमता शिरिशिनहळ् पेरुमण्ड्लाचार्यकविवरेण विरचितोऽयं चम्पूप्रबन्धः एतादृशप्रबन्धेषु विरलविरलेषु ख्यापनीयो विभाव्यते। वेद-पुराण-प्राचीनतमिलसाहित्य-द्राविडभक्तप्रणीतदिव्यप्रबन्धादिषु बहुविततोऽयं चरितविशेषः पूर्वमेव चम्पूप्रबन्धत्वेन सुप्रथितयशस्केन वेङ्कटाध्वरिनामकेन कविना श्रीनिवासविलासचम्पूनाम्ना प्रग्रथितः, संस्कृतसारस्वतशिरोमणिताम् उपयातः समाद्रियते विद्वद्भिः। अयञ्च श्रीनिवासविलासचम्पूप्रबन्धः राष्ट्रियसंस्कृतविद्यापीठेन 2010 वत्सरे प्रकाश्यमुपनीतः नव्यतया।

वेङ्कटेशचम्पूनाम्नैव काचन अन्या चम्पूः धर्मराजेन 17 शतके प्रणीता आसीदित्यपि अवगम्यते। प्रस्तुतप्रबन्धः श्रीवेङ्कटेशचम्पूरिति श्रीमद्भिः शतावधानिभिः शिरिशिनहळ् कृष्णमाचार्यैः परिष्कृतः 1978 संवत्सरे निर्मलनाम्नि प्रदेशे प्राकश्यमुपागच्छत्।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीमतः पेरुमाण्ड्लाचार्यमहाभागस्य चरितं नातिदुर्ज्ञेयं, यतो हि एते श्रीमतां शतावधानि–कृष्णमाचार्याणां शिष्या एव सन्तः, श्रीमतो वेङ्कटेशस्य आलये अर्चकपदवीङ्कुर्वाणाः भगवत्प्रीतिनैर्भर्येणैव चम्पूप्रबन्धमिमम् आरचयन्निति अवगन्तुं शक्यते।

कथासन्निवेशः

अत्र प्रबन्धस्थः कथासन्निवेशः पुराणप्रथित एव।

अत एवाह कविः प्रबन्धान्ते –

एषा भविष्योत्तरसत्पुराणकथामनुसृत्य कृता मयाद्य।
श्रीवेङ्कटेशाभिधदिव्यचम्पूः समर्पिताऽसीद्धरिपादपद्मे।।

एतेन श्लोकेनैतदवगम्यते, यदत्र चम्पूप्रबन्धे, कथा, भविष्योत्तरपुराणात् स्वीकृता इति। यद्यपि उपलभ्यमानभविष्योत्तरे इयं कथा नोपलभ्यते, तथापि वेङ्कटाचलमाहात्म्यनाम्ना प्रथिते पुराणसङ्कलने तिरुमलक्षेत्रविषये या कथा पद्मावतीश्रीनिवासयोः सम्बन्धितया उपलभ्यते, सैव प्रस्तुतचम्पूप्रबन्धस्य आकरभूता इति अकामेनापि अभ्युपगन्तव्यमेव। वेङ्कटाचलमाहात्म्यान्तर्गततया प्रकाशिते भविष्योत्तरे तावत्, भृगुकृतत्रिमूर्तिगुणवैषम्यपरीक्षणपूर्वकतया प्रवृत्ते, श्रीनिवासावतारकथाकथनपुरस्सरं पद्मावती श्रीनिवासपरिणयवृत्तान्ते, या कथा सैवात्र प्रबन्धे सन्दृब्धा इति मन्तव्यम्।

अत्र प्रबन्धे तावत्, स्तबकदशकं कविना परिक्लुप्तं, यत्र किल क्रमेण प्रथमस्तबके वेङ्कटाद्रेः सर्वतो मुखं प्राभवमुपवर्णयत् कविः। अत्र भृगुवृत्तान्तो विशेषेण निरूपितः। अत्र नारदसमागमनं, तत्कृताध्वरविचिन्तनं, ऋषिभिः भृगुप्राप्तिः, तत्प्रार्थनम्, ऋषिप्रार्थनेन भृगुकृतत्रिमीर्तिगुणतारतम्यपरीक्षणं, विष्णोः सात्त्विकत्वनिश्चयः, विष्णुकृतं भृगुपादगताक्षिविमर्दनम्,

In Public domain. Digitization Muthulakshmi Research Academy

तदीयाहङ्कारभङ्गः, लक्ष्म्या वैकुण्ठत्यागः, हरेः तदनुसारेण भुवि शेषाद्रिं प्रत्यागमनं, शेषाद्रिवैभवप्रकाशनम्, इत्यादिकथा उपवर्णिता दृश्यते। मूलपुराणे इयं कथा जनकशतानन्दसंवादारूपेणावगम्यते।

इयमेव कथा, भविष्योत्तरपुराणे आद्यध्यायेषु सन्दृब्धाऽमहीयत। द्वितीयस्तबके पुनः भविष्योत्तरात् प्रायशः षडध्यायवर्णिता कथा परिक्लृप्ता। अत्र भगवतः वल्मीकप्रवेशे सति, तस्मै क्षीरदानाय ब्रह्मणा धेनुत्वग्रहणं, रुद्रस्य वत्सताप्राप्तिः, रमया गोपीत्वं स्वीकृत्य अनुगतधेन्वा तत्प्रान्तपालकप्रभवे धेनुं विक्रीय स्वधामगमनम्, धेन्वा वल्मीकस्थाय श्रीनिवासाय क्षीरदानं, प्रभुणा एतत् परीक्षणं, तद्रक्षकगोपदण्डनं, कुपितेन हरिणा प्रभवे शापप्रदानम्, इत्यादिवितता गाथा पुराणगतैव द्वितीयस्तबके समुपवर्णिता कविना। अत्रैव राज्ञः पूर्वजन्मवृत्तान्तादिकं यथापुराणं वर्णितम्। अत्र चम्पूकर्तुः पुराणकथानुसरणं विशेषेणावगम्यते।

कवेः मूलाक्षरानुसरणम्

अयं कविः बहुधा स्वीयचम्पूनिर्माणे मूलपुराणमेव सर्वथा अनुसरति इति अधोनिर्दिष्टश्लोकतुलनया विस्पष्टमवगन्तुं शक्यते।

मूलश्लोकाः –

एवं कुर्वन् रमानाथः तत्र लीनोऽभवद्धरिः।
कौसल्या कीटकगृहं तिन्त्रिणी दशदिग्रथः।।
गिरिरूपोऽनुजः साक्षात् अयोध्याऽभूदधित्यका।
इत्थं रामावतारेण समां क्रीडामकल्पयत्।।
वल्मीकं देवकी साक्षात् वसुदेवोऽथ तिन्त्रिणी।
बलभद्रः शेषशैलो मथुराऽभूदधित्यका।।
स्वामिपुष्करिणी तत्र यमुना च व्यराजत।

In Public domain. Digitization Muthulakshmi Research Academy

यादवाश्च मृगाः सर्वे खगा वै गोपिकादयः।।

एवं श्रीकृष्णरूपेण क्रीडितो वेङ्कटाचले।

अरायिकाणे विकटे गिरिं गच्छेति तं विदुः।।

एवं वेदमयः साक्षात् गिरीन्द्रः पन्नगाचलः।

छन्नवल्मीकदेहाढ्यो वेकुण्ठादधिको ह्यभूत्।।

सुवर्णमुखरी नाम नदी सा विरजा नदी।

वैकुण्ठो वेङ्कटगिरिः वासुदेवो रमापतिः।।

मुक्ता अजाः पक्षिगणाः मुक्ता रुद्रामृतोत्तमाः।

सनत्कुमारप्रमुखाः वानराद्याः द्विजोत्तमाः।।

मानुषं जन्म चाऽस्थाय यः पुमान् वेङ्कटाचलम्।

गन्तुमिच्छति धर्मिष्ठः तेन सर्वमनुष्ठितम्।

प्रीतो भवेद्रमानाथः सर्वदेवनमस्कृतः।।

श्रीवेङ्कटाद्रेर्महिमानमुत्तमं जानन्ति न ब्रह्मशिवेन्द्रपूर्वकाः।

किमल्पवीर्या मनुजास्तमोगताः जानन्ति विष्णोः स्थलमद्भुतं हि तत्।। इति मूलश्लोकाः।

चम्पूप्रबन्धे श्लोकाः इमे प्रायशः अक्षरानुवर्तनं कुर्वन्ति यथा –

को वेत्ति तस्य परमाद्भुतवैभवस्य

लीलावतारपुरुषस्य विचित्रलीलाम्।

ब्रह्मेन्द्ररुद्रमरुदादय एव मुग्धाः

बालाश्च तत्र विषये खलु वेदवाचः।।

वल्मीक एष वरकोसलराजपुत्री,

चिन्चातरुर्दशरथो गिरिराड्यवीयान्।

साक्षात्तदूर्ध्वगतभूमिरभूदयोध्या,

रामावतारविभवानुभवे मुरारेः।।

In Public domain. Digitization Muthulakshmi Research Academy

वल्मीकभूमिरियमत्र तु देवकी सा, तत्तिन्त्रिणीतरुवरो वसुदेवसंज्ञः।
शेषाद्रिरेव बलवान्बलभद्रदेवः, साक्षात्तदूर्ध्वगतभूर्मधुरापुरी सा।।
सर्वे मृगा वै यदुपुंगवास्ते, खेटाश्च सर्वेऽप्यथ गोपिकाद्याः।
श्रीकृष्णरूपेण मनोहरेण, एवं हि संक्रीडति वेङ्कटेशः।।
चश्रुश्श्रवोध्यक्षगिरिश्च साक्षात् प्रत्यक्षवैकुण्ठवरो विलक्ष्यः।
सुवर्णपूर्वामुखरी नदी सा विराजमाना विरजा नदी च।।
लक्ष्मीपतिस्तत्र तु वासुदेवः, मुक्ता अजाः पक्षिगणाश्च रुद्राः।
सनत्कुमारप्रमुखा मृगा वै, ते वानराद्याः द्विजसत्तमा स्युः।।
एवं वेदमयस्सक्षादह्यद्रिश्शीहरेस्तदा।
स्ववासभूतवल्मीको वेङ्कटादधिकोऽभवत्।।
यस्तं सेवितुमिच्छति प्रतिदिनं गच्छत्यनन्ताचलं
तत्सर्वं कृतमेव तेनविदुषा तज्जन्मनस्स्यात्स्थलम्।
तत्प्राप्तिश्च सहस्रजन्मसकृतैर्लोके जनानां भवेत्
नोचेत्तन्नभविष्यतीह न तथा तत्प्रीतिपात्रं जनः।।
श्रीवेङ्कटाद्रेर्महिमामहत्वं जानन्ति नैवाब्जभवादयोऽपि।
किमल्पचित्ता मनुजाश्च मायिनः विन्दन्ति विष्णोः पदमव्ययं तत्।।

इति।

पद्मावतीक्षीनिवासपरिणयवृत्तान्तः

अयं किल वृत्तान्तः भविष्योत्तरे, तथा वाराहे च उपवर्णितः परिलक्ष्यते। उभयत्रापि एकैकाध्यायविशेषनिरूपितः परिणयवृत्तान्तोऽयम्। परिणयप्रकारस्य तत्पूर्वतन–पश्चात्तनकथाप्रक्रिया बहुवितता उभयत्रापि पुराणयोः। तत्र किल, वकुलमालावृत्तान्तः, भगवता श्रीनिवासेन वनविहरणं, पद्मावती–श्रीनिवासयोः समागमः, परस्परप्रणयप्रकारः,

In Public domain. Digitization Muthulakshmi Research Academy

पूर्वोक्तपुराणश्लोकानामेव ईषद्वैषम्येण परिवर्तनं पूर्वनिर्दिष्ठश्लोकेषु परिलक्ष्यते प्रस्तुतवेङ्कटेशप्रबन्धे।

एवमेव तृतीयादिस्तबकेषु पौराणिकी कथा सम्यगनुवर्तिता चम्पूप्रबन्धकविना इति निश्चप्रचम्।

श्रीनिवासविलासचम्पूः

प्रस्तुतवेङ्कटेशचम्पूप्रबन्धात् प्राक्तनः कश्चन चम्पूप्रबन्धः श्रीनिवासकथानिरूपणप्रधानः श्रीमता श्लेषयमकादिनिपुणेन वेङ्कटकविना विरचितः। अयञ्च वेङ्कटकविरेव साहित्यप्रपञ्चे वेङ्कटाध्वरिनाम्नापि प्रसिद्धिमगात् यः किल विश्वगुणादर्शचम्पूप्रबन्धस्यापि प्रबन्धृत्वेन प्रासिद्ध्यत्।

यद्यपि विश्वगुणादर्शचम्पूप्रबन्धेऽपि वेङ्कटगिरेः प्राभवं कविः वेङ्कटाध्वरिः प्रायशः सप्तदशश्लोकैः तथा लघुतरगद्यैश्च न्यरूपयदत्र प्रघट्टके तथापि, नैतावता परितृप्तोऽयं कविः समग्रसुन्दरतया श्रीनिवासविलासचम्पूप्रबन्धं प्रणीय स्वीयकौतुकं समपूरयदिति वक्तव्यम्। तत्र च श्रीनिवासचम्पूप्रबन्धे पूर्वोत्तरभागद्वयमस्ति, यत्र किल पूर्वभागे पञ्चोच्छ्वासाः, उत्तरभागेऽपि पञ्चोच्छ्वासाः उल्लसन्ति। अत्र- हि पुराणप्रसिद्धैव कथा श्रीनिवासपद्मावत्योः सुरुचिरमुपवर्णिता जागर्ति। अनेन च कविना कल्पनाचातुरी कवितायां बहुधा दर्शिता इति अस्य प्रबन्धस्य जागर्ति कोऽपि विशेषः।

प्रस्तुत श्रीवेङ्कटेशचम्पूप्रबन्धस्य, वेङ्कटाध्वरेः श्रीनिवासविलासचम्पूप्रबन्धस्य च अयं विशेषभेदः, यत् वेङ्कटाध्वरिः पौराणिककथायोजनायां कल्पनाचतुरः स्वतन्त्रश्च। प्रस्तुतकविस्तु नातीव स्वतन्त्रो भाति, बहुधा पुराणानुसरणस्य परिदर्शनात्। प्रस्तुतकविः भविष्योत्तरपुराणमात्रमेव आधारीकृत्य स्वप्रबन्धं प्राणैषीत्। वेङ्कटाध्वरिस्तु

In Public domain. Digitization Muthulakshmi Research Academy

विविधपुराणानि पर्यालोचयदिति प्रतिभाति। अक्षरानुसरणं, मूलरचनायाः गद्यपद्यरूपेणानुवर्तनमात्रमेव अस्य प्रबन्धस्य अवगम्यमानो विशेषः।

वस्तुतो भविष्यदुत्तरगता कथा न केवलं तत्रैव, किन्तु वाराह–पाद्मादिष्वपि, तत्तत्कथाभिरदर्शनात्। विशेषरूपेण धरणीवाराहप्रस्तावस्य बहुत्र पुराणेषु दृश्यमानत्वात्।

पद्मावतीश्रीनिवासपरिणयवृत्तान्तनिरूपकं काव्यं एतद्वितयं चम्पूरूपं यन्महीयते, तदतिरिक्तं किमपि न दृश्यते संस्कृतसारस्वते प्रसिद्धतया। उभयत्र चम्पूप्रबन्धयोः विद्यमानायाः कथायाः समानत्वेऽपि, पुराणमूलकत्वेऽपि, प्रस्तुत श्रीपेरुमाण्ड्लाचार्यप्रणीतप्रबन्धः भविष्योत्तरकथां, तद्गतश्लोकांश्च अक्षरशः अनुवर्तत इति सूक्ष्मेक्षिकावीक्षणेऽभिलक्ष्यते।

अत्र यो गजवृत्तान्तः, सः वाराहे भविष्योत्तरे च समानस्सन् नायिकानायकयोः प्रथमसमागमबीजभूतः परिलक्ष्यते। एतादृश एव वृत्तान्तः महाकविना कालिदासेनापि स्वीयाभिज्ञानशाकुन्तलनाटके स्वीकृतः नायिकानायकयोः प्रथमसमागमपरिपोषकतया इत्यवगन्तव्यम्।

वकुलमालिका वृत्तान्तोऽपि उभयत्र पुराणयोः समानस्सन् चम्पूप्रबन्धद्वयेऽपि समान एव जागर्ति।

पद्मावतीसौन्दर्यवर्णने कविश्चतुरः

यद्यपि कवेः मूलपुराणानुसरणमेव विशेषतो इति सुष्ठु परिलक्ष्यते तथापि, प्रस्तुते चम्पूप्रबन्धे कविः पद्मावतीसौन्दर्यवर्णने स्वीयवर्णनाचातुर्यं पर्यदर्शयदिति अधस्तनश्लोकाः सूचयन्ति।

यथा –

तद्दिव्यमूर्तिस्फरणं विलोक्य क्षणप्रभाभूत्तटिदभ्रलीना।
अष्टापदोऽष्टादशवारमग्नौ पतन्नपीषन्नहि तत्पदाढ्यः॥
विविधकुसुमपद्मामोदमाघ्राय तस्मादधिकतरमवाप्तुं मूर्ध्नि तस्याश्च फाले।

In Public domain. Digitization Muthulakshmi Research Academy

रुचिरचिकुरभूताः केचिदाश्रित्य भृङ्गाः भ्रमरकपदवाच्या भान्ति नीलालकायाः॥

इत्यादि।

मूलेऽपि पद्मावती सौन्दर्यमुपवर्णयति नारदे, मूलपुराणश्लोकापेक्षया विलक्षणकविताशैल्या प्रस्तुतप्रबन्धकर्ता समुपावर्णयदिति निश्चप्रचम्।

अत्र सन्दर्भे कविः अन्यूनमष्टादशश्लोकैः तत्सौन्दर्यं वर्णितवान्। अत्रेतदीया वर्णनाचातुरी सुष्ठु परिलक्ष्या भवति।

शब्दालङ्कारचातुरी

श्लोकरचनायां न केवलमर्थालङ्कारग्रथनं, किन्तु शब्दसंवादसौन्दर्यमपि प्रादर्शयदत्र कविः। यथा अधस्तनश्लोके –

करीन्दसङ्गेन तमागतं तं तुरङ्गमास्थाय वाराङ्गनाभिः।
यथाङ्गशून्यं च तदा शुभाङ्गं पद्माङ्गनापश्यददृष्टपूर्वम्॥

पद्मावतीश्रीनिवासयोः प्रथमः समागमः

पद्मावतीश्रीनिवासयोः समागमः वाराहे, भविष्योत्तरे च उपलभ्यते इशद्वैषम्येण। भविष्योत्तरे तावत् पद्मावतीश्रीनिवासयोः परस्परसंवादः, स्पर्धनं, तदनु विवाद–स्पर्धादिके प्रवृत्ते सति पद्मावती तत्सखीकृत–शिलाताडनेन श्रीनिवासहयमरणं, श्रीनिवासवैमनस्यमित्यादि कथा या, सैवात्र कविना स्वीकृता अविकलम्। वाराहे तु केवलं तर्जनमात्रमेव, हयताडनं तु नास्ति। उभयत्रापि सरससन्निवेशप्रकारो नास्ति इति वस्तुतत्त्वम्। प्रस्तुतचम्बूप्रबन्धापेक्षया सन्निवेशकल्पनायां रसपरिपोषणे च निपुणो वेङ्कटाध्वरिः श्रीनिवासविलासचम्पूप्रबन्धे नितरामितिशते इति साहित्यदृशा निर्मत्सरैः सहृदयैः विद्वद्भिरवश्यमेवाभ्युपगन्तव्यम्। एवमेवान्यस्तबकेषु कथा अनुसन्धेया। विस्तारभयाद्विरम्यते।

In Public domain. Digitization Muthulakshmi Research Academy

एवं यदि सूक्ष्मदृशा परिशीलने सति, यद्यपि प्रस्तुतप्रबन्धे नूतनता कापि न विद्यत इति कथनं वस्तुतत्त्वाविष्करणमेव। तथापि, कविः श्रीनिवाससेवानिरतः आर्तहृदा अनपूर्वामपि कथां स्वीकृत्या चम्पूनिर्माणे प्रवृत्तः मूलपुराणकथांशानां वचनानाञ्च चम्पूप्रबन्धात्मना स्वीयरचनया रूपान्तरविधाने कृतकृत्योऽभवदिति अवश्यमेव अवगम्यमाने, पूर्वप्रकाशितस्य तेलुगु-लिपिनिबद्धस्य अस्य प्रबन्धस्य नागरीलिपिपरिवर्तनं विधाय, पुनः प्रकाशने कृतः परिश्रमः संस्कृताकाडमी-प्रकाशनेषु कामपि पूर्तिं प्रकाशनमिदं नूनं परिकल्पयेदेव विश्वसन्, मामस्मिन् प्रस्तावना-विरचने प्रेरयन्तः श्रीमन्तः नीलकण्ठं महाभागाः, तथा सुब्रह्मण्यः, सन्तोषकुमारः अन्ये च अत्र कर्मणि व्यपृताः सर्वे, अभिवन्दनीया इत्येतावता रचनाव्यापारात् विरमामि।।

एवं निवेदयिता

समुद्रालोपनामकः वेङ्कटरङ्गरामानुजाचार्यः

In Public domain. Digitization Muthulakshmi Research Academy

प्रस्तावना

'चमत्कृत्य पुनाति सहृदयान् विस्मिताकृत्य प्रसादयति इति चम्पूः' इति हरिदासभट्टाचार्यः चम्पूरिति शब्दस्य व्युत्पत्तिं दर्शयति। गद्य-पद्ययोः युक्ता काव्यस्य विशिष्टा शैली चम्पूः इत्यभिधा, या काव्याध्येतॄणां हृदये चमत्कारविस्मियाभ्यां समं पवित्रताम् उत्पादयति। अत्र चपिँ गत्याम् इति चौरादिकः धातुः। चम्पा, चाम्पेय, चम्पक इत्यादि-शब्दाविव चम्पूरिति शब्दोऽपि उत्पन्नस्स्यादित्यूह्यते। चम्पयति चम्पयते वा रसभावादिविशिष्टं वस्तु प्रकाशयतीति चम्पूः इति निष्पत्तिं वक्तुं शक्नुमः। अथवा 'प्राणैषीच्चम्पुभारतम्' इत्यत्र अनन्तभट्टस्य चम्पुः इति ह्रस्वान्तप्रयोगः अपि साधुरिति वक्तुं शक्यते।

काव्यादर्शे दण्डिः प्रप्रथमतया चम्पूरिति काव्यप्रभेदविषये न्यगददित्यतः षष्ठशतकात् पूर्वस्मात् चम्पूकाव्यस्य निर्मितिः बभूवेति ऊह्यते। किन्तु ऋग्वेदस्य ऐतरेयब्रह्मणस्थे हरिश्चन्द्रोपाख्याने गद्यपद्यमिश्रता प्रस्तुतिः दृश्यते। कृष्णयजुर्वेदीय-तैत्तिरीय-मैत्रायणि-कठसंहितासु गद्यपद्यमिश्रिता रचना वरीवर्ति। प्रश्न-मुण्डक-कठोपनिषत्सु अपि गद्यपद्यमिश्रितं साहित्यमुपलभ्यते। महाभारतस्य आदिपर्वणः पौष्योपपर्वणि, विष्णुपुराणे, भागवते, पञ्चतन्त्र-हितोपदेश-शुकसप्तति-विक्रमार्कचरित-पालिभाषायाः जातककथासु, अश्वघोष-भास-कालिदासादीनां नाटकेषु च गद्यपद्यमिश्रिताभिव्यक्तिः दरीदृश्यते। इत्थं चम्पूसदृशया शैल्या प्रस्तुता संस्कृतधिषणा वैदिकसाहित्यादारभ्य दृष्टिगोचरी भवतीति स्पष्टमवगम्यते।

गद्यानुबन्धरसमिश्रितपद्यसूक्तिः
हृद्यापि वाद्यकलया कलितेव भाति।
तस्माद्दधातु कविमार्गजुषां सुखाय

In Public domain. Digitization Muthulakshmi Research Academy

चम्पूप्रबन्धरचनां रसना मदीया।। इति चम्पूरामायणे भोजः चम्पूरचनां कीर्तयति।

गद्यपद्यमयं श्रव्यं सम्बन्धं बहुवर्णितम्।

सालङ्कृतैः रसैः सिक्तं चम्पूकाव्यमुदाहृतम्।। इति स्वीये 'चम्पू काव्य का आलोचनात्मक एवं ऐतिहासिकमध्ययन' इत्याख्ये ग्रन्थे चम्पूकाव्यं परिभाष्यते छविनाथत्रिपाठीमहोदयेन।

साम्प्रतं संस्कृतपरिषदः पुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रस्तूयते श्रीमता शिरसनहल् पेरुमाण्ड्लाचार्यकविना विरचितोऽयं श्री वेङ्कटेशचम्पूप्रबन्धः।

अ. कवि परिचयः

अयं कविः परमभागवतोत्तमः, उभयवेदान्तप्रवीणः, संस्कृतान्ध्रोभयभाषाविशारदः, पौराणिकः, अष्टावधानी, तेलङ्गानाराज्यस्थ-निर्मलप्रान्तस्य देवरकोटस्य श्रीवेङ्कटेशदेवस्थानस्य प्रधानार्चकः आसीत्।

कीलकनामसंवत्सरस्य कार्तिकशुद्धचतुर्थ्यां वैष्णवब्राह्मणपरिवारे निजामाबाद्-मण्डलान्तर्गत-आर्मूरतालुकायाः मोर्ताड् ग्रामे श्रीमतोः वेङ्कटार्य-रङ्गनायकम्मदम्पत्योः चतुर्थापत्यत्वेन जन्म लेभे।

बाल्यादेव प्रतिभानवान् आसीदयं कविः। देशभक्तिपरिपूर्णोऽयं शिल्पचित्रलेखनादिललितासु कलासु स्वीयां प्रतिभां प्रदर्शयति स्म। स्वतृतीयभ्रातुः श्रीमतां शतावधानिनां कृष्णमाचार्याणां सविधे प्राथमिकविद्यया साकं पञ्चमहाव्यानि, शाकुन्तलादिनाटकानि, प्रतापरुद्रीयादिशास्त्रग्रन्थान् अधीयाय। रामयण-महाभारत-भागवतादिषु स्वीयामनुरक्तिं प्रदर्शयन्नासीदयं काव्यचूडामणिः। प्रस्थानत्रयेषु, द्रविडसम्प्रदायग्रन्थेषु नैपुण्यं च प्राप्नोत्।

In Public domain. Digitization Muthulakshmi Research Academy

स्वीयया धिषणया बहुषु प्रान्तेषु अष्टावधानानि आरचयन् पण्डितलोकं चकितचकितान् करोति स्म। स्वीये षोडशे वर्षे एव आण्डालम्मया सह पर्यणैषीच्च। कालान्तरे वर्षचतुष्टयं यावत् अध्यापकवृत्त्या कुटुम्बं पोषयन् आसीत्। स्वतन्त्रजीवनमैच्छन् अध्यापकवृत्तिं परित्यज्य आदिलाबादसमीपस्थे 'गिम्मे'नामके ग्रामे षोडवर्षाणि यावदुषित्वा पुराणप्रवक्तृत्वेन जीवनं यापयामास।

स्वीयानाम् अपत्यानाम् अध्यापनहेतुना अथ कदाचित् 1953 तमे वर्षे निर्मल् प्रान्तमागतवान् आसीत्। तत्र समीपस्थ–देवरकोटग्रामस्थस्य लक्ष्मीवेङ्कटेशदेवालयस्य अर्चकत्वं निर्वहन् देवालयस्य पुनर्नवीकरण-दायित्वमन्यैः ग्रामवासिभिः सह ऊढ्वा दुर्मुखिनामसंवत्सरस्य ज्येष्ठशुक्लतृतीयायां गुरुवासरे अर्थात् 1956 तमे वर्षे श्रीलक्ष्मीवेङ्कटेशस्य शिलाविग्रहप्रतिष्ठापनकार्यं सुष्ठु सम्पाद्य च तत्रैव प्रधानार्चकत्वेन शेषजीवितं यापयितुमचिन्तयत्। आर्तार्तिनिर्वापणपरः कृपाकटाक्षवीक्षणः देवाधिदेवः परमदयालुः उत्तमर्णो लक्ष्मीवेङ्कटेश्वरः कवेरस्य सेवया तुष्टस्सन् मोक्षं प्रत्यर्पयितुमिच्छया स्वप्ने दर्शनं यच्छन् चम्प्वा शैल्या प्रबन्धमेकमारचयितुमादिशत्। प्रबन्धोऽयं रचनायाः दशवर्षानन्तरं 1978 तमस्य वर्षस्य अगस्तमासे प्रथममुद्रणाय मुद्रणालयमगच्छत् मुद्रितश्चाभवत्।

ईदृशानां तेलुगुलिप्या मुद्रितानां ग्रन्थराजानां संस्कृतलोकाय परिचाययितुं सङ्कल्पितया अनया परियोजनया ऐषमः ग्रन्थराट् पुनः प्रकाशं नीयते।

आ. काव्यपरिचयः

श्रीवेङ्कटेशचरितामृतसिन्धुधारा
चम्प्वात्मिका विलसतीयमिहैव भूमौ।

In Public domain. Digitization Muthulakshmi Research Academy

गम्भीरभावरसपूरितगद्यपद्या

तत्पादभूरिव सदा बुधमोदमाना।।

एतत्प्रबन्धरचना चतुरात्मशक्तिः

कुत्रास्ति मेऽहमिहचास्मि निमित्तमात्रं

स्वप्नेऽवतीर्य भगवान्मम वेङ्कटेशः

मामाह्वयत्तदिह तत्करुणैवकर्त्री।। इत्येताभ्यां प्रतिज्ञात्मकाभ्यां काव्यारम्भश्लोकाभ्यां कवेः काव्यरचनामुख्योद्देश्यं सुस्पष्टं भवति।

काव्येऽस्मिन् नायकः साक्षात् स्थितिकारकः श्रीहरिः। काव्येऽस्मिन् कविना नायकं अप्राकृतमपि प्राकृतम् इव बहुषु सन्दर्भेषु प्रादर्शि। 1.तृतीये स्तबके 'क्रूरान्बहून् तत्र मृगान् शरेण ससिंहशार्दूलगजैणपेरून् कीटाँश्च घोरान् शरभान् जघान।' (30 पृष्ठसङ्ख्या) अपि च 'दन्तावलस्तं शरचापहस्तं हन्तुं स्वपृष्ठादनुयान्तमुग्रम्' (31 पृष्ठसङ्ख्या) इत्यादिषु मृगया जन्तून् हन्तीति सन्दर्भेण, 2.तृतीये स्तबके एव 'निश्चित्य देवि मरणं त्वयि भोगमेत्य'(41 पृष्ठसङ्ख्या) अपि च 'जयो वा अपजयो वास्तु त्वयि भोगं करोम्यहम्' (42 पृष्ठसङ्ख्या) इतीत्थं देवाधिदेवस्य कामप्रेरितस्वरूपेण प्रतिनायकत्वस्वरूपेण च प्रदर्शनसन्दर्भेण, 3.चतुर्थे स्तबके तावत् 'स्रवन्नेत्रजलबिन्धुभिः रुदन्तम्'(44 पृष्ठसङ्ख्या), 'हस्तेन जलपूरितनेत्रे परिमृज्य' (45 पृष्ठसङ्ख्या), सप्तमे स्तबके 'एवमुक्तश्शिरसि न्यस्तहस्तश्श्रीधरस्तदा रमामनुस्मरन् प्राकृतवच्चतुर्मुखं पश्यन्नेवं रुदन्वदति स्म।' (89 पृष्ठसङ्ख्या), नवमे स्तबके 'तच्छ्रुत्वा श्रीनिवासोऽपि रुरेद नरवत्प्रभुः' (113 पृष्ठसङ्ख्या), तत्रैव 'दृष्ट्वास्य काये पतितो रमेशः रुरोद दीर्घं नरवद्विचित्रम्' (114 पृष्ठसङ्ख्या), पुनस्तत्रैव 'इत्यद्भुतं रोदनममाचकार' (114 पृष्ठसङ्ख्या) इत्यादिषु नायकस्य अनौचित्य रोदनसन्दर्भेण 4.सप्तमे स्तबके

In Public domain. Digitization Muthulakshmi Research Academy

देवपरिवारः भोजनरहितः सन् आकाशराजपुरीप्रस्थानसन्दर्भे मृडस्य हेलनवचनसन्दर्भे, 5.नवमे स्तबके तोण्डमान्-राजतनयौ च युद्धसन्नद्धाः भूत्वा श्रीनिवासस्य सहायकाः भूत्वा आगमने सति श्रीनिवासः पद्मावत्या सह समालोचन सन्दर्भे, 6. अनौचित्य रूपेण युद्धस्य प्रारम्भः सपदि मध्ये एव परिसमापनसन्दर्भेण च कथायाः गाम्भीर्यं नाशयतीति प्रतिभाति।

यद्यपि एतेषु सन्दर्भेषु सत्स्वपि कवेः काव्यमिदमामूलचूडम् सुन्दरैः वर्णनैः सुशोभते। उपमा-अनन्वय-उत्प्रेक्षा-रूपकाद्यलङ्कागाणां प्रयोगेण अपिच शिखरिणी-इन्द्रवज्रा-उपेन्द्रवज्रा-उपजात्यादिभिः छन्दोभिः काव्यं रञ्जयामास कविः। काव्यस्यास्य अङ्गिरसौ शृङ्गार-वीरौ। शृङ्गारवीररसयोः पोषणेन चम्पूकाव्यस्य लक्षणस्य पालनमकरोत् कविः।

प्रबन्धेऽस्मिन् प्रयुक्तानां गद्यांशानां पद्यांशानां संख्या इत्थं वर्तते।

स्तबकसंख्या	पद्यांशानां संख्या	गद्यांशानां संख्या	योगः
1.	55	12	67
2.	65	10	75
3.	71	8	79
4.	47	15	62
5.	34	9	43
6.	64	36	100
7.	63	52	115
8.	57	14	71
9.	43	18	61
10.	55	16	71

इ. कथावस्तुस्रोतांसि –

श्रीमता शिरसनहल् पेरुमाण्ड्लाचार्यकविना रचितस्यास्य प्रबन्धस्य आधारः कः इति प्रश्न उदेत्येव। कवेरस्य परिचयसन्दर्भे

In Public domain. Digitization Muthulakshmi Research Academy

अस्मभिर्ज्ञातमासीद्यत् कविरयं षोडशवर्षाणि यावत् पुराणप्रवाचक आसीदिति। तेनैव अनुभवेन पुराणेभ्यः कथावस्तु सङ्गृह्य प्रबन्धोऽयं विरचितः।

वराह- पद्म- गरुड- हरिवंश- ब्रह्माण्ड- मार्कण्डेय- वामन- ब्रह्म- ब्रह्मोत्तर- स्कन्द- आदित्य- भविष्योत्तरपुराणेषु वेङ्कटाचलमाहात्म्यविषयिका[1] गाधा उपलभ्यते। तेषु वाराह- भविष्योत्तरपुराणोक्तया कथया वेङ्कटेशचम्पूकथया च बहुत्र साम्यता दरीदृश्यते। एतस्मिन् विषये श्रीमता ब्रह्मश्रिया समुद्रालवेङ्कटरङ्गरामानुजाचार्येण अस्य ग्रन्थस्य उपोद्धातावसरे प्रस्तुता विद्यते।

तत्र उदाहरणरूपेण ऐषमः आधारः दर्श्यते। वराहपुराणस्य भूगोलोपाख्यानस्य धरणीवराहसंवादे वेङ्कटाचलमाहात्म्ये पञ्चमोऽध्ययस्थैः एतैः श्लोकैः पद्मावतीदर्शनेन श्रीनिवासस्य मोहप्राप्तिरभवदिति स्रोतः सङ्गृहीतवान् कविरिति।

सम्प्राप्य चाऽऽलयं दिव्यमवतीर्य हयोत्तमात्।
विसृज्य सानुगान् सर्वान् देवान् कैरातरूपकान्॥
विश्रमध्वमिति प्रोच्य विवेश मणिमण्डपम्।
आरुह्य मणिसोपानं पञ्चकक्ष्या अतीत्य च॥
मुक्तागृहं समासाद्य तस्मिँल्लोलयिते शुभे।
नवरत्नमये मञ्चे संविवेशावशो हरिः॥
संस्मरन् पद्मगर्भाभां तावेवाऽऽयतलोचनाम्।

---

1 वेङ्कटाचलमाहात्म्यम्- प्रथमो भागः, तिरुमलतिरुपतिदेवस्थानप्रकाशनम्, तिरुपतिः – 2013
वेङ्कटाचलमाहात्म्यम्- द्वितीयो भागः, तिरुमलतिरुपतिदेवस्थानप्रकाशनम्, तिरुपतिः – 2013

In Public domain. Digitization Muthulakshmi Research Academy

तनुमध्यां पीनकुचां मन्दस्मितमुखाम्बुजाम्॥

ई. काव्यस्य कथाभागः –

स्तबकविभागेन विभक्ते चम्पूकाव्येऽमुष्मिन् कथाभाग इत्थं वर्तते।

प्रथमस्तबकः – ग्रन्थारम्भे कविना श्रीमतः देवाधिदेवस्य लक्ष्मीवेङ्कटेशस्य स्तुतिं विधाय स्वपितृगुरूँश्चाभिवाद्य प्रतिज्ञां विदधौ। ततः कथामित्थं प्रोवाच – कश्यपादयः ऋषयः गङ्गातटे समेत्य महाक्रतुमेकं कर्तुमुद्यताः। ततः आकाशात् सुरर्षिर्नारदोऽवतीर्य 'किं फलमुद्दिश्य, कं देवमुद्दिश्य च क्रतुं कर्तुमुद्यताः तत्र को वा अध्वर्युः कश्च होता' इति पर्यपृच्छत्। तदा 'को वा देवः आदिपूजां स्वीकर्तुं क्षम' इति संशयग्रस्ताः मुनीश्वराः क्रतुविदांवरं भृगुमुनीश्वरं 'सन्देहमपाहतुं भवानेव समर्थ' इति सविनयं प्रैरयन्। सः संशयनिवृत्यर्थं कमलासनं निकषा अगमत्। सस्तत्र भृगुं वीक्ष्य किमपि नोवाच। भृगुः रोषेण ब्रह्माणम् अज्ञानावृतं मत्वा ततः कैलासगिरं ययौ। तत्र गिरिजासमेतं शम्भुम् एकान्तक्रीडानिमग्नं वीक्ष्य 'लिङ्गरूपेणैव भवान् समर्चितो भविता' इति शशाप। ततः सः हरिमन्दिरं प्रविश्य श्रियासमेतं शयानं हरिञ्च वीक्ष्य कोपाग्निदग्धचित्तस्सन् हरिं वक्षसि पादेन प्राहरत्। तदा हरिः भृगुमुनिं प्रेम्णा आलिङ्ग्य ऋषिपादयोः निपत्य उष्णोदकेन पादौ प्रक्षाल्य पूजाञ्च परिसमाप्य तद्गर्वनिर्मूलनाय मुनिपादगतम् अक्षि प्रणुदत्। तदविज्ञाय भृगुः कश्यपवृन्दं प्रति निवृत्य ऋषिगणान् प्रति श्रीहरिरेव सर्वोत्तमोत्तम इत्यब्रवीत्। ततः देवाः क्रतुं पर्यपूरयन्।

क्रतोः परिसमाप्त्युत्तरं हरिं वीक्ष्य लक्ष्मीरित्थम् उवाच 'अकृतापराधं भवन्तं वक्षसि प्राहरत् मुनीश्वरः। भवतः वक्षसि ममैव वासः वर्तते। अतः सः मामेव प्राहरत्। अतोऽहम् असहन्ती करवीरपुरं प्रयामी'त्युक्त्वा हरिं त्यक्त्वा प्रययौ।

In Public domain. Digitization Muthulakshmi Research Academy

श्रिया रहितो हरिरपि वैकुण्ठं त्यक्त्वा शेषाद्रिं प्राप। चिन्ताग्रस्तः तत्रत्य वनप्रदेशेषु अटन् कश्चित् पुष्करिणीदक्षिणतटस्थं तिन्त्रिणीवृक्षमूलस्थं वल्मीकं वीक्ष्य 'इदमेव दिव्यं स्थान'मिति मत्वा तस्मिन्नेव लीनोऽभवत्।

द्वितीयस्तबकः – हरिः यत्र लीनः आसीत् स प्रान्तः चोलराज्याङ्गभूतोऽसीत्। हरिं त्यक्तवैकुण्ठं ज्ञात्वा धेनुरूपेण विधिः वत्सरूपेण ईश्वरः उभावपि पशुत्वं धृत्वा तमेव प्रान्तं प्रापतुः। धेनुरूपः विधिः चोलस्य धेनुष्वन्यतमोऽभूत्। सहस्रधेनुभिस्साकं शेषाद्रिगिरिसानुषु हरेरन्वेषणमारब्धवाँश्च। रमापि चोलराज्ये एव अवातरत्। अथ कदाचित् पुष्करिणीसमीपस्थे तिन्त्रिणीवृक्षमूलस्थे वल्मीके हरिर्निवसतीति ज्ञात्वा वल्मीके क्षीराभिषेकं कर्तुमारेभे। एकदा चोलनृपस्य पत्नी तां धेनुं दोग्धुमन्वगच्छत्। धेनोरूधसः दुग्धं नायातीति ज्ञात्वा धेनुपाले शङ्कां चकार। तं चर्मनिर्मितेन शुल्बेन ताडयामस।[2] कशाघातपीडितः गोपालकः परेद्यवि धेनुभिः साकं वनं गत्वा विधिरूपेण स्थितां धेनुमन्वगच्छत्। सा धेनुः प्रतिनित्यमिव वल्मीकस्योपरि दुग्धम् अभ्यसिञ्चत्। तं दृश्यं वीक्ष्य गोपालकः कुठारेण धेनुं प्राहरत्। स्वभक्तहानिमसहमानः श्रीहरिः तं घातं स्वमौलौ धृतवान्। क्षणादेव वल्मीकात् रक्तस्रावः उत्सृजत्। एतं कोलाहलं वीक्ष्यन् गोपालः सपदि एव मृत्युङ्गतः। गोपालकस्य मृत्युं वीक्ष्य स धेनुः धावन् गत्वा राजसभायां लुलुण्ठ। किमर्थमेवं धेनुः लुण्ठतीति अनवगच्छन् तया साकं गिरिप्रदेशं जगाम। तत्र गोपालस्य मृतकलेवरम् अपि च वल्मीकात् उत्सृज्यमानं रक्तस्रावं च आलोक्य उच्चैः खिद्यमानं राज्ञः शब्दम् आकर्ण्य वल्मीकात् श्रीहरिः बहिरागत्य 'रे दुष्ट! चोलनृप! त्वद्धेनुपालः कुपयाविहीनः

---

2 अत्र कविः 'तताड' इत प्रयोगं करोति। 'तडँ आघाते' इति धातुः चौरादिकः एव वर्तते।

In Public domain. Digitization Muthulakshmi Research Academy

मां परशुना अताडयत्।' इति वदन् 'मद्दुःखदानकर्मणा पिशाचरूपी भव' इति शशाप। बहुधा प्रार्थिते नृपे सति 'आवयोः दुःखं यावत् कलिर्भविष्यति तावदित्थमेव भविष्यति, अग्रे त्वमेव गगनाभिधेयो नृपो भविष्यसि तदा पद्मवतीं मां प्रदास्यसि। कन्याप्रदानसमये वरदक्षिणार्थं वज्ररत्नमणिभूयिष्टमेकं मकुटं प्रदास्यसि। तदहं प्रतिशुक्रवासरे सायाह्ने धारयिष्यामि' इति वदन् वेदनोपशमनार्थं गुरुं प्रार्थयामास। गुरुरपि 'उदुम्बरक्षीरमिश्रितमर्कतूलं धृढं धार्यताम्' इत्युक्त्वा ततो जगाम। तत्र श्वेतपोत्रीपतिः किरीशः मृगयार्थम् आगतः हरिं वीक्ष्य किमर्थम् अत्र विहरतीति कारणं पर्यपृच्छत्। हरिः भृगोः वृत्तान्तं, वैकुण्ठात् लक्ष्मीत्यागवृत्तं, गोपालकस्य मृत्युवृत्तं सर्वमपि निवेद्य 'अत्रागतानां सर्वेषां मद्भक्तानां प्रथमदर्शन–नैवेद्य–क्षीराभिषेचनाद्यर्चनं तवैवानन्तरं ममास्त्विवति' उवाच। किरीशोऽपि भगवतः लीलामानुषविग्रहस्य धरित्रीपवित्रीकरणायेदं सर्वं प्रवृत्तमिति मत्वा हरेः सेवायै एकां वकुलां नियोजयामास। अन्नपानौषधपादसंवहनादिभिः सेवाभिः परिचर्यमाणा सा हरेः विवाहकार्यं करिष्यामाणा सती प्राक्जन्मसङ्कोचविमोचनाय शेषाद्रिगिरौ सहायभूताभवत्।

तृतीयस्तबकः – एकदा मधुकैटभारिः गोविन्दः बाणशरासनहस्तस्सन् अटव्यामटन् चरन्तं कञ्चन मत्तेभम् अन्वगच्छत्। भीतः सः गजेन्द्रः दूरं जगाम। योजनं दूरं गत्वा सत्वरं स्थगित्वा स्वशुण्डमुधृत्य दण्डवद्भुवि पतित्वा शरणङ्गतोऽभूत्। तदा श्रीहरिः तत्र तरुलताभिः क्रीडित्वा सखीभिः सार्थं विश्रमन्तीम् आकाशराजपुत्रीं पद्मावतीं ददर्श। सापि तद्दिव्यमूर्तिनं विलोक्य क्षणप्रभाभूत्। अपुरूपसौन्दर्यवतीं पद्मावतीं पश्यन् श्रीपतिरपि तत्समागनार्थं मन्दं मन्दं तदभिमुखं प्रयातः। तदा तत्रेत्थं सम्भषाणमासीत्।

In Public domain. Digitization Muthulakshmi Research Academy

पद्मावती – (समीपमागच्छन्तं जगन्मोहनं दृष्ट्वा) कोऽयं जगन्मोहनसुन्दराङ्गः, मामुपैति। (इति अन्तरन्तरेव विचिन्तयन्ती सखीभिस्सह किमपि अज्ञातवतीवैव स्थिताभवत्।)

सख्यः – कोऽसौ अतिकिरातरूपः पुरा न दृष्टः महदुग्ररूपः हयाधिरूढः बलवद्बलाढ्यः अत्रैव आयाति। किं वा कर्मः? (इति ब्रुवत्यः भयकम्पिताः अभवन्।)

पद्मावती – (अभिमुखमायतस्य तस्य हयाधिरूढस्य पुरुषस्य नामगोत्रादिवृत्तान्तं सकलं पृच्छन्त्विति सखीः प्रत्यवोचत्।)

सख्यः – (धैर्यमालम्ब्य) कोऽसि त्वम्? अत्र किमस्ति कार्यम्? किमर्थमत्रागतोऽसि? अत्र नराः न सन्ति। प्रतिगच्छेतः।

श्रीपतिः – किमर्थमेवं कन्याः प्रतिषेधवाक्यं वदन्ति। मम राज्ञः पुत्र्यास्समीपे अतिमुख्यकार्यं वर्तते। कार्यं विना न कोऽपि विद्वान् आयाति किल।

सख्यः – किं कार्यमस्त्यत्र? ते गोत्रादिकं किम्? ते मातापितृबन्धुवर्गाः के? ते च कुत्र वर्तन्ते? को देशस्तव? को वा भवान्? शीघ्रमेव वदेति राजपुत्री पृच्छति।

रमापतिः – मम कुलं चन्द्रकुलम्। देवकीवसुदेवौ मे पितरौ। रामः मेऽग्रजः। सुभद्रा मम अनुजा। मम बन्धुः पार्थः अस्ति। मां सर्वे कृष्णं वदन्ति। भवत्या पृष्टे सति मया मद्वृत्तमखिलं निगदितम्। भवत्याः चरित्रमत्र श्रोतव्यमस्ति। अतो सर्वञ्च ते पितृकुलादिकं नामयुक्तं वद।

पद्मावती – अहम् आकशराजस्य तनयास्मि। मां सर्वे पद्मावतीति प्रवदन्ति। आत्रेयसगोत्रास्म्यहम्। हे किरातनाथ! त्वमितः शीघ्रं यातु।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीपतिः – अमृतं मृतरहितमपि विषसम्मिश्रं वधाय भवत्येव। मृदुमधुरमपि कटुसम्मिश्रं व्यधाय भवत्येव। त्वं किमर्थं मधुरं न भाषसे? पुण्यशीलाः आर्दवं वाक्यं वदन्ति किल। किं निष्ठुरं मां प्रति भाषसे। त्वत् काममिच्छन् अहमत्र आगतोऽस्मि।

पद्मावती – (कृधान्विता, उग्रनेत्रा) किं न विद्यते तव जीवनेच्छा? आकाशराजः समागतश्चेत् त्वां हनिष्यति। शीघ्रं त्वं स्वधाम याहि।

श्रीनिवासः – (ससाहसम्) कार्यं भवेच्चेत् मरणं हि सौख्यम्। कार्यहीनस्य जगत् ऋणं स्यात्। सः नृपालः मां किमर्थं हन्यात्? अधर्ममार्गगा तु त्वमसि। त्वं तु विवाह प्राप्तवयस्कासि। अहं कन्यार्थी अस्मि। त्वञ्च वरार्थिन्यसि। अत्र मम वाक्ये कः दोषः वर्तते वद।

पद्मावती – (सक्रोधम्) हे मुग्ध! त्वं न जानासि। राजा अत्र आगच्छेत् तर्हि निगडैर्बध्वा निस्संशयं त्वां हनिष्यति।

श्रीनिवासः – (सत्यागम्) देवि! मरणं निश्चित्य त्वयि भोगमेत्य गन्तास्मि। पूर्वकृतफलं यथा वा स्यात् भावि भवस्य मृत्युः तथा भवतु। स राजा माम् अनघं कथन्नु हन्यात्।

पद्मावती – हे किरातनाथ! इदानीमपि समयोऽस्ति। शीघ्रं स्वनिकेतनं यथासुखं गच्छ। (निषाधाकृतिः सः तद्वाक्यं निराकृत्य हयस्थः पुरोऽगच्छत्) त्वं बन्धून् पितरौ च सर्वान् त्यक्त्वा अनाथः व्यर्थं किमर्थं म्रियसे। अपि च वृधा काकभोग्यः भविष्यसि। शीघ्रं याहीतः।

श्रीहरिः – विधिना लिखतं कर्म व्यर्थं न भविष्यति। जयो वा विजयो वा अस्तु। त्वय्यद्य भोगं करोम्यहम्।

In Public domain. Digitization Muthulakshmi Research Academy

सरोषकषायिताक्षी पद्मावती सर्वाभिस्सखीभिरावृत्य समीपमागतं तं शिलाभिः शिलौघैश्च सन्ताडयामास। तत्ताडनैः स सतुरगमधः पतितस्सन् मृतश्च। तुरगं गतासुं वीक्ष्य ततो सवेगं गोविन्दो निर्जगाम।

चतुर्थस्तबकः – अप्राकृतोऽपि प्राकृतवत् परितप्यमानहृदयम्, आपादमौलिमवच्छिन्न–वस्त्रेणाच्छादितं तनुम्, अत्यन्तदीर्घनिश्वासैर्निश्वसन्तं, स्रवन्नेत्रजलबिन्दुभिः रुदन्तम्, अभाषमाणं, दिवा स्वापं कुर्वन्तं श्रीहरिं वीक्ष्य प्रवृत्तं वृत्तन्तं किमित्यपृच्छत् वकुलादेवी श्रीहरिम्। तदा श्रीहरिः जागृतस्सन् 'कमलपत्रविशालनेत्रां पद्मावतीं दृष्ट्वा मदनमोहवशं गतम्मे' इत्यवोचत्। अपि च 'ममावतारः तदर्थमेवाभवत्। सा कन्यका अतिसुलभा भविता त्वया' इत्यब्रवीत्। अपि च 'तस्याः कन्याकायाः साधनविधौ त्वमेव मम पिता, भ्राता–मातुल–सुहृत्तमबन्धुवर्गः' इत्युवाच। तदा वकुलामाता 'सा का पुण्यवती त्वदर्थमिह जनिता भुवि तद्वृत्तं मे वद। तां प्राप्तुं मार्गमपि उपदेशय' इति पर्यपृच्छत्। तदा श्रीहरिः पद्मावत्याः पूर्वजन्मवृत्तान्तं निवेदयामास। तदत्यन्तचित्रविचित्रं पूर्वचरित्रं शृत्वा आश्चर्यचकिता वकुलामाता 'अहं तस्य राज्ञः सभां गत्वा सर्वं निवेद्यागमिष्यामीति' श्रीहरिमवोचत्। दिव्यतुरङ्गमधिरुह्य पद्मतीर्थं गत्वा तत्रत्यदेवान् हरिरामकृष्णान् समर्च्य सुवर्णमुखरीं तीर्त्वा अगस्त्येश्यरमन्दिरं गत्वा तत्रागताः पद्मवत्याः सखीः वीक्ष्य 'हे बालाः! का यूयं? कस्य सम्बन्धाः? किमर्थमिहचागताः? सर्वं वृत्तान्तं मे वदध्वम्' इति पप्रच्छ। तदा ताः कन्यकाः 'ह्यः वयं सर्वाः अस्मत्सख्या आकाशराजतनयया पद्मवत्या समम् उपवने श्रान्ताः उपविष्टाः। तदा तत्रागतं कञ्चन तुरगारूढं सुन्दरमूर्तिं किरातं वीक्ष्य वयं तस्य वृत्तान्तमपृच्छाम, तदा तेन अवाच्यं भणितम्। तदा वयं शिलाभिस्तं किरातम् अताडयाम। तस्य तुरगः तत्रेव मृतः। सा व्यक्तिश्च

In Public domain. Digitization Muthulakshmi Research Academy

पलायिता। तस्मात् गते किराते अस्मत्सखी मूर्छामुपागम्य भूमौ पपात। तदा तां याने उपावेश्य वियद्राजगृहङ्गताः स्मः। स नृपः तां वीक्ष्य रुरोद। रुदन्तं राजानं वीक्ष्य सुराचार्यः कश्चन मूर्छोपशमनार्थम् एकादशवाररुद्राभिषेकं कर्तुमादिदेश। तदर्थं वयमत्र अगस्त्येश्वरमन्दिरमागताः।' इत्युक्त्वा 'त्वं का? तव का प्रवृत्तिः? अत्र किमर्थमागमनमभूत्? सर्वं वदत्वि'ति अपृच्छन्। तदा वकुलामाता 'अहं श्रीवेङ्कटशैलधाम्नः दास्यस्मि। तदाज्ञया अहमत्र आगतास्मि। राजपत्न्यास्सविधे मम कार्यं वर्तते।' इति भणित्वा कन्याकाभिस्सह प्रियमाभाष्य तत्स्नेहमासाद्य ताभिस्सह तत्रैव अवर्तत।

पञ्चमस्तबकः – एवङ्गतायां वकुलायाम् अविश्वस्य श्रीहरिः विप्रश्निकावेशं धृत्वा तं राजधानीमगच्छत्। सर्वे राजपत्नीं धरिणीदेवीं विप्रश्निकावृत्तान्तमाचख्युः। धरिणीदेवी तामाहूय पद्मावतीवृत्तान्तं पप्रच्छ। तदा विप्रश्निकावेशरूपी भगवान् 'ह्यः कमपि स्मराकारं पुरुषं वीक्ष्य कामज्वरपीडिता सा मुमोह। अतः भवद्दुहितुः अङ्गशोषणमभवत्। तच्छान्त्यर्थं तस्मै पद्मावती देया।' इत्युवाच। तदा धरिणी 'कस्मै अपरिचिताय देया सा मत्पुत्री। सः को वास्ति? तस्य कुलं सकलं वद देवि!' इति विप्रश्निकां विप्रश्नमकरोत्। तदा सा पुलिन्दवनिता 'सः वैकुण्ठवासी, हरिरेव साक्षात्, वेङ्कटशैलादिहागतः, श्रीनिवासाभिधेयः, विद्वान्, विवेकी, धनवाँश्च वर्तते। तस्मै भवत्पुत्री प्रदेया। अन्यथा दिवसैकमात्रेण सा मरणं प्राप्स्यति।' इति प्रत्युवाच। तच्छ्रुत्वा भीतां रुदन्तीं राज्ञीं प्रति पुनः 'अयाचिताय इयं कथं प्रदेया इति मा बिभिहि। घटिकोत्तरेण काचित् सुवृद्धा अबला इहागमिष्यति। पद्मावतीं याचिष्यते। मद्वाक्ये विश्वासपरा भव त्वम्। व्रजाम्यहं मत्पतिसन्निधानम्।' इत्यक्त्वा सा उत्तरस्यां दिशि ययौ।

In Public domain. Digitization Muthulakshmi Research Academy

षष्ठस्तबकः – अथ खिन्ना सती राज्ञी पुत्र्यास्सदनं प्रविष्य वृत्तजातं पर्यपृच्छत्। 'हा स्त्रीणां कष्ठम्' इति मनसि भयाकुला पुत्री पद्मावती उद्यानवने सञ्जातं वृत्तं न्यवेदयत्। एतदन्तरे स्रग्चन्दनैः शिवं समर्च्य अगस्त्यालयात् समागतः राजा राजपुरोहितैः समवेतः अभिषेचनप्रसादं पुत्र्यै सम्मार्जनपुरस्सरं वितारयामास। तैस्सहैव स्थितां वकुलां दृष्ट्वा धरिणी विप्रश्निकावचनं स्मृत्वा तया सह बभाषे। 'अद्य किमर्थमत्रागमनं तवाभवत्। किमस्ति कार्यं वद मातः।' इति पप्रच्छ च। 'कन्यापेक्षामुख्यकार्यार्थमागमनमभवत्' इति प्रोवाच वकुला। तच्छ्रुत्वा प्रहर्षेण धरिणी 'को वा वरः? कश्च निवासदेशः? कौ तस्य मातापितरौ? वयः किम्? किं गोत्रम्? किमु तच्चरित्रम्? कीदृक्प्रवृत्तिः? वद देवि शीघ्रम्' इति तां प्रत्यपृच्छत्। तदा सा वकुलामाता 'हिमरश्मिकुलीनाः देवकीवसुदेवौ तस्य पितरौ, वशिष्ठगोत्रं, श्रवणं च नक्षत्रं, नाम्ना कृष्ण इतीरितः, साम्प्रतं वेङ्कटशैलधाम्नि विराजते। स च विद्यावान्, धनवान् वाग्मी रूपवान् गुणसम्मतः, विवाहकालयोग्यः पञ्चविंशवर्षीयः वर्तते।' अपि च 'पुरा बाल्ये एव समुद्रपुत्र्या रमया सह विवाहः कृतः। अपत्यत्वमवेक्ष्य पुनः द्वितीयां वोढुमैच्छत्।' इति प्रत्युवाच। तदाकर्ण्य धरिणी राजानं निवेद्य 'अस्मत्पुत्रीं श्रीनिवासाय प्रदद्महे।' इत्युवाच। तदा आकाशराजः शुकमुनेः देवगुरोः बृहस्पतेश्च अनुमतिं प्राप्य पाणिग्रहणं कर्तुं निश्चिचाय। बृहस्पतिश्च तयोः ग्रहगतिं, उभयोः बलैक्यं, नक्षत्रयोगं, ऋषिगोत्रयोगं, योनिनाडीराशिकूटादिकं सर्वं विचार्य अनुज्ञां प्रायच्छत्। आकाशराजोऽपि 'वैशाखशुक्लदशम्यां भृगुवासरे रात्रौ शुभग्रहयुते शुभदे सुलग्ने' पद्मावतीश्रीनिवसयोः उद्वाहः भवतु इति श्रीकल्याणमहोत्सवाह्वानपत्रिकां व्यालेखयत्।

In Public domain. Digitization Muthulakshmi Research Academy

सप्तमस्तबकः – पतगपतिः श्रीपतिः स्वोद्वाहार्थं सर्वान् देवान् सपरिवारश्चाह्वातुं वसन्त–गरुडौ च प्रेषयामस। आह्वानमुररीकृत्य भारतीसमेतः भाषापतिः, रुद्रश्च अद्रिजासमेतः षण्मुखगजमुखप्रमुखप्रमथगणैस्सह च, देवाधिपतिः इन्द्रश्च शच्या सह, जलपतिः सजायस्सधनपरिवारस्सन्, अग्निहोत्रः स्वाहा–स्वधाभ्यां सह, प्रेतपतिः स्वदूतैश्चित्रगुप्तादिभिस्सह, त्रिदशेशः पुलोमजया सह त्रयस्त्रिंशत्कोटिदेवताभिस्समेतश्च, चन्द्रसूर्यौ सग्रहौ, मन्मथश्च रतीसमेतः, कश्यपादयः सप्तर्षयः सग्रहैस्सह, अन्ये देवगन्धर्वनागयक्षादयः पुत्रकलत्रपरिवारसमेताः श्रीपतेः कल्याणार्थं समायाताः। तदा श्रीपतिः पौरोहित्ये वसिष्ठं, सुरपतिं मुनीनां याजमान्ये, पार्वतीशं शरवणभवञ्च देवताह्वानकार्ये, वह्निं पाके, सुगन्धे पवनम्, यमं दण्डने, उदकेशं प्रत्युत्थाने, अलकेशं धनव्यवहारे नियोजयामास। अपि च प्रदीपकर्मणि चन्द्रम्, भाण्डशुद्धौ वसून्, ग्रहान् द्रोणपात्रग्रथने संयोजयामास। सर्वे सुराः भगवतः निर्देशमनुसृत्य स्वस्वकृत्येषु स्वस्था अभवन्। रमारहितं श्रीनिवासं खिन्नं दृष्ट्वा तद्धेतुञ्च विज्ञाय विधिः भानुमन्तमाहूय रमामाह्वातुमप्रेषयत्। रमापि संवृत्तं वृत्तं सर्वमाकर्ण्य मनसा श्रीनिवासस्य पद्मावत्या सह उद्वाहार्थमनुमतिं ददौ। सा एव तैलाभ्यञ्जनादिवैवाहिकपूर्वकृत्यानि ससन्तोषं विधाय सुराङ्गनाभिस्सह आरातिकां चकार। सर्वाणि सुभूषणानि कुबेरं प्रति याचयित्वा रमा रमेशं समभूषयत्। ततः सङ्कल्पविधिपूर्वकं पुण्याहवाचनं ततः शमीशाखोपशोभितकुलदेवताप्रतिष्ठापनादिकं सम्पूर्णं समकरोत्।

तत इदानीं गगनपुरीं प्रति गन्तुमुद्युक्ताः सर्वे। सपदि विधिः 'सर्वे क्षुदार्ताः खलु बालवृद्धाः कथं हि गन्तव्यमभोजनेन' इति उवाच। तच्छ्रुत्वा भगवान् तत्क्षणमेव यक्षपतिं कुबेरमाहूय श्रीस्वामितीर्थस्य पश्चिमतटस्थ-अश्वत्थमूलं प्रविश्य तत्र सुराध्यक्षविरूपाक्षयोस्समक्षं ऋणमयाचत।

In Public domain. Digitization Muthulakshmi Research Academy

विधीशसाक्षी ऋणस्य पत्रं विलिख्य कुबेराय ददौ। कुबेरश्च 'निष्काणां राममुद्राणां स्वर्णानाञ्च चतुर्दशलक्षम्' अर्थराशिं प्रददौ।

तेन धनेन धनेशः वैवाहिक-शुभकार्यपूर्त्यै अपेक्षितं तण्डुल-प्रस्थराशीन् माष-मुग्ध-चणक-गोधूमादीन् तिल-जीर-हिङ्गु-मरीचि-मेथिकादीन् तैलाज्य-क्षीर-दधि-मधु-गुड-शर्करादीँश्च तत्क्षणमेव आनीय पाकार्थं पावकं नियुङ्क्ष्वेति भगवन्तं विज्ञापयाञ्चकार।

तदा पावकः स्वामिसरसि अन्नं, अघविनाशिन्याञ्च सूपं, सुवर्णनद्यां सगुडं परमान्नं, सद्देवतुम्बाख्ययोः शाकं, श्रीपाण्डुतीर्थे आम्लकस्य रसं, अन्यासु सरस्सु भक्ष्याणि, लेह्य-पेय-चोष्याणि निर्ममे। समुद्रमारभ्य अहोबिलं यावत् समाहूतान् पङ्क्तौ उपावेश्य भोजनं परिवेषयामास। रात्रौ सर्वे अतिथयः तत्रैव सुखं शिश्यिरे।

अष्टमस्तबकः – ततः परेद्यवि उषस्युत्थाय गन्धर्व-महोरग-किन्नर-किम्पुरुषाप्सरस-सिद्ध-चारण-साध्यगणस्सकल ऋषि-मुनि-द्विज-पुङ्गवाश्च-आबालवृद्धजनास्सर्वेऽपि स्त्रियश्च सर्वास्सपरिवारास्सपरिकरा धृतस्त्रास्त्रकराश्शूराश्च गजाश्वरथशकटादिभिः आरूढस्सन्तः केचित्पादचारिणोऽपि वियन्ननृपपुरं ययौ। धरिण्यासहितः आकाशराजः पद्मवतीं पुरतः निधाय अमूल्यस्रग्वस्त्राभरणादिभिः अनेकदिव्यसुगन्धद्रव्यैस्स्तैलैश्च श्रीनिवासस्य दिव्यं स्वागतं विधाय परिवारसहितः शनैश्शनैः नारायणपुरे समन्तात्सञ्चारयामास। तत्रैव रात्रौ सर्वे भूरिभोजनं विधाय सुखं सुषुपुः। दशम्यां भृगुवासरे सायाह्ने श्रीनिवासः आकाशराजभवनं ययौ। तत्राकाशराजः धरण्यासमेतः मुक्ताजालैःरलङ्कृतां चतुस्तम्भां रत्नवेद्यां जगन्नाथं अधिष्ठापयामास। ब्रह्मघोषयद्भिः ब्राह्मणैः मन्त्रमुच्चरद्भिः विधिवत्सङ्कल्प्य श्रीनिवासाय कन्यादानं अकरोत्।

In Public domain. Digitization Muthulakshmi Research Academy

निष्ककोटिधनराशिम् अमूल्यहैमं शतभारभारं सद्वज्ररत्नमकुटं वरदक्षिणारूपेण प्रायच्छत्। 'माङ्गल्यं तन्तुनानेन लोकरक्षणहेतुना कण्ठे बध्नामि शुभके आसूर्यचन्द्रतारकम्' इति मन्त्रमुच्चरन् माङ्गल्यसूत्रं पद्मावतीकण्ठे आबबन्ध। ततो अनन्तरकर्तव्यानि वैवाहिककार्यकलापानि सर्वाणि भवगवद्वसिष्टगुरुपुरोहिताभ्यां विधिवत्सम्पूर्णं कृत्यान्यभूवन्। एवं दिनचतुष्टयमदृष्टपूर्वं श्रीशस्य कल्याणमहोत्सवं महद्वैभवोपतम् अवाङ्गानसगोचरम् अभूत्। महोत्सवं तं त्वनुभूय विधीशपूर्वाः देवताः ऋषिमुनिसत्तमाः आकाशराजसत्कृताः स्वकं स्थानं ययौ। षण्मासावधि-नूतनवधूवरौ प्रर्वतारोहणं न कर्तव्यमिति शास्त्रमनुसृत्य तत्रैव अगस्त्याश्रमे निवासमकरुताम्।

नवमस्तबकः – अथैकस्मिन् दिने गगनराजदूतः कश्चन आगत्य पद्मावतीं समेत्य 'हे मातः! तातपादस्तव भूमि–पतितस्सन् श्वासमात्रावशिष्ठः तव सन्दर्शनोत्सुकः त्वामेव नित्यं प्रलपन् मृत्युद्वारसंविष्टः वर्तते। शीघ्रं देवेन माधवेन समं ध्रुततरमागत्य पितरम् ईक्षताम्' इत्यवादीत्। तद्वाक्यमाकर्ण्य पद्मावती भूमौ पपात। पुनः प्रतिबुध्य भर्त्रा माधवेन वकुलया च सह नारायणपुरं ययौ। पद्मावतीश्रीनिवासयोरागमनं ज्ञात्वा किञ्चित्संज्ञायुतः स राजा स्वभ्रातरं पुत्रं च त्राहीत्युक्त्वा श्रीनिवासस्य करे ददौ। भार्यां धरिणीं स्वलोकगमनाय समादिश्य स्वप्राणान् तत्याज। श्रीधवस्तदा सभार्यस्य आकाशभूमिपस्य ब्रह्ममेधासंस्कारपूर्वकाणि प्रेतकार्याणि विधिवदकारयत्। मृते राज्ञि, अगस्त्याश्रमं गते रमेशे सति राज्यार्थं आकाशराजतनयस्य आकाशराजभ्रातुश्च मध्ये कलहस्समारब्धः। 'ज्येष्ठे मृते कनिष्ठस्य ममैव राज्यमि'ति तोण्डमान्, 'मत्पित्रा पराक्रम्य समार्जितं राज्यं ममैवे'ति नृपात्मजोऽपि युद्धार्थं संसिद्धौ भूत्वा 'यस्य जयः तस्य राज्यमि'ति समयं चक्रतुः। 'युध्दे सहायं कुरु' इति प्रार्थयन्तौ रमेशं निकषा युगपत्समेतौ।

In Public domain. Digitization Muthulakshmi Research Academy

पद्मवतीम् अगस्त्यश्च पर्यालोच्य यथार्हं राज्यं समं विभज्य कलहं प्रतिरुध्य सख्यं च कारयित्वा स श्रीनिवासः तस्मादगस्त्यनिलयं ययौ।

दशमस्तबकः – अथैकदा तोण्डमान् श्रीनिवासं मेलितुं समायातः। भक्त्या बहुधा च स्तुत्वा तोण्डमान् तदन्तिके विरराम। रमेशस्तदा 'अहमात्मानं भाग्यवन्तं मन्ये। कीर्तिशेषः त्वद्भ्राता गिरिगह्वरवासिने मह्यम् अविचार्यैव स्वप्रियनन्दिनीं पद्मावतीम् अदात्। सोऽप्यद्य दिवङ्गतः। साम्प्रतं वासार्थं तव दुहितुः अद्य भवनं न विद्यते। त्वज्जामाताहं परमन्दिरे वसतीत्येषा अपकीर्तिः महदसोढा भवताम्। तस्मात् मे शुभदं भवनमेकं त्वया कार्यम्।' इति न्यवेदयत्। तदाकर्ण्य तोण्डमान्राजा शुभतिथिवारनक्षत्रयुते समुहूर्ते कमलावकुलाभ्यां सह शेषाद्रिमारुह्य स्वामिपुष्करिणीतीरे श्रीमद्वराहस्वाम्यनुमतेन स्वनिलयस्थलं प्रादर्शयत्'। भगवदाज्ञामनुसृत्य स नृपतिः अनल्पकर्मप्रवीरेण विश्वकर्मणा सम्यग्विचित्र-विविधरत्न-चित्रितम् अवर्ण्यकलशवरेण्यविलसितं चतुर्मूर्तिसमोपेतं वैनतेयविभूषितं महदद्भुतोन्नतमनुपमानविमानम्, अपि च आस्थानमण्टप-यागमण्टप-कल्याणमण्टपयुतं शृङ्गारगोपुरयुगेनसमं महत्त्रिप्राकारभूरिपरिवेष्ठितं सप्तप्राकारपरिवृतं घनदेहलीभिः संराजितं दिव्यं भव्यं च मन्दिरमेकं निरमापयत्। किञ्च गतागतभक्तजनानाम् अनायासेन आरोहावरोहणाय योजनविस्तीर्णं मार्गं ससोपानं च कारयामास। ततस्स्वयं गत्वा भगवन्तं श्रीपतिं भक्त्या मन्दिरं प्रवेष्टुं प्रार्थयामास।

तस्य भक्त्या प्रतोषितः श्रीमान् श्रीपतिः देवैश्चेन्द्रपुरोगमैः ऋषिवरैर्वैखानसैर्ब्राह्मणैः, ऋक्सामागमगायकैर्विधिमुखैर्वेदोक्तमन्त्रैस्तुतं, भेरीदुन्दुभितूर्यवाद्यनिकरैस्सङ्घोषयद्भिर्दिशः पद्मालयां पद्मवरासनस्थां पद्मावतीं वक्षसि धारयित्वा सुन्दरमन्दिरे प्रावेशयत्। कलौ नराणामिदमेव सर्वं परम्पदं

In Public domain. Digitization Muthulakshmi Research Academy

सद्गतिरेतदेवेति च दक्षिणेन पाणिना प्रदर्शयन्, स्वपादपद्मं भजतां नराणां भवाम्बुधिः एतदेव इति कटिस्थहस्तो सन्दर्शयन् विराजते वेङ्कटशैलनाथः। 'प्रतिवर्षं ध्वजारोहणमारभ्य रथोत्सवं यावत् मे उत्सवं नयनोत्सवं कुरु' इति च तोण्डमान्राजनम् आदिदेश। ततस्तोण्डमानपि भगवतः निदेशमनुसृत्य त्वरितगतिकान् दूतान् प्रेषयित्वा सकलदेशस्थदेशपालानाहूय उत्सवान् आचचार। ततः प्रभृति महद्वैभवोपेतमुत्सवमेतं ब्रह्मोत्सवमिति कीर्तयन्तः आचरन्तः सन्ति।

उ. धन्यवादसमर्पणम् –

इयं परियोजना केन्द्रियसंस्कृतविश्वविद्यालयस्य अनुदानेन प्रवर्तते। परियोजनायाः अस्याः आवाम् अनुसन्धाताराविति आत्मानं धन्यौ मन्यावहे। ईदृगवसरं दत्तवते परिषन्निदेशकाय आचार्याय नीलकण्ठवर्याय आदौ कार्तज्ञं विन्दावहे।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतये, कुलसचिवाय, परियोजनायाः अधिकारिभ्यः नमोवाकान् वितरावः। उस्मानियाविश्वविद्यालयस्य कुलपतये, कुलसचिवाय च आधमर्ण्यं प्रकटयावः। अमूल्यां कृतिमिमां परिचयाय सहकृतवद्भ्यः सर्वेभ्यः कृतज्ञतां समर्पयावः। संस्कृतपरिषदः सहकारिसदस्येभ्यः धन्यवादान् विदध्वः।

इत्थं बुधजनविधेयौ परियोजना अनुसन्धाता–उपानुसन्धातारौ

डा.विरिवेण्टि सुब्रह्मण्यम्, उपनिदेशकः

डा.जोशी सन्तोषकुमारः, शोधसहायकः

षष्ट्यब्दग्रन्थमालापराख्या दुर्लभग्रन्थपुनर्मुद्रणपरियोजना

In Public domain. Digitization Muthulakshmi Research Academy

विषयानुक्रममिका

- Preface v-viii
- श्रीवेङ्कटेशचम्पूप्रबन्धः सर्वस्पृहणीयः ix-xvii
- प्रस्तावना xix-xxxvii
- प्रथमस्तबकः 1-14
- द्वितीयस्तबकः 15-28
- तृतीयस्तबकः 29-43
- चतुर्थस्तबकः 44-54
- पञ्चमस्तबकः 55-62
- षष्ठस्तबकः 63-79
- सप्तमस्तबकः 80-99
- अष्टमस्तबकः 100-112
- नवमस्तबकः 113-122
- दशमस्तबकः 123-135

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

ब्रह्मश्रीः पेरुमाण्ळाचार्यकविना विरचितः

श्रीवेङ्कटेशचम्पूप्रबन्धः

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

श्रीहयग्रीवाय नमः

ग्रन्थारम्भः

लक्ष्मीर्वक्षसि यस्य वीक्षणकृपालक्ष्यान्स्वपक्षाश्रितान्
कर्तुं तिष्ठति रक्षकस्य जगतः कारुण्यपूर्णेक्षणा।
यद्भ्रूत्क्षेपपरिक्षणात्ततमिदं सर्वं समारक्षितं
साक्षाच्छ्रीरमणस्सदा स भगवान्क्षिप्रं मुदा पातु नः ॥ 1 ॥

कौण्डिन्यगोत्रशतपत्रपवित्रमित्रं
श्रीवेङ्कटाबिधसुधीवरपुत्ररत्नम् ।
श्रीमन्नृसिंहकरुणार्द्रकटाक्षपात्रं
श्रीकृष्णमार्यमनघं गुरुमानतोऽस्मि ॥ 2 ॥

वेदान्तभाष्यभगवद्विषयैकतत्त्व-
सिद्धान्तसिद्धविषयैकमनःप्रवृत्तिम् ।
काव्याद्यनेकरचनाचतुरात्मशक्तिं
श्रीकृष्णमार्यमनिशं शिरसा नमामि ॥ 3 ॥

श्रीशादिनाथमुनियामुनमध्यमास्म-
दाचार्यवर्यपर्यवधिदेशिकवर्यजातम् ।
ध्यात्वा तदीयकृपया वरवेङ्कटेश-
चम्पूप्रबन्धरचनामधुना करोमि ॥ 4 ॥

श्रीवेङ्कटेश चरितामृतसिन्धुधारा
चम्पात्मिका विलसतीयमिहैव भूमौ ।

In Public domain. Digitization Muthulakshmi Research Academy

गम्भीरभावरसपूरितगद्यपद्या-
तत्पादभूरिव सदा बुधमोदमाना: ॥ 5॥

एतत्प्रबन्धरचना चतुरात्मशक्तिः
कुत्रास्ति मेऽहमिहचास्मि निमित्तमात्रम् ।
स्वप्नेऽवतीर्य भगवान्मम वेङ्कटेशः
मामाह यत्तदिह तत्करुणैव कर्त्री ॥ 6॥

(कथारम्भः)

पुरा तु सर्वे घनकश्यपादयो
ऋषीश्वरास्सन्मुनयश्च सद्विजाः ।
समेत्य गङ्गातटिनी तटेऽमले
महाक्रतुं कर्तुमलं समुद्यताः ॥ 7॥

तत्रान्तरे खतलात्कुतलमापतन्तं महादीप्तिविद्योतितसकल-दिगन्तं कमपि तेजःपुञ्जं, किमेतदित्याश्चर्येण मुहुर्मुहुर्दृष्ट्वाथास्मद् उपक्रमितक्रतौ स्वकीयहविर्भागहरणाय स्वयमेव साक्षात्समागच्छति हरिः किंवेत्युत्प्रेक्षमाणे अखिलऋषिमण्डले सत्यविलम्बेन, क्रमक्रमात्तत्र भगवान्परमहर्षस्सुरमहर्षिरिवमवततार॥8॥

रणद्वीणागानप्रतिरणितदिग्भूः कलहभु-
ङ्गुनिर्गायन्नारायणगुणान्तान् श्रुतिसुखम् ।
प्रदीप्तश्शुद्धस्फाटिकमणिवदाभासिततनु-
स्तपोराशिः प्रायादृषिगणसमेतं क्रतुपदम् ॥ 9॥

In Public domain. Digitization Muthulakshmi Research Academy

तदातद्विधमागतं तपस्तेजोविराजितं महान्तं नारदमहर्षिम् आलोक्य, अत्यन्तानन्दभरितस्वान्तास्सर्वास्तत्रत्य-ऋषिकान्ताः तदानीमेव तस्मै प्रत्युत्थानादिपुरस्सरसत्कारं कुर्वत्यः कृतकृत्यास्सत्यः स्वयज्ञकार्यसम्भारसमीकरणव्यग्रचित्ता अभूवन्।।10।।

स तत्र मार्ताण्डमयूखमण्डल-
प्रकाशमानं ऋषिमण्डलं भृशम्।
विलोक्य कर्तुं क्रतुमुद्यदुत्सुकं
उवाच वाचं सुरमौनिरेवम्।। 11।।

किमेतदापात[1]मये मुनीन्द्राः
को वाऽध्वरः कः फलमस्य भुङ्क्ते।
कं देवमुद्दिश्य कृतं च को वाऽ-
ध्वर्युश्च होताऽत्र च देवताः काः।। 12।।

इति ब्रुवति नारदे विगतचेतसस्तापसा-
स्ततोऽतिशयसंशयं हृदिगता नताङ्गा भृशम्।
समेत्य कथमत्र तत्खलु विचारणीयं द्रुतम्
इति क्रतुविदांवरं भृगुमुनिं तदा तं जगुः।। 13।।

आसन्नसन्देहमपोहितुं नः
कार्ये भवानेव समर्थ एकः।
सुरोत्तमं वेत्तुमतस्त्वमादौ
प्रयाहि मौने परमेष्ठिगेहम्।। 14।।

1) अपातं नाम उपक्रमितुं, आरम्भितमित्यर्थः।

In Public domain. Digitization Muthulakshmi Research Academy

इति सविनयपूर्वं व्याहृतं तैर्निशम्य
द्रुततरमधिगच्छन्मन्दिरं कञ्जजस्य[1]।
सततकुतुकयुक्तं ध्यानयोगानुरक्तं
अतुलितमहिमानं वाक्सतीशं[2] ददर्श ॥ 15 ॥

तत्र विचित्रतर-मित्रकर-विस्तृतसहस्रपत्रासनाधिरूढं, गाढं, चतुरचतुरास्यसमुद्भूतपूतवेदगीतोपशोभितं, साक्षात्सरस्वत्यादि-सतीभिरनुसेवितं, सकलदिक्पालकबृन्दवन्दितचरणारविन्दं, नवरत्न-स्थगितप्रतप्त हाटककिरीटकटककेयूरशृङ्गारहारनूपुराङ्गुलीयकप्रकाण्ड-मरकतमणिमयकुण्डलमण्डितं, महादीप्तिविद्योदितदिक्प्रान्तं, सदा सर्वजगत्कारणनारायणचरणारुणारविन्दध्यानैकपरायणं, सृष्टिकर्तारं ब्रह्माणं भक्तिभावेन नत्त्वा, सः तस्य निकाये निकामं स्वकायं पातयामास ॥ 16 ॥

शेषाद्रिनाथचरिताद्भुतनाटकस्य
प्रारम्भपात्रमिव तं परिदृश्य मौनिम् ।
मौनं दधौ महिलया सह पद्मपीठे
ध्यानानुषङ्गधिषणो द्रुहिणस्सतोषः ॥ 17 ॥

तदा महान्तं पतितं समीक्ष्य
नोवाच किञ्चिद्वचनं विधाता ।

---

1) कं - जलं, जले जातं = कञ्जः पद्मं, कञ्जे पद्मे जातः - कञ्जजः नाम पद्मभुवः ब्रह्मणः इत्यर्थः, तस्य ब्रह्मणः।
2) वाचां सती वाक्सती - वाक्सत्याः ईशः वाक्सतीशः - ब्रह्मा।

In Public domain. Digitization Muthulakshmi Research Academy

तं किञ्चिदज्ञानवृतं च मत्वा
ऋषिर्ययावीशगिरिं[1] सरोषः ।। 18 ।।

स तत्र कैलासगिरिं विचित्र-
मासाद्य कामं गिरिजासमेतम् ।
क्रीडन्तमेकान्ततले शयानं
प्रकामुकं कामहरं ददर्श ।। 19 ।।

तदागतं सा गिरिजा समीक्ष्य
मुनिं स लज्जाऽवददात्मनाथम् ।
त्यजेश शीघ्रं भगवन्प्रकामं
को वागतोयं मुनिरत्र वेगात् ।। 20 ।।

इतीरितं तद्वचनं निशम्य
प्रवृद्धकोपोज्ज्वलदग्निनेत्रः ।
तं हन्तुमभ्यद्रवदुग्रवेगात्
स तत्क्षणं दक्षमिवाक्षिपादम्[2] ।। 21 ।।

तथैवात्यन्तदुर्भरार्भाटाविर्भूतमहदुज्ज्वलज्ज्वालामालाकुल-प्रलयानलमिव दुर्धर्षं प्रकर्षामर्षवेगात्स्वसमक्षमाक्षिपन्तं तं, विरूपाक्षं क्षणादेव स्वरक्षणाय पादाक्षतापसाध्यक्षोऽपि, दुरापशापशरप्रयोगं कुर्वन्नेवं निराकरोत् ।। 22 ।।

शशाप शम्भुं स ऋषिस्तदा त्वं
लोकैस्समस्तैरपि नैव पूज्यः ।

1) ईशस्य गिरिः ईशगिरिः तमीशगिरिं = परमेश्वरस्य स्थानं कैलासमित्यर्थः ।

2) अक्षिपादं नाम अक्षिः पादे यस्य सः अक्षीपादः तं भृगुमित्यर्थः ।

In Public domain. Digitization Muthulakshmi Research Academy

लोके भवल्लिङ्गसमर्चनेन
गमिष्यसि त्वं सततं प्रसिद्धिम् ।। 23 ।।

इत्युक्त्वा तदाऽलब्धकार्यस्स ऋषिरतिभीषणरोषकषायितेक्षिणः क्षणादेव विलक्षणलक्षणोपेतमगणितमणिगणखचितहिरण्मयाभ्युन्नतप्राकारानेकपरिशोभितं, नवरत्नपरिष्कृतकलधौतकलशोपेतशृङ्गारानेकभूरिद्वारनवतोरणमण्डितं, विपक्षदुर्लक्ष्यं चतुर्दिक्षु चतुर्द्वारपालकैरनुपालितं, युगपदुत्थितभास्वत्कोटिसमानभासुरं, वाचामगोचरं हरिमन्दिरं प्रविश्य तत्रत्य विचित्रतरविशेषशेषपर्यङ्कशायिनं साक्षाल्लक्ष्मीसमेतमशेषलोकशरण्यं देव-वरेण्यं विष्णुं ददर्श, तदानीम् ।। 24 ।।

भृगुमुनितिलकस्य ब्रह्मलोकं गतस्य
विधिकृतविमुखत्वात्क्रोधवह्निः प्रजातः ।
तदुपरि हरकृत्याद्वर्धितश्शौरिधाम्नि
निरवधिहविषेवासिञ्चितः प्रोज्वलोऽभूत् ।। 25 ।।

किमेतदहो सृष्टिस्थितिलयाधिकारिणामपि मूर्तित्रयस्येयं चेष्टा निकृष्टा खलु ।। 26 ।।

अखर्वगर्वः कमलासनोऽपि
स तत्र नोवाच पुरस्थितं माम् ।
तथैव मां हन्तुमियाय रुद्र-
श्श्रियासमेतोऽत्र हरिश्च शेते ।। 27 ।।

इत्युक्त्वाऽत्युग्रक्रोधपरवशस्सन्युक्ता -
युक्तविवेकरहितो मुनिरेवं विधमाचकार ।। 28 ।।

In Public domain. Digitization Muthulakshmi Research Academy

ततांड वक्षस्युरु-विक्रमन्तं
भृगुर्हरिं[1] पेरु[2]रिवाङ्घ्रिणोऽग्रम् ।
स ताड्यमानोऽपि विहाय कोपं
मुदा समुत्थाय मुनिं निषेवे ॥ 29 ॥

पपात भक्त्या ऋषिपादपद्मे
प्रेम्णाऽलिलिङ्गाथ मुनिं प्रभाषे ।
तवाङ्घ्रिपद्मस्य ममाङ्गसङ्गा-
द्गतं कियद्दुःखमहं न जाने ॥ 30 ॥

इति ब्रुवन्तद्द्विजपादपद्मं
प्रक्षाल्य चोष्णोदकसेचनेन ।
दधार भक्त्या शिरसा तदम्बु
विडम्बयन् स स्वसमस्तलोकम् ॥ 31 ॥

भृगोः क्रमादुत्थितभीष्मरोषः
तोषश्च मायायुगपद्विशेषः ।
वैकुण्ठलोके हरिणा तथैव
विनिर्गतोऽभूद्विधिना कृतेन ॥ 32 ॥

तमनन्तरमनन्तरमणीयकल्याणगुणचणैकनिलयस्सर्वज्ञः सर्वजगन्नियामकोऽपि भगवन्नारायणः परमादरेणात्यन्तसुधारसभरितैः इव मृदुमधुरालापैस्तं विलासयन्तद्गर्वनिर्मूलनाय सकलसम्पच्छक्ति-जनकं तत्पादतलगतविलोचनं परिमृज्य करतलाङ्गुष्ठेन व्यनाशयत् ॥33॥

1) हरिं नाम सिंहं, विष्णुं च । 2) पेरुः नाम जम्बुकः।

In Public domain. Digitization Muthulakshmi Research Academy

तदविज्ञाय तत्कृतसत्कारेणामन्दानन्दभरितस्वान्तस्सप्रहर्षरोमवर्षिस्त्वरितगमनस्सुमनाः प्रविश्य, दृश्यमानकश्यपादिमुनिकूटं यज्ञवाटं तत्रत्यानेकऋषिगणान्प्रति सर्वोत्तमोत्तमसाक्षादधोक्षज इत्येवमबोधयत्।।34।।

ततो ब्रह्मा ततो रुद्रस्तत इन्द्रस्ततस्सुराः ।
एवं ज्ञेयं तारतम्यं भवद्भिश्च सदा क्रतौ ।। 35 ।।

इत्येवं बोधयित्वा सभृगुमुनितिलकस्स्वयं सक्रमं तन्त्रिविक्रममुद्दिश्य सम्यगुपक्रमितं क्रतुवरं तदर्पणपूर्वकं सर्वमकारयत् (एवं स्थिते वैकुण्ठे तु) ।। 36 ।।

यदाग्रजन्माऽशुसुसत्कृतोऽगात्
कृतापराधोऽप्युरुविक्रमेण ।
तताऽकुलाश्रीः कमलालया सा
विलोकयन्ती पतिमेवमूचे ।। 37 ।।

सन्ताडितोऽसि मुनिनाऽवरजन्मनैवं
पादेनमेत्य परिरम्भणयोग्यभागे ।
मां बाधते परिभवः परितोऽयमीश
तस्मादहं तु करवीरपुरं प्रयामि ।। 38 ।।

इत्येवमेव कलहं हरिणा तु प्रेम्णा
कृत्वा रमाऽथ करवीरपुरं जगाम ।
यत्र स्थले परिभवः परिजायते हि
तत्र स्थले तु वसनं न सुखाय भूरि ।। 39 ।।

In Public domain. Digitization Muthulakshmi Research Academy

यदा गता सा श्रीदेवी तदा श्रीरहितो हरिः ।
अष्टाविंशतिसंख्याके द्वापरान्तेकलौयुगे ।। 40 ।।

यस्मिन्देशे यथा प्रेमकलहोऽस्याः प्रशाम्यति ।
कर्मणा येन च यथा तत्तथा च करोम्यहम् ।। 41 ।।

एवं सङ्कल्प्य गोविन्दो लीलामानुषविग्रहः ।
वैकुण्ठं परमानन्दं त्यक्तवानुत्तमोत्तमम् ।। 42 ।।

गङ्गातटिन्यादिशि दक्षिणस्यां
शतत्रये योजनकस्य दूरे ।
अघौघनाशिन्यमृतप्रवाहा
सुवर्णपूर्वा मुखरीनदीन्धे ।। 43 ।।

या पुण्यदाऽगस्त्यनिषेविता श्रीः
शुकस्य पूर्वं वरदा बभूव ।
तस्यास्तटे चोत्तरगे चकास्ते
क्रोशद्वयार्धे वरवेङ्कटाद्रिः ।। 44 ।।

साक्षाच्छेषावतारः कनकगिरिसुतः शेषवायोर्विवादा-
त्सम्प्राप्तोऽसौ गिरीन्द्रः प्रथितसुचरितस्सर्वधातुप्रदीप्तः ।
दिव्यक्षेत्रप्रभावः कलिमललयकृत्सर्वतीर्थालवालः
श्रीमद्वैकुण्ठतुल्यः परमविभवयुक्छ्रीनिवासाधिवासः ।।45।।

श्री वेङ्कटाद्रिर्वदनं हि मध्यं
नृसिंहशैलस्त्वधपुच्छभागः ।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीशैलगोत्रस्सविराजतीर्थं
चैवाखिलक्षेत्रमयो गिरीन्द्रः ॥ 46 ॥

त्रिंशद्योजनमायतोऽस्य विदितस्स्याद्योजनानां त्रयं
विस्तीर्णे किमु वर्ण्यतेऽत्र विषमे चारित्र्यमत्यद्भुतम् ।
ब्रह्मेन्द्रादिमरुद्गणैश्च ऋषिभिर्यक्षैर्नरैर्वानरैः
सर्वैरप्यनुसेव्य एव तदिदं जन्मार्जितं स्यात्फलम् ॥47॥
पूर्वेत्वत्र कृते युगे सुरमुनिद्वेषी वृषाख्योऽसुरः
कृत्वा घोरतरं तपश्च बहुधा काले प्रसन्नं हरिम् ।
दृष्ट्वा तेन नियुध्य चान्त्यसमये तं सोऽपि वव्रे वरं
शैलस्यास्य ममाभिधास्त्विति तथाख्यातो वृषाद्रिस्ततः
॥48॥

पुराञ्जना केसरिणस्सुपत्नी
युगे द्वितीयेऽप्यनपत्यदुःखा ।
मतङ्गवाक्येन तपश्चरित्वा
सुतं प्रसूतात्र मरुत्प्रसादात् ॥ 49 ॥
मुनीश्वरास्तत्र समागतास्ते
तथाविधं तं हनुमन्तमाहुः ।
यतोऽञ्जना प्राप्तसुता बभूव
ततोऽञ्जनाशैल इति प्रसिद्धः ॥ 50 ॥
द्वापरे कलहे प्राप्ते वैकुण्ठेऽप्यथ वायुना ।
स्थापितोऽत्र सशेषेण तस्माच्छेषाचलं जगुः ॥ 51 ॥

In Public domain. Digitization Muthulakshmi Research Academy

एतद्भूस्पर्शमात्रेण वमितं माधवेन च।
अन्त्यजासङ्गजं पापं दग्धमत्र कृते युगे ॥ 52 ॥
वें पापं कटयते यस्मादघदाहनशक्तितः।
वेङ्कटाचल इत्येवं नाम देवास्तदोचिरे ॥ 53 ॥

कुन्दमन्दारबृन्दसुन्दरकरवीरभूरिशृङ्गारकदम्बकदम्बककुरवरकुरण्टकवकुलवञ्जुलमञ्जुलमालतीलतीवनमालिकाऽह्लादिकामल्लिकामतल्लिकावल्लिकानागपुन्नागपूगचम्पकचाम्पेयकेतकीस्वर्णकेतक्याद्यमितद्रुमततिभिर्विराजतः फलभरनम्रविशालशालारसालसालहिन्तालतालतमालमालाश्वत्थकपित्थखर्जूरनारिकेलसरलपनसप्लक्षोदुम्बरजम्भीरजम्बूगम्भीरदेवदारुचिञ्चाप्रमुखमहाद्रुमजालैः परिशोभितश्च, दिगन्तरव्याप्तनिरन्तरसुगन्धधवलचन्दनरक्तचन्दनकृष्णागरुप्रमुखैर्वासितश्च, कपोतपोतततिहंसक्षीरहंसकारण्डवाकीर्णः बककेकीकोकपिकशुकशारिकाद्यनेकपतगततिभिः परिवृतश्च, चमरीकस्तूरी मृगैर्वासितश्च, सिंहशार्दूलशरभक्रोडक्रीडत्कुरङ्गतुङ्गतुरङ्गमत्तमातङ्गजम्बुकभल्लुकतरक्षुखड्गमहिषिगणैस्सेवितश्चाप्येवं मनोहरः श्रीमान्पर्वतस्सर्वतीर्थसमन्वितः पुण्यकाननोऽयं वर्तते ॥ 54 ॥

अपि च तत्रागतं [1]माधवं वीक्ष्यायं गिरिवरश्श्रीमानमन्दाआनन्दसन्दोहान्मन्दं मन्दं किञ्चिद्विकचकोरकमन्दस्मितैरानन्दयन् अत्यन्तोत्फुल्लकुसुमतल्लजलोचनैरालोकयन् शुकशारिकामृदुरुत-वचनैः सल्लापयन् सर्वतस्स्रवन्विविधपरिमलपुष्परसैस्स्नापयन् कृष्णागरुभिः

१) माधवं नाम हरिं, वसन्तं च।

In Public domain. Digitization Muthulakshmi Research Academy

धूपयन् दिगन्तव्याप्तनिरन्तरपरिमलधवलचन्दनगन्धैर्विलेपयन् सम्यक्फलितमधुरसभरितविविधफलजालैर्निवेदयन्देदीप्यमानकिंशुकदीपैर्नीराजयन् मरन्दपानमत्तमधुपझुङ्कारनादमिश्रितपिककूजितपञ्चमप्रपञ्चितमधुरस्वरालापैर्गापयन् सर्वतः प्रसारितमालतीमल्लिकाकोमलताबाहुभिरादरेणाऽलिङ्गयन्निवास्ते ॥ 55 ॥

सुराश्च सर्वेतरवोऽत्र जाताः
मृगाश्चरन्त्यत्र ऋषीश्वराश्च ।
अटन्ति सर्वे पितरः पतङ्गाः
शिलास्थिताः किन्नरभूरियक्षाः ॥ 56 ॥

एतादृशस्य महिमातिशयस्य तस्य
तत्वन्त्वहीश्वर गिरेश्च हरेस्तथैव ।
जानन्ति नाब्जभवरुद्रमहेन्द्रमुख्याः
विन्दन्ति वाल्पमनुजादनुजाः किमेते ॥ 57 ॥

तस्योपरि महादिव्या स्वामिपुष्करिणी शुभा ।
विरजेव विराजन्ती स्वाश्रिताघापहारिणी ॥ 58 ॥

गङ्गादिपुण्यतीर्थानां पुण्यभूमिर्विराजते ।
तस्यां ये स्नान्ति मनुजास्ते धन्याः पुण्यशालिनः ॥59॥

आचुम्बितानन्तवनासमन्ता-
त्सर्वैश्च तीर्थोद्भववृक्षसङ्घैः ।
वैकुण्ठमत्रानयितुं विकुण्ठा
गतेव सा भाति विचित्रगीतिः ॥ 60 ॥

In Public domain. Digitization Muthulakshmi Research Academy

पुरात्र शङ्खाख्यनृपोऽपि कश्चि-
न्नारायणो नाम महीसुरश्च ।
स्नानप्रभावेण हरिं समीक्ष्य
नाकं हरेस्थानमवापतुस्तौ ॥ 61 ॥

तथैव रामोऽपि चरन्वनेषु सतीवियोगादतितप्तचित्तः ।
इहाऽगतोऽत्रैव निमज्जनेन अवाप सीतां दनुजेन्द्रनीताम्
॥ 62 ॥

ये स्नान्ति पितॄनथ तर्पयन्ति
श्राद्धादिभिस्तत्र नरा दिशन्ति ।
दानानि तेषां पितरस्तु तुष्टाः
नृत्यन्ति सर्वे निलयेऽपि शौरेः ॥ 63 ॥

पूर्वेतरस्यां दिशि भासतेऽस्या
आलिङ्ग्य धात्रीं धरणी श्रुतौ च ।
साश्वत्थवृक्षे हतदैत्यराजः
क्रोडस्वरूपी भगवान् रमेशः ॥ 64 ॥

गिरीन्द्रमेनं वरवेङ्कटाद्रिं
अवाप्य विष्णुर्भगवान्रमेशः ।
त्रिकोटितीर्थामलजन्मभूमिं
वैकुण्ठलोकादधिकं समेने ॥ 65 ॥

श्रीकान्त एकान्ततलं विशालं
स्वगूहनार्थं परितो विचिन्वन् -

In Public domain. Digitization Muthulakshmi Research Academy

न प्राप्य किञ्चित्स्वमतानुकूलं
इतस्ततस्तत्र चचार चारु ॥ 66 ॥

इत्थं विचार्यमाणे तु तत्रैव श्रीस्वामिपुष्करिणीदक्षिणतटस्थं तिन्त्रिणीवृक्षमूलस्थं विलक्षणादिदिव्यलक्षणविशिष्टमेकं नाकुवरम् आलोक्य इदमेव परमोक इति मत्वा, तस्मिन्नेव लीनोऽभवद्भगवान् चक्रपाणिः ॥ 67 ॥

॥ इति श्रीशिरशिनहलान्वयसञ्जात-कौण्डिन्यगोत्र-
श्रीमद्वेङ्कटाचार्यपुत्र-श्रीरङ्गमाम्बागर्भसम्भूत-
श्रीकृष्णमाचार्यविद्वद्वर्यकृपालब्धविद्येन
पेरुमाण्ड्लाचार्यकविना विरचिते
श्रीवेङ्कटेशचम्पूप्रबन्धे प्रथमोऽयं स्तबकः ॥

In Public domain. Digitization Muthulakshmi Research Academy

अथ द्वितीयस्तबकः

एवंस्थिते भगवति विगतवत्सरायुते द्वापरान्ते अष्टाविंशतितमे कलावप्यतीते वत्सरे कश्चिच्चोलभूपालो नागकन्योदरेऽवतीर्य धर्मेण चोलदेशं परिपालयति स्म। तत्समये तु ॥ 1 ॥

यदा रमेशस्स्वपदं विहाय
लीलामनुष्यत्वमवाप भूमौ।
आवां कियन्ताविति मन्यमानौ
तदा पशुत्वं दधतुर्विधीशौ ॥ 2 ॥

विधिर्धेनुरूपोभवद्वत्सरूपः
पिनाकी त्रिलोकी न सेवोत्सुकस्सन्।
रमा सापि गोपी पुरोधायताङ्गां
तदाऽवाप वेगं मुदा चोलभूपम् ॥ 3 ॥

तस्मै नृपालाय पयस्विनीं तां
क्रीत्वा जगामाथ रमा स्वधाम।
क्षीरप्रदां तां स तदा गृहीत्वा
पुत्रार्थमेतामकरोन्नृपालः ॥ 4 ॥

ततस्सापि धेनुस्तदा तस्य सद्गो-
सहस्रेण साकं गता वेङ्कटाद्रिम्।
क्रमान्नित्यमन्वेषयन्त्याऽगता तं
रमानाथमप्राप्य सर्वत्र तत्र ॥ 5 ॥

In Public domain. Digitization Muthulakshmi Research Academy

इत्थं विचिन्वन्विधिरत्र नित्यं जिघ्रन्समन्तादथ धेनुरूपी ।
श्रीस्वामिपूर्वाभिधपुष्करिण्यास्तटस्थवल्मीकवरं ददर्श ॥6॥

गोभूतधाताऽप्यथ नाकुसंस्थं
तं श्रीपतिं वेङ्कटनायकत्वे ।
क्षीरैश्च सर्वैर्वनदेवताभिः
पट्टाभिषेकं कृतवानिवास्ते ॥ 7 ॥

एवं तदारभ्य गवां गणैस्सा
गत्वाऽतिभक्त्या पयसाभिषेकम् ।
तत्प्रीतये तत्र करोति नित्यं
क्षीरं तु गेहे न ददाति किञ्चित् ॥ 8 ॥

तदैकदा चोलनृपस्य पत्नी
तां दोग्धुकामा स्वयमन्वगच्छत् ।
तदूधसस्तत्र कणैकमात्रा
दुग्धस्य धारा न विनिर्गताऽभूत् ॥ 9 ॥

पयः किमभूत्तस्याः वत्सः पिबति वाऽथवा ।
धेनुपालः किमकरोदिति चिन्तापराऽभवत् ॥ 10 ॥

तदा तद्धेनुपालमाहूय किंरेऽस्याः कणमात्रमपि न विनिर्गतं पयः किं कृतं त्वं भुङ्क्षेऽथवा भुङ्क्ते वत्सः किं तद्धृतं द्रुतं वदेति वदन्तीं तां प्रति हे मातस्तत्कर्म किञ्चिदप्यहं न जाने इत्यतिभयकम्पितस्सगोपालस्सगद्गदमवादीत् ॥ 11 ॥

इत्थं बृवन्तं तमवेक्ष्य राज्ञी
उत्थाय कोपान्महदुग्ररूपा ।

In Public domain. Digitization Muthulakshmi Research Academy

शुल्बेन सा चर्मविनिर्मितेन
तताड गोपं भयकम्पिताङ्गम् ॥ 12 ॥

स ताडितो गोपवरः परस्मिन्
दिनेऽथ कण्ठाङ्घ्रिनिबद्धरज्जुम् ।
समुत्सृजन्तामनुपृष्ठतोऽगात्
गवां गणैस्सार्धमहीन्द्रशैलम् ॥ 13 ॥

सा धेनुबृन्दं प्रविहाय तत्र
नाकङ्गतैका हरिमन्दिरं तम् ।
आनन्दपूरैस्स्वपयोधिसारैः
क्षीरैश्चकाराप्यभिषेचनं तत् ॥ 14 ॥

तां दुष्टभावामिव तत्र पश्यन्
गोपस्सकोपान्निशितं कुठारम् ।
उद्धृत्य वेगादतिहस्तमात्रं
गां हन्तुकामोद्यममाचकार ॥ 15 ॥

गोहन्तकं गोपमिवान्तकं तं
दृष्ट्वा हरिस्तत्र विचिन्त्य भूयः ।
स्वभक्तहानिं परिपश्यतस्स्या-
द्दोषस्य मूलं ह्यथ दुर्गतिश्च ॥ 16 ॥

एकेन भक्त्या तुलसीदलेन
यो पूजयेन्मामसकृन्नरस्तु ।
तं पालयामीति मम प्रतिज्ञा
मदर्थमेषा कथमत्र न स्यात् ॥ 17 ॥

In Public domain. Digitization Muthulakshmi Research Academy

इत्थं विचार्य भगवानतिमात्रभक्त-
वात्सल्यमत्रभुवि दर्शयितुं तथैव।
तत्ताडितो घनकठोरकुठारघातं
मौलौ स्वयं च धृतवान् जगतां शरण्यः ॥ 18 ॥

तदा शिरस्स्फोटनमस्य शौरेः कुठारघातेन बभूव घोरम्।
तत्ताक्षणादुच्छ्रजदेवसप्ततालप्रमाणेन च रक्तधारा ॥19॥

एवं कोलाहलमालोक्य हालाहलभुगिवभयाकुलो गोपाला अविलम्बेन कालान्तमध्यगच्छत् ॥ 20 ॥

तस्मिन्हते गोपवरेऽवरुह्य
शैलाद्गता साप्यतिदुःखिता गौः।
राजानमभ्येत्य भृशं लुठन्ती
इतस्ततोऽभून्मृतवत्सकेव ॥ 21 ॥

तां वीक्ष्य राजाऽप्यथ चारमूचे
किमर्थमेषा लुठतीत्यवत्सा।
गच्छेत्तयासार्धमहीन्द्रशैलं
सम्मेलयैनामिह धेनुबृन्दम् ॥ 22 ॥

तत्पृष्ठतस्सोऽपि गतो हि शैलं
नाक्वग्रतस्तत्र मृतं च गोपम्।
वल्मीकरन्ध्रोत्थितरक्तवृष्टिं
घोरां च पश्यन्नृपमाजगाम ॥ 23 ॥

चारोऽपि तत्तत्रगतं च सर्वं
विज्ञापयामास नृपाय तस्मै।

In Public domain. Digitization Muthulakshmi Research Academy

शृत्वाऽथ राजा वरयानसंस्थ-
स्सविस्मयोऽगाद्द्रुतमञ्जनाद्रिम् ।। 24 ।।

स तत्र श्रीस्वामिपुष्करिणीदक्षणतटस्थवल्मीकसमीपं गत्वा तत्र गतं सर्वं पश्यन्नतिविस्मयभयाकुलमतिरिदमाह नृपतिः ।।25।।

किं कष्टमेतन्महदत्र चित्रं
केनैव पापेन कृतं त्विदं तत् ।
गोपस्य मृत्युः किमु रक्तवृष्टिः
नाक्कग्रतो गोः कथनं प्रवृत्तिम् ।। 26 ।।

इत्येवं वदतो नृपस्य वचनं, वल्मीकसंस्थो हरिः शृत्वाऽनन्तपराक्रमस्सभगवान्सर्वं समालोच्य तत्त्रानन्तगिरीन्द्र-केन्द्रतलगस्सन्दिग्धनेत्राम्बुना व्याप्तः किञ्चिदुवाच गद्गदगिरा, चोलं नृपालं प्रति ।। 27 ।।

रे दुष्ट चोलनृपदुर्मदराज्यमत्त
त्वद्धेनुपः कुटिकृत्कृपयाविहीनः ।
आताडयन्मम शिरोऽपि परश्वधेन
भिन्नं ह्यभूत्परमदुःखमभुक्तपूर्वम् ।। 28 ।।

इत्येवमुक्त्वा भगवान्रमेशः
शशाप दुःखादविचार्य भूपम् ।
मद्दुःखदानोद्धृतकर्मणैव
पिशाचरूपो भव सन्निकृष्ठः ।। 29 ।।

इत्थं नृपश्शापशरानुविद्धः पपात भूमावतिमात्रमूर्च्छः ।
मुहूर्तमात्रादधलब्धसंज्ञः प्रोत्थाय वाचं भगवन्तमूचे ।।30।।

In Public domain. Digitization Muthulakshmi Research Academy

भो दयामय देव मया किमपकृतमकृतापकृतिं मां कथं शप्तवानसि ।। 31 ।।

पुराकृतं किं तव दुष्कृतं वा
मयापि किञ्चित्तदहं न जाने।
नोचेत्कुतोऽयं परिसम्भवेन्मे
हा दुःखमेतत्कथमत्र देव ।। 32 ।।

इति नृपगदितं तद्वाक्यमाकर्ण्यभूपं
हरिरवददिदं तं शापितं निश्वसन्तम्।
अधिगततरकृच्छ्रेणोच्छृजच्छापवाक्यं
अविदितमविचारान्नानृतं स्यात्कदापि ।। 33 ।।

दुःखं गतोऽस्म्यतितरामतिमात्रभक्त-
वात्सल्यदोषविवशादिह वेङ्कटाद्रौ ।
यावत्कलिः परिवसेदिदमेव दुःखं
तावद्भविष्यति ममेव तवापि नूनम् ।। 34 ।।

अग्रे भविष्यसि नृपो गगनाभिधेयः
पद्मावतीं च मम दास्यसि कन्यकां त्वम्।
कन्याप्रदानसमये वरदक्षिणार्थं
सद्वज्ररत्नमकुटं शतभारभारम् ।। 35 ।।

तद्धारयामि प्रतिशुक्रवारे सायाह्नकाले जलपूरिताक्षः।
कष्टं भवेन्मे घटिकासुषट्कमात्रं तदाऽद्यात्र सुखं गमिष्ये ।। 36 ।।

In Public domain. Digitization Muthulakshmi Research Academy

इति कालावधिं कृत्वा राज्ञस्स्वस्य च माधवः ।
सुखस्य कालं संसूच्य स्वावतारप्रयोजनम् ॥ 37 ॥

एवं सम्भाष्य राजानं तत्रास्ते भगवान्हरिः ।
क्षतशान्तिं समाकांक्षन् गुरुं वैद्यविदं स्मरन् ॥ 38 ॥

ततः क्षणादेवगुरुस्समागतः
समीक्ष्य देवस्तमपृच्छदौषधम् ।
उदुम्बरक्षीरविमिश्रितं क्षते
सदर्कतूलं दृढमाशु धार्यताम् ॥ 39 ॥

इत्युक्त्वा स ययौ हरिस्तु भगवान् तत्र स्थितस्तत्तथा
चक्रे नित्यमनन्तसत्वगुणिनस्तस्याक्षतस्य क्षत-
प्राप्तिः कुत्र किमर्थमिति चेल्लोकत्रयी मोहना-
येत्थं प्राकृतकर्मचात्र कुरुते, लीलावतारस्स्वयम् ॥40॥

को वेत्ति तस्य परमाद्भुतवैभवस्य
लीलावतारपुरुषस्य विचित्रलीलाम् ।
ब्रह्मेन्द्ररुद्रमरुदादय एव मुग्धाः
बालाश्च तत्र विषये खलु वेदवाचः ॥ 41 ॥

वल्मीक एव वरकोसलराजपुत्री
चिञ्चातरुर्दशरथो गिरिराड्यवीयान् ।
साक्षात्तदूर्ध्वगतभूमिरभूदयोध्या
रामावतारविभवानुभवे मुरारेः ॥ 42 ॥

वल्मीकभूमिरियमत्र तु देवकी सा
तत्तिन्त्रिणीतरुवरो वसुदेवसंज्ञः ।

In Public domain. Digitization Muthulakshmi Research Academy

शेषाद्रिरेव बलवान्बलभद्रदेवः
साक्षात्तधूर्ध्वगतभूर्मधुरापुरी सा ॥ 43 ॥

सर्वे मृगा वै यदुपुङ्गवास्ते
खेटाश्च सर्वेऽप्यथ गोपिकाद्याः ।
श्रीकृष्णरूपेण मनोहरेण
एवं हि संक्रीडति वेङ्कटेशः ॥ 44 ॥

चक्षुश्श्रियाध्यक्षगिरिश्च साक्षात्
प्रत्यक्षवैकुण्ठवरो विलक्ष्यः ।
सुवर्णपूर्वामुखरीनदी सा
विराजमाना विरजानदी च ॥ 45 ॥

लक्ष्मीपतिस्तत्र तु वासुदेवः
मुक्ता अजाः पक्षिगणाश्च रुद्राः ।
सनत्कुमारप्रमुखा मृगा वै
ते वानराद्याः द्विजसत्तमास्युः ॥ 46 ॥

एवं वेदमयस्साक्षादह्यद्रिश्श्रीहरेस्तदा ।
स्ववासभूतवल्मीको वैकुण्ठादधिकोऽभवत् ॥ 47 ॥

यस्तं सेवितुमिच्छति प्रतिदिनं गच्छत्यनन्ताचलं
तत्सर्वं कृतमेव तेन विदुषा तज्जन्मनस्यात्तलम् ।
तत्प्राप्तिश्च सहस्रजन्मसुकृतैर्लोके जनानां भवेत्
नो चेत्तन्न भविष्यतीह न तथा तत्प्रीतिपात्रं जनः ॥48॥

श्रीवेङ्कटाद्रेर्महिमामहत्वं
जानन्ति नैवाब्जभवादयोऽपि ।

In Public domain. Digitization Muthulakshmi Research Academy

किमल्पचित्ता मनुजाश्च मायिनः
विन्दन्ति विष्णोः पदमव्ययं तत् ॥ 49 ॥

इत्थमेतादृग्चित्रविचित्रतरचेष्टाविशिष्टस्सर्वावशिष्टस्सर्वगरिष्ठः सर्वाढ्यस्सर्वदेवेढ्यस्सभगवान् रमापतिस्सर्वजगत्कुटुम्बस्सर्वयुतोऽपि सर्वरहित इव कदाचित्स्वयमेक एवात्यर्थं क्षतशान्तिकरौषदार्थम् अरुणोदये निर्जगाम ॥50॥

श्रीवेङ्कटेशस्य पदाब्जसेवां
कुर्यामहं चेदरुणो भवेयम्[1] ।
इतीव तस्मिन्समयेऽरुणोऽपि
स्वस्यानुरागोदय[2]मातनोति ॥ 51 ॥

ततस्स तत्रभवान्भगवान्श्वेतपोत्रीपतिर्देवस्तु मृगयार्थं गतः कोऽसि कोऽसीति गर्जद्भिर्धृततरगतिकपोलपोतव्रातैस्समेतस्सन् तत्र श्यामाकहारिणं वृषभरूपिणम् ऋभुद्वेषिणं दैत्यं च जित्वा यदाऽगतस्तदा देवस्तमभिमुखमायान्तं श्रीकान्तं ददर्श ॥ 52 ॥

तदाऽगतं तं प्रसमीक्ष्य देवो
लीनोऽभवत्तत्र तु वेङ्कटेशः ।
लीनन्तमेनं परिदृश्य [3]मेनं
क्रोडस्वरूपी भगवान्मुमोद ॥ 53 ॥

---

1) अरुणोभवेयमित्यत्र ऋणरहितस्यामित्यर्थः ।
2) रागोदयं - रक्तिमोदयं, भक्ततिशयं च।
3) मेनं मायाः लक्ष्म्या इनं प्रभुं श्रीपतिमित्यर्थः।

In Public domain. Digitization Muthulakshmi Research Academy

त्यक्त्वा तु वैकुण्ठमिहागतं तं
मत्वा किटीशोपवरवेङ्कटेशम् ।
गत्वा समीपं समयानुरूपं
धृत्वाऽतिधैर्यं हरिमाससाद ॥ 54 ॥

श्रीवेङ्कटेशोऽपि तथा किटीशं
ज्ञात्वा स्ववल्मीकसमीपसंस्थम् ।
निरीक्ष्यमाणः किटिनोत्सुकेन
निर्गत्य तस्यान्तिकमाससाद ॥ 55 ॥

ततस्तदान्योऽन्य विलोकनोत्थ
सम्भाष्यसन्दिग्धविलोचनाब्जौ ।
प्रेमाकुलौ स्वागतमूचतुस्ते
श्रीकोलनारायणदेवदेवौ ॥ 56 ॥

रूपद्वन्द्वविराजितौ त्रिजगतस्सम्मोहनाय स्थितौ
तौ दृष्ट्वाऽद्भुतकर्म तत्र च तयोस्ते निर्णराणाङ्गणाः ।
धात्रूग्रेन्द्रमुखास्तदा सदयितास्सर्वेऽन्तरिक्षस्थिताः
पश्यन्तस्सुमनांसि[1] तानि मुमुचुश्श्रीकोडदेवोपरि ॥ 57 ॥

एवं पवित्रजगदीशविचित्रमायां
पश्यन्त एव कुतुकास्सुरपुङ्गवास्ते ।
अन्योऽन्यहर्षपरिभाषणसंयुतानि
तद्दिव्यचित्रचरितानि गतास्तुवन्तः ॥ 58 ॥

---

1) सुमनांसि - पुष्पाणि मनांसि च ।

In Public domain. Digitization Muthulakshmi Research Academy

ततो दैवतततौ गतायां श्वेतपोत्रीपतिश्श्रीपतिमिदम् अवादीत्।।59।।

विहाय वैकुण्ठमिहागतस्त्वं
किमर्थमेतं वद तत्र हेतुम्।
इति ब्रुवन्तं किरिदैवतं तं
उवाच वाचं भगवान्रमेशः ।। 60 ।।

भृगोरंघ्रिपाताद्रमाऽतीवकोपात्
गता मां विहायाऽशु कोल्लापुरीं सा।
अतस्तद्वियोगाच्च वैकुण्ठ[1]मारात्
विहायेहतोषादहन्तेऽऽगतो[2]ऽऽरात् ।। 61 ।।

श्रीस्वामितीर्थस्य च दक्षीणेऽच्छे-
तीरे तु वल्मीकवरे वसन्तम्।
अताडयन्मामतिकोपगोपः
परश्वधेनात्र शिरो विभिन्नम् ।। 62 ।।

तदौषदार्थं प्रतिनित्यमेवं
गतोऽस्म्यहं त्वत्र समागमस्ते।
अभून्ममैवाद्य सुदैवयोगात्
समन्तदुःखानि गतानि मन्ये ।। 63 ।।

यावत्कलिः परिवसेदिह मे निवासः
तावद्भवेदिति मनो मम विद्यतेऽत्र।

१) आरात् मारं २) आरात् समीपम् आरादूरसमीपयोरित्यमरशिः।

In Public domain. Digitization Muthulakshmi Research Academy

तस्मात्स्थलं किमपि देह्यचलाधिनाथ
लीला हि चात्मसुहृदां किमु न प्रदेयम् ॥ 64 ॥

मौल्यं विना न लभते स्थलमत्र देव
यत्किञ्चिदप्यमृततुल्यसखापि वा स्यात् ।
दातृत्वमस्ति परिचारकवर्ग एव
प्रेमा तु वाचि सततं कलिधर्म एषः ॥ 65 ॥

एवं श्रुत्वा श्रीदारोऽपि भूदारायात्रागतानां मद्भक्तानां प्रथमदर्शननैवेद्यक्षीराभिषेचनाद्यर्चनं तवैवानन्तरं ममास्त्वित्येवं वसुप्रतिरूपं वरं दत्वा तस्माद्धात्रीं पवित्रीं कर्तुमिव स्वपादविन्यासेनातिमात्रपवित्रां पादशतमात्रां धरित्रीमग्रहीत् ॥ 66 ॥

विश्वम्भरेणाश्रयिता यदा सा
विश्वम्भरावाचकवाच्यभावम् ।
प्राप्ता तदा पादशतप्रमाणा-
च्छौरेस्थिराभूत्कथितेत्यनन्ता ॥ 67 ॥

येन त्रिलोकी त्रिपदी कृताभू-
त्पूर्वेऽद्य तत्पादशतप्रमाणा ।
साहं कथं स्यामिति चिन्तयन्ती
तदंघ्रिपाताद्विपुला बभूव ॥ 68 ॥

ततस्तदाऽनन्तपदानुषङ्गा-
द्धराधरोऽनन्तपदान्वितोऽभूत् ।
अल्पोऽप्यसारोऽप्यधिकाश्रयेण
महान्भवत्येव न चित्रमेतत् ॥ 69 ॥

In Public domain. Digitization Muthulakshmi Research Academy

आश्रयाश्रयिणोरेव मनन्तत्वं विचित्रकम् ।
तयोरप्याश्रयायां स्यादनन्तात्वमतोऽद्भुतम् ॥ 70 ॥

तस्मै किरीशो हरये तदादि-
सेवार्थमेकाम्बकुलां प्रदाय ।
श्यामाकभक्तं मधुना प्रयुक्तं
भुक्त्यै सदा प्रेषयति प्रशस्तम् ॥ 71 ॥

तत्सन्निधौ सा बकुला नियुक्ता
मूर्तीभवद्भक्तिरिवावतस्थे ।
तं चान्नपानौषधपादपद्म-
संवाहनाद्यैरपि सेवमाना ॥ 72 ॥

कृष्णस्य कल्याणविधिस्सुतस्य
पुराकृतो नैवमितीष्टपूर्त्यै ।
अद्यात्र तद्दत्तवरा सती सा
जाता यशोदा वकुलाभिधेया ॥ 73 ॥

सैषाऽस्ति [1]सत्रा परिचर्ययास्य
विवाहकार्यं तु करिष्यमाणा ।
प्राक्जन्मसङ्कोचविमोचनाय
सर्वंसहेवात्र सहायभूता ॥ 74 ॥

तस्या एव मुदे स्वयं कलियुगे, सम्भूय लीलातनुः
क्रीता कर्मभिरेवशर्मभिरलं, तैरद्भुतैस्तैर्गुणैः ।

---

१) सत्रा-सह श्लो॥ सार्धं तु साकं सत्रा समं सहेत्यमरः।

In Public domain. Digitization Muthulakshmi Research Academy

लोकानां कलिकल्मषावृतमतीनां पालनायात्मवान्
शेषाद्रौ रमते रमापतिरयं, श्रीवेङ्कटेशप्रभुः ॥ 75 ॥

॥ इति श्रीशिरशिनहलान्वयसञ्जात-कौण्डिन्यगोत्र-
श्रीमद्वेङ्कटाचार्यपुत्र-श्रीरङ्गमाम्बागर्भसम्भूत-श्रीकृष्णमाचार्य-
विद्वद्वर्यकृपालब्धविद्येन पेरुमाण्डुलाचार्यकविना विरचिते
श्रीवेङ्कटेशचम्पूप्रबन्धे द्वितीयोऽयं स्तबकः ॥

In Public domain. Digitization Muthulakshmi Research Academy

अथ तृतीयस्तबकः

कदाचिदथ माधवः परिवसन्मुदा शोभनं
वनं जिगमिषुस्तदाऽस्मरदनूनरूपं हरिम् ।
अनुस्मरणतत्क्षणे परमलक्षणेनान्वितः
मरुद्धरिवपुर्धरो नयनगोचरोऽभूद्धरेः ॥ 1 ॥

सपञ्चदशहस्तकोन्नतविराजितं भूषितं
सुनीलतनुमद्भुतं सितपदं सुरैः पूजितम् ।
सुमुग्धतिलकोल्लसल्लपनमाशु संवीक्ष्य तं
मनोजवमरुद्धरिं परिदधे मनोऽधिष्ठितुम् ॥ 2 ॥

आदर्शमालोक्य सशुभ्रमृत्तिकां
तन्मध्यमे कुङ्कुमचित्ररेखाम् ।
फाले दधद्वारिधिपुण्डरीक-
मध्यस्थलक्ष्मीं धृतवानिवास्ते ॥ 3 ॥

स शुभ्रवस्त्रं परिधाय कट्यां
सुवर्णवस्त्रेण च वेष्टयित्वा ।
निबध्य काञ्चीं नितरां तदूर्ध्वं
स्वर्णोपवीतं च तदा दधार ॥ 4 ॥

सरत्नचित्रैः कनकैश्च हारैः
सुगन्धपुष्पग्रथितैस्स्रगग्रैः ।

In Public domain. Digitization Muthulakshmi Research Academy

सकङ्कणश्चन्दनचर्चिताङ्गो
विराजते वेङ्कटशैलनाथः ॥ 5 ॥

स चक्रपाणिर्नवरत्नचित्रित-
प्रतप्तजाम्भूनदकुण्डलत्विषा ।
प्रदीपितादर्शकपोलभागक-
स्सुवर्णरत्नाञ्चितपादुकोज्ज्वलः ॥ 6 ॥

दशाङ्गुलीनां दशकेऽङ्गुलीयका-
न्यसौ दधारात्मदशावतारताम् ।
प्रकाशयन् हेममयेन वाससा
सुवेष्ट्य मौलौ मणिभूषितोऽभवत् ॥ 7 ॥

त्रैलोक्यसम्मोहनरूपमेवं
धृत्वा धनुर्बाणधरः प्रवीरः ।
श्रीमान्स्तथा वेङ्कटशैलनाथः
साक्षाद्बभौ मन्मथमन्मयस्सः ॥ 8 ॥

ततस्सुरेशश्शरचापहस्तः
हयं समारुह्य मनोजवन्तम् ।
गिरिं च तोषादवरुह्यतां तं
जवाद्वनं भूरि जगाम शौरिः ॥ 9 ॥

अटन्नटव्यामटवीचरान्तान्
क्रूरान्बहून्तत्र मृगान्शरेण।
ससिंहशार्दूलगजैणपेरून्
किटींश्च घोरान्शरभाञ्जघान ॥10॥

In Public domain. Digitization Muthulakshmi Research Academy

मत्तेभमेकं मधुकैटभारिः
दृष्ट्वा तदा तत्र वने चरन्तम् ।
तं चान्वगात्पृष्ठत एव हन्तुं
सज्योग्रचापाञ्चितबाणहस्तः ॥ 11 ॥

दन्तावलस्तं शरचापहस्तं
हन्तुं स्वपृष्ठादनुयान्तमुग्रम् ।
पश्यन्भयाद्भीतमतिः पलाय्य
जवाद्वने दूरमरं जगाम ॥ 12 ॥

सयोजनं सार्थकमेव सत्वरं
गतस्तदा तत्र जनार्दनं हरिम् ।
स्वशुण्डमुद्धृत्य च दण्डवद्भुवि
पपात गर्जन् शरणागतप्रियम् ॥ 13 ॥

तदानीं देवदेवस्य श्रीनिवासस्य तद्वने ।
स्फुरत्तटिल्लते वाभ्रे कन्या दृष्टिपथं गता ॥ 14 ॥

सैषाऽनपत्यपरितप्तहृदा स्वनाम्ना
राज्ञा सुताप्तिविषये कृतयज्ञभूमौ ।
या श्रीस्सुवर्णहलफालशिखानुविद्ध-
विस्तीर्णपद्मदलमध्यगताऽविरासीत् ॥ 15 ॥

यां वीक्ष्य पद्मजनितामशरीरवाण्याऽऽ-
हाप्याड्वियन्नृपभवच्छशिवंशदीपा ।
मेनामयोनिजजनितामपि देवदत्तां
स्वां योनिजामिव सदा परिपालयेति ॥ 16 ॥

In Public domain. Digitization Muthulakshmi Research Academy

यल्लाभतस्स्वकृतपुण्यफलं सुपक्कं
प्राप्तं सुपुत्रमिव चाप वियन्नृपालः ।
राज्याधिपत्यमनुरूपमपत्यभावं
प्राप्ता मुमोद सुतरां धरणीसती सा ॥ 17 ॥

यस्याश्च पद्मजनितत्वरमाकृतित्व-
पद्मोदरत्वमुखसङ्गतलक्षणैश्च ।
पद्मावतीति विबुधैः प्रथमाभिधेयं
धात्र्या सहैव कृतवान् गगनाधिराजः ॥ 18 ॥

यद्बालकेलिभिरलं प्रियवल्गुवाग्भि-
रानन्दपूर्णजलधौ विनिमज्जितोयः ।
तां वीक्ष्य यौव्वनगतां सदिनक्रमेण
चिन्तार्णवेऽप्लव इवापदानपारम् ॥ 19 ॥

पद्मावतीं सहसखीभिरलंकृताभि-
रुद्यानमेत्य च कदाचिदनर्घपुष्पा-
ण्याहृत्य तत्र तरुमूलमुपाश्रितां तां
अभ्यागतः कलहभुङ्मुनिराददर्श ॥ 20 ॥

अप्राकृतत्रिभुवनाप्रतिमेकरूपां
तां वीक्ष्य तत्करतलोत्तमदिव्यरेखाः ।
साक्षात्त्रिलोकपतिरेव पतिस्तवैव
नूनं भवेदिति वदन्निरगान्मुनीन्द्रः ॥ 21 ॥

पद्मावतीं परिवृतालिपरालिकान्तां
हृद्यानवद्यनवयौवनसुन्दराङ्गीम् ।

In Public domain. Digitization Muthulakshmi Research Academy

दृष्ट्वा तदा हरिरसौ हरिवीरसंस्थो-
प्यस्या मनः परिदधे विमलाङ्गसङ्गे ।। 22 ।।

प्रत्यङ्गमस्या नवयौवनायाः
प्रद्युम्नधाम्नाऽप्रतिमं बभूव ।
यतो रमानायकचित्तमाशु
विलोकमात्रेण विमोहितं तत् ।। 23 ।।

अस्यास्स्वरूपलावण्यादिकं किमिति वर्ण्यते, वाचस्पतेरपि वाचा-मगोचरतां विवृणोति ।। 24 ।।

तद्दिव्यमूर्तिस्फुरणं विलोक्य
क्षणप्रभाभूत्तटिदभ्रलीना ।
अष्टापदोऽष्टादशवारमग्नौ
पतन्नपीषन् नहि तत्पदाढ्यः ।। 25 ।।

विविधकुसुमपद्मामोदमाघ्राय तस्मा-
दधिकतरमवाप्तुं मूर्ध्नि तस्याश्च फाले ।
रुचिरचिकुरभूताः केचिदाविश्य भृङ्गाः
भ्रमरकपदवाच्या भान्ति नीलालकायाः ।। 26 ।।

स्रष्टैवमस्याः कुटिलालकावृतं
सुनीलमेघैःपरिवेषिताब्जम् ।
नासाशरास्त्रेण च खण्डयित्वा
तदर्कबिम्बत्वलिकं कृतं किम् ।। 27 ।।

In Public domain. Digitization Muthulakshmi Research Academy

आकाशपुत्र्यावदनोपमत्वे
मृगाङ्कपङ्केरुहयोर्विरोधम् ।
परस्परं जातमिमं निहन्तुं
तदाऽब्ज[1]शब्दं ससृजे विधाता ॥ 28 ॥

अस्याश्च नेत्रोपमतामवाप्तुं
वनेऽब्जमेणो गहनेऽपि तप्त्वा ।
एवं गतेष्वब्दशतेषु सत्सु
प्रापार्थसिद्धिं कमल[2]प्रयोगात् ॥ 29 ॥

अद्यापि तद्भ्रूसमतामुपेतुं
हरेर्विचित्रं धनुरेत्यकाले ।
तदा तदा तद्रुचिमाकलय्य
तदाऽभवं सेति पुनः प्रयाति ॥ 30 ॥

तस्यास्स्मितैककलया तुलितं स्वकीयं
ज्योत्स्नावितानमभवन्नकलासमग्रम् ।
तच्चिन्तया हिमकरोऽसितपक्षकूटा-
द्दैनन्दिनैककलया क्षयतामुपैति ॥ 31 ॥

सरागमात्रेण मम प्रसिद्धि-
रितीव मत्वा मधुरत्वसिद्धये ।
यदाऽपबिम्बं मधुराधरत्वं
मधुद्विषोप्यादरणीयमासीत् ॥ 32 ॥

1) अब्जशब्दमित्यत्र अब्जं - कमलं, अब्जश्चन्द्र इति ।
2) कमलप्रयोगादित्यत्र कमलं - पद्मं, कमलः एण इति श्लेषः ।

In Public domain. Digitization Muthulakshmi Research Academy

यदोडुपस्तद्वदनत्वमाप
स्वनाथविश्लेषभयात्तथैव ।
तारावलिस्तद्रदनावलित्वं
तच्चन्द्रिकातत्स्मितरूपमाप ॥ 33 ॥

सुधांशुबिम्बोद्धृतसौधसारैः
रविप्रभामिश्रितदोहदेन ।
विनिर्मितौ किं विधिनात्मऽयोगात्
तस्याः कपोलौ मुकुराविवैतौ ॥ 34 ॥

कर्णौ हि तस्याः कमलोद्भवायाः
स्वरूपलावण्यसमग्रभूतौ ।
अप्राकृता योनिजनित्वयोगात्
श्रीकारवर्णाविव तौ विभातः ॥ 35 ॥

आनाभिपद्मनिलयात्कुचशैलमध्य-
पर्यन्तमिन्द्रमणिसूक्ष्मलवैः कृतोऽयम् ।
तद्राजमार्ग इव, यौवनशिल्पकेन
तद्रोमराजि रुदभासत मन्मथस्य ॥ 36 ॥

कुचकनकधराढ्यस्यन्दिलावण्यपूरो-
त्कषणजनितकार्शं मध्यमं चारुतन्व्याः ।
त्रिभुवनजयशीलं मुष्टिमात्रावगम्यं
कुसुमशरकरस्थं किं धनुर्मध्यमं तत् ॥ 37 ॥

मया जितं स्त्रीजघनं त्विहेति
गर्वातिरेकः पुलिनस्य जातः ।

In Public domain. Digitization Muthulakshmi Research Academy

विलोक्य तस्या जघनन्तु पश्चात्
ह्रिया जितोऽस्मीति जले न्यमज्जत् ॥ 38 ॥

नितम्बमिन्दीवरसम्भवायाः
नूनं जगद्भ्रामकमारचक्रम् ।
मुरान्तकस्याप्यचलं मनस्त-
द्यद्विभ्रमेण भ्रमितं नितान्तम् ॥ 39 ॥

विदलितकदलीयस्तम्बशोभौ तदूरू
करिवरपृथुशुण्डाकान्तिधिक्कारधीरौ ।
मदनविजयदीव्यद्रत्नदण्डायमानौ
मधुरिपुहृदयाशावल्लिकोऽऽधारकाण्डौ ॥ 40 ॥

चरणारविन्दकान्तिधिक्करणौत्सुक्यविवर्धिता कृती ।
नवपल्लवतल्लजारुणौ शुभरेखाऽभरणौ मृगीदृशः ॥41॥

एतादृक् निरुपमसौन्दर्यवतीं पद्मावतीं पश्यन् सश्श्रीपतिः अतिकुतुकमतिस्सन् तत्समागमनार्थं मन्दं मन्दं तदभिमुखमायाति, तदानीम् ॥42॥

करीन्द्रसङ्गेन समागतं तं
तुरङ्गमास्थाय वराङ्गनाभिः ।
यथाऽङ्गशून्यं च तदा शुभाङ्गं
पद्माङ्गनापश्यददृष्टपूर्वम् ॥ 43 ॥

(तदा पद्मावत्यात्मगतम्)

कोऽयं जगन्मोहनसुन्दराङ्गः
सम्यक्समागच्छति मन्मथः किम् ।

In Public domain. Digitization Muthulakshmi Research Academy

नह्युग्रनेत्रेण स दग्धगात्रः
कस्तर्हि सश्श्रीपतिरेव नूनम् ।। 44 ।।

इतःपुरा मां सुरमौनिरत्र
समेत्य मत्पाणितलं विलोक्य ।
जगत्पतिस्ते पतिरेव नूनं
भविष्यतीति प्रवदन् जगाम ।। 45 ।।

तस्मान्मनो मोहवशं गतं मे
सम्प्रत्यलं धावति सानुरागम् ।
मामाप्तुकामस्स इतोऽभियाति
सखीवृताहं खलु किं करोमि ।। 46 ।।

अन्विष्य तम्मे धिषणालताद्य
चूतं समन्वेष्य यथा लता च ।
सम्यक्प्रवृद्धा प्रतिधावतीत्थं
कथं सहेयं पितुरस्म्यधीना ।। 47 ।।

तस्मिन्नेव मनो विलीनमभवत्तद्दर्शनान्मे भृशं
तत्ताद्दक्पुरुषं विनापि न वृणोम्यन्यं नरं वानरम् ।
स्वप्ने वापि न मां लभेत यदि सः त्यक्ष्याम्यसून्वा प्रियान्
किञ्च स्याच्छतजन्मभिर्व्रतकृशा तं शौरिमेवाश्रये ।।48।।

इत्थमत्यन्तं दृढसङ्कल्पवती श्रीमती पद्मावतीस्वेतरेषामपि अप्रकटीकृतात्मगता सती तदा ताभिस्सखीभिस्सह किमप्यज्ञातवती एवमाचरति।।49।।

In Public domain. Digitization Muthulakshmi Research Academy

व्यूहाकृतास्ताद्रुममूलसंस्थाः
पुञ्जीकृताः पुष्पलता इवाशु ।
निमीलितोन्मीलितलोचनास्तं
पश्यन्ति भीता असकृद्विलोलाः ।। 50 ।।

कोऽसाविहाऽयाति किरातरूपः
पुरा न दृष्टो महदुग्रचापः ।
हयाधिरूढो बलवद्बलाढ्यः
किमत्र कुर्मः कथमद्य हृद्ये ।। 51 ।।

इति ब्रुवतीषु भयकम्पितमतिषु युवतिषु सतीषु तदा वियन्नृपसुता पद्मजाता अभिमुखमायातस्य तस्य हयाधिरूढस्य पुरुषस्य नामगोत्रादिवृत्तान्तं सकलं पृच्छन्त्विति सखीस्ताः प्रत्यवोचत् ।। 52 ।।

तच्छ्रुत्वा तास्तदानीं धैर्यमालम्ब्य तमभिमुख मायाताः सत्यः।।53।।

इत्यब्रुवन्तं परिदृश्यदृश्यं
त्वं कोऽसि कोऽसीह किमस्ति कार्यम् ।
किमर्थमत्रागमनं तवाद्य
इतोऽद्य गच्छात्र नरा न सन्ति ।। 54 ।।

तच्छ्रुत्वा श्रीनिवासोऽप्येवंविधं वदति स्म ।। 55 ।।

किमर्थमेतत्प्रतिषेधवाक्यं
वदन्ति कन्या मम चात्र राज्ञः

In Public domain. Digitization Muthulakshmi Research Academy

पुत्र्यास्समीपेऽस्त्यतिमुख्यकार्यं
कार्यं विनाऽऽयाति न कोऽपि विद्वान् ।। 56 ।।

ततस्ता एवमूचुः -

किं कार्यमस्ति वद शीघ्रतरेण नाम
गोत्रादिकं च पितृमातृकबन्धुवर्गान् ।
वासश्च सर्वमपि तेऽत्र मनोविचारः
को वा भवन्तमिति पृच्छति राजपुत्री ।। 57 ।।

इति तद्वचनं शृत्वा प्रोवाच स रमापतिः ।
कन्याऽपेक्षामुख्यकार्यं तदन्ते प्रवदामि वः ।। 58 ।।

लोकप्रसिद्धतरचन्द्रकुलं मदीयं
श्रीदेवकीसुवसुदेववरौ गुरू मे ।
रामोऽग्रजो मदनुजा सुभगा सुभद्रा
पार्थोऽस्ति बन्धुरिह मां प्रवदन्ति कृष्णम् ।। 59 ।।

मद्वृत्तमेवमखिलं गदितं त्वयोक्तं
श्राव्यं ममास्ति भवदीयचरित्रमत्र ।
तद्वाच्यताममितपण्डितनन्दनेऽद्य
सर्वञ्च ते पितृकुलादिकनामयुक्तम् ।। 60 ।।

एवं पृच्छन्तं तं श्रीपतिं प्रति पद्मावती स्ववृत्तमखिलमित्थं निवेदयति स्म ।। 61 ।।

आकाशराजतनयामपि पद्मजातां
पद्मावतीति भुवि मां प्रवदन्ति शुद्धाम् ।

In Public domain. Digitization Muthulakshmi Research Academy

आत्रेश्च गोत्रमुतराजकुलं मदीयं
त्वं याहि शीघ्रमित एव किरातनाथ ॥ 62 ॥

इत्येवं वदन्तीं पद्मावतीं प्रति श्रीपतिरेवेदमवोचत् ॥63॥

अमृतं मृतरहितमपि विषसम्मिश्रं वधाय भवत्येव।
मृदुमधुरवचनमपि कटुसंमिश्रं व्यधाय भवत्येव ॥ 64 ॥

किमर्थमेतन्मधुरं न भाषसे
किं निष्ठुरं मां प्रति राजपुत्रि।
लोकेऽर्थिने मार्दवयुक्तवाक्यं
वदन्ति कामं खलु पुण्यशीलाः ॥ 65 ॥

त्वत्काममिच्छन्नहमागतोऽस्मि
मह्यं दिशात्मानमिहेङ्गितज्ञे।
दानेन सौख्यं गमितासि चान्ते
स्वर्गं तु भूयोऽपि गमिष्यसि त्वम् ॥ 66 ॥

तदुक्तमाकर्ण्य कृधान्विता सा
प्रत्येवमूचे हरिमुग्रनेत्रा।
अवाच्यमेतद्वदसि त्वमित्थं
न विद्यते किं तव जीवनेच्छा ॥ 67 ॥

आकाशराजस्तु समागतश्चेत्
हनिष्यति त्वां परिदृश्य नूनम्।
नायाति यावद्धि स तावदेव
त्वं याहि शीघ्रं सह यस्स्वधाम ॥ 68 ॥

In Public domain. Digitization Muthulakshmi Research Academy

तच्छ्रुत्वा श्रीनिवासस्ससाहसं -

कार्यं भवेच्छेन्मरणं हि सौख्यम्
तत्कार्यहीनस्य जगत्तृणं स्यात्।
कथं हि हन्यात्स वियन्नृपालः
अधर्ममार्गाभिमुखस्त्विमं माम्।। 69 ।।

विवाहयोग्या वयसा प्रयुक्ता
कस्मै प्रदेया जनकेन राज्ञा।
कन्यार्थ्यहं चेद्वरकामिनी त्वं
को वात्र दोषो वद देवि वाक्ये।। 70 ।।

ततः पद्मावती सक्रोधम् -

शृणु मुग्ध न जानासि भविष्यं स वियन्नृपः।
दृष्ट्वा त्वां निगडैर्बध्वा हनिष्यति न संशयः।। 71 ।।

श्रीनिवासस्सत्यागम् -

निश्चित्य देवि मरणं त्वयि भोगमेत्य
गन्ताऽस्मि पूर्वकृतकर्मफलं यथा वा।
स्यात्तत्तथा भवतु भाविभवस्य मृत्युः
सत्यस्समामनघमत्र कथन्नु हन्यात्।। 72 ।।

ततः पद्मावती ससामम् -

पुरातनादागतगौरवं ते
तथा नृपस्यास्य हरेस्तथैव।
सम्भाव्य सर्वं स्वनिकेतनं त्वं
यथा सुखं गच्छ किरातनाथ।। 73 ।।

In Public domain. Digitization Muthulakshmi Research Academy

इत्युक्तस्ससस्तया देवो निषादाकृतिरात्मवान् ।
निराकृत्य तु तद्वाक्यं हयस्थः पुरतोऽविशत् ॥ 74 ॥

तं वीक्ष्य सा वाचमुवाच बाला
त्यक्त्वाऽत्र बन्धून्पितरौ च सर्वान् ।
व्यर्थं किमर्थं म्रियसे ह्यनाथः
मुदा भविष्यस्यथ काकभोग्यः ॥ 75 ॥

विधिना लिखितं कर्म न तद्व्यर्थं भविष्यति ।
जयो वाऽपजयो वास्तु त्वयि भोगं करोम्यहम् ॥ 76 ॥

तदा च सारोषकषायिताक्षी
सर्वाभिरावृत्य सखीभिरेषा ।
बाला शिलापाणिरुपागतं तं
[1]सन्ताडयामास हरिं शिलौघैः ॥ 77 ॥

तत्ताडनैस्सतुरगं पतितं गतासुं
दृष्ट्वा महुर्मुहुरलं ककुभश्च सर्वाः ।
पश्यन्विमोहितमना इव मुक्तकेशः
वेगाज्जगाम हरिरुत्तरदिङ्मुखसन् ॥ 78 ॥

आरुह्य सेह गिरिराजमनामयस्स-
न्सम्मोहयन् सकललोकमवाप्य शय्याम् ।

---

1) सन्ताडयामास हरिं शिलौघैरित्यत्र हरं वाजिनमेव न तु श्रीनिवासमिति वोध्यम्।

In Public domain. Digitization Muthulakshmi Research Academy

आनन्दवानपि गताधिरिवेक्षमाण-
श्शेते युगान्तवटपत्रशयो मुरारिः ॥ 79 ॥

॥ इति श्रीशिरशिनहलान्वयसञ्जात-कौण्डिन्यगोत्र-
श्रीमद्वेङ्कटाचार्यपुत्र-श्रीरङ्गमाम्बागर्भसम्भूत-
श्रीकृष्णमाचार्यविद्वद्वर्यकृपालब्धविद्येन
पेरुमाण्ड्लाचार्यकविना विरचिते
श्रीवेङ्कटेशचम्पूप्रबन्धे तृतीयोऽयं स्तबकः ॥

In Public domain. Digitization Muthulakshmi Research Academy

अथ चतुर्थस्तबकः

ततस्सुशीला वकुलाऽबला सा
साऽपूपसूपादिकषड्विधान्नम् ।
अदाद्रमेशस्य निवेदनाय
भक्त्याऽगता तं हरिमाददर्श ॥ 1 ॥

ततो भगवन्तमप्राकृतमपि प्राकृतवत्परितप्यमानहृदयं सकलभुवनैकनिलयताङ्गतमपि वल्मीकतलमुपाश्रिततिशयमृदुल-धवलपरिमलविशेषशेषशय्याधिशायिनमपि लौकिकशय्याधिशायिप-मापादमौलिपर्यन्तमविच्छिन्नचन्नवस्त्रेणाच्छादितसर्वतनुम् अत्यन्तदीर्घ-निश्वासैः निश्वसन्तं स्रवन्नेत्र जलबिन्दुभिरुदन्तमभाषमाणं श्रीयोषा-रमणमेवं बभाषे, बकुलानाम योषा॥2॥

उत्तिष्ठोत्तिष्ठ गोविन्द किं शेते मधुसूदन ।
न कदाचिद्दिवा स्वापः न कृतं रोदनं हरे ॥ 3 ॥

किमर्थमेतच्छयनं प्रदुःखं किञ्चार्तवत्त्वं कुत ईक्ष्यसे मे ।
मयोपनीतं परमान्नमाशु भोक्तुं मुदाऽगच्छ रमाधवात्र ॥ 4 ॥

एवमुक्तस्सन्नपि सः प्रत्युक्तिं नादास्यत्तदा पुनरपि वकुला ॥5॥

मनोगतं किं तव देवदेव यथार्थतस्तद्वद सत्प्रभाव ।
अभुक्तमार्तं शयितं भवन्तं दृष्ट्वा मनस्सीदति मेऽद्य गाढम् ॥6॥

In Public domain. Digitization Muthulakshmi Research Academy

किं दृष्ट्वा भयकम्पितोऽसि विपिने घोरं मृगं वाऽथवा
भूतप्रेतपिशाचवर्गमपि वा चोरं च शूरं नरम् ।
तत्सर्वं वद मन्त्रयन्त्रनिवहैस्सन्मूलिकाद्यौषधैः
सर्वं देव विमोचयामि विधिना तत्कारयित्वा बुधैः ॥7॥

नोचेत्काभुवनैकसुन्दरवती दृष्टा त्वया वा भुवि
कस्यास्सङ्गमपेक्ष्य चित्तविकलं तेऽभूद्वदाद्यैव त-
द्वालं भक्तवशं रमापतिमहो सम्मोहयामास का
बाला पुण्यवती न वेद्मि भगवन् चित्रं चरित्रं तव ॥8॥

इत्युक्तेप्यनुक्तिदे भगवति सति तदा वकुलाऽतिव्याकुला तत्रानीतं विचित्रमन्नपात्रं निक्षिप्य तत्समीपमुपगता तस्य शयानस्य भगवतः पादसंवहनं कृत्वा तदाऽयासपरिखिन्नकायं समन्तादापाद-मौलिपर्यन्तं कराभ्यां परिमृध्य पृथक्छन्नवस्त्रं कृत्वा हस्तेन जल-पूरितनेत्रे परिमृज्य बोधितमप्यवदन्तं श्रीकान्तं पुनरप्येवमवदत् ॥9॥

मनोगतं तेऽप्यधुना करिष्ये
विचारणा नात्र कदापि कार्या ।
सत्यं मनस्थं वद तेऽशु मां च
लज्जां कृधा मा भयमप्रमेय ॥ 10 ॥

इत्युदित तद्वचनमुपसृत्य स हरिरुच्चैस्समुच्छ्वसन्नतिदुःखेन स्वमनोगतं मन्दं मन्दमुदगिरत् ॥ 11 ॥

नामोहयन्मां सुरयोषिदेका
गन्धर्वकन्या न च राक्षसी वा ।

In Public domain. Digitization Muthulakshmi Research Academy

प्रेताश्च भूताश्च पिशाचवर्गाः
मृगाश्च चोरा न भयावहा मे ।। 12 ।।

मन्नामसङ्कीर्तनतस्समस्ताः
फलायमाना हरितो विशन्ति ।
तेभ्यो भयं नास्ति हि मृत्युमृत्योः
ममानघे कुत्र भयावहोऽसि ।। 13 ।।

दृष्टा मया काचिदमेयकन्या
पद्मावतीति प्रथिता सुनाम्ना ।
आकाशपुत्री जगदेकधात्री
सा मा कृतिर्मामतिमोहयन्ती ।। 14 ।।

किं वर्णयानि शुभदे सुभगां सुरूपां
पद्मावतीं कमलपत्रविशालनेत्राम् ।
साक्षात्त्रिलोकजननीमिव सुन्दरीं तां
दृष्ट्वा मनोमदनमोहवशं गतम्मे ।। 15 ।।

पूर्णेन्दुबिम्बाननशोभिताङ्गीं
नीलालकालङ्कृतफालभागाम् ।
तां नीलमाणिक्य सुदिव्यरूपां
साक्षाद्रमाभां घटयाशु कन्याम् ।। 16 ।।

सा जन्मकोटिकृतपुण्यफलं यदि स्या-
ल्लभ्यात्र दुर्लभतरा पुरुषेण लोके ।
मत्पुण्यमद्यपरिपक्वमिवेति मन्ये
तत्कन्यकाऽतिसुलभा भविता त्वयेति ।। 17 ।।

In Public domain. Digitization Muthulakshmi Research Academy

तदर्थमेवात्र ममावतारः
कृतो वृता सापि हृदा मयाऽद्य।
ततस्सहायं कुरु मेऽङ्गनेऽस्मिन्
तथा न चेन्मे मरणं धृवं स्यात्।। 18 ।।

मत्पुत्र एव मयि पूर्वकृतं किमद्य
पश्यन्विधिर्नघटनं कृतवान्यतोऽस्याः।
तत्किं न वेद्मि जननं मम तत्कृतेऽभू-
दित्यत्र विद्धि बहुना किमु देवि नूनम्।। 19 ।।

तत्कार्यसाधनविधौ जननी पिता त्वं
भ्रातापि मातुलसुहृत्तमबन्धुवर्गः।
प्रह्लादनारदगजध्रुवमुख्यभक्ताः
सर्वं त्वमेव वकुले मम देवि नूनम्।। 20 ।।

इत्युक्ता वकुला भक्त्या वाचमूचे जनार्दनम्।
तन्मार्गं वद गोविन्द यतो गच्छामि साम्प्रतम्।। 21 ।।

जगन्मोहनसौन्दर्यं लीलामानुषविग्रहम्।
अप्राकृतममेयं त्वा कथमेषा व्यमोहयत्।। 22 ।।

का सा पुण्यवती पूर्वं किमर्थं जनिता भुवि।
तद्वृत्तमेतदखिलमद्भुतं ब्रूहि मे हरे।। 23 ।।

तच्छ्रुत्वा ततश्श्रीनिवासस्तत्पूर्ववृत्तमखिलमित्थं विवृणोति।।24।।

त्रेतायां रामरूपो दशरथवचनाद्दण्डकारण्यमेत्य
पश्चात्तत्रोटजे मत्सहजविरचिते संस्थितोऽहं स सीतः।

In Public domain. Digitization Muthulakshmi Research Academy

तद्वाक्याज्ञातु रामे मयि मृगमनुगे लक्ष्मणे प्रेषिते तां
सीतां हृत्वाऽथ लङ्काधिपतिरभवद्गन्तुकामस्सलङ्काम् ॥25॥

खले बलाद्रावणराक्षसाग्रे
विमानमारोप्य विदेहपुत्रीम् ।
गते भिया सा च तदा रुरोद
हा राम हा लक्ष्मण राघवेति ॥ 26 ॥

तदार्तरावेण तदा वनस्था
विचुक्रुशुर्दुःखतरेण युक्ताः ।
निशम्य तद्वाक्यमरङ्कृशानु-
र्बिलात्स्वलोकादपतद्धरित्रीम् ॥ 27 ॥

तदानीं खलु लोकान्तकमिव समायान्तमत्यन्तामर्ष दुराधर्षमेकाकिनीमाकर्षन्तं लोकरावणं रावणाभिदरक्षोगणाध्यक्षं क्रूरं सम्भाष्य सीता सहितेन तेन साकं पाताललोकमुपगम्य तत्र वीतिहोत्रः पवित्रस्तं पुलस्त्यपुत्रं नानाविधमधुरभाषणैरित्थमबोधयत् ॥28॥

न जानकीं यं शृणु विप्र भामिनीं
किमर्थमेतामुपयासि रावण ।
स राघवस्तां मम सन्निधौ भिया
चरन्वने न्यस्य सलक्ष्मणस्तव ॥ 29 ॥

शिष्योऽसि मेऽत्यन्त प्रियोऽसि नूनं
कल्याणकामस्तव रावणोऽहम् ।

In Public domain. Digitization Muthulakshmi Research Academy

सीताभ्रमोऽस्यामिह मा कृथास्त्वं
दास्येऽद्य तां ते निजरामपत्नीम् ॥ 30 ॥

इत्युक्त्वा तं समाधाय स्वाहायां सन्निवेश्यताम् ।
सीतां वह्निर्वेदवतीं मायां तस्मै ददौ स्वयम् ॥ 31 ॥

तदाऽग्निशिष्यत्वात्तद्दतां मायासीतां नीत्वा निजसीतां मन्यमानो रावणः जवाल्लङ्कामनातङ्कां प्रविश्य तत्राऽशोकवनिकायां शिंशुपातरुमूले क्रूरराक्षस्यनुवेष्ठितां तां संस्थाप्य सकालचोदितः खलोऽत्यन्तमबाधयत्॥32॥

रामोऽथ गत्वा हरिवीरयुक्तो
हत्वा रणे रावणराक्षसेन्द्रम् ।
लोकाऽपवाद प्रणनुत्सुरेनां
अग्निप्रविष्टामकरोत्स सीताम् ॥ 33 ॥

तत्पावकादुद्गतमाशु सीता
द्वन्द्वं यथा पद्मयुगं जलाच्च ।
दृष्ट्वाऽथ रामो निजभामिनीं ता-
मापृच्छदेषा तव का समाङ्गा ॥ 34 ॥

इति तदुदिता सीता स्वपतिं प्रतीदमवादीत् ॥ 35 ॥

मद्दुःखमेतद्धि तयानुभुक्तं
दयाजुषा मत्समवेषयैनाम् ।
स्वाहानुगां वेदवतीं सुनाम्नीं
अङ्गीकुरु त्वं तु विवाहपूर्वम् ॥ 36 ॥

In Public domain. Digitization Muthulakshmi Research Academy

इति सीतोदित प्रीतिवचनं निशम्य रघुपतिरिदमवदत् ।।37।।

मामेकपत्नीव्रतबद्धदीक्षं
जानासि सीते कथमत्र कार्यम् ।
तां द्वापरे चेद्वरदो बहूनां
कलौ करिष्ये भवदीयवाक्यम् ।। 38 ।।

तावदेषा ब्रह्मलोके ब्रह्मणा पूजिता भवेत् ।
इति श्रुत्वा रामवाक्यं सा जगाम विधेर्गृहम् ।। 39 ।।

सैषैवाद्य तस्य वियन्नृपस्य सुन्दरवरमन्दिरे दिव्यमणि-दीपिकेव पद्मावतीनामिकाऽयोनिजाऽपि तत्सुता भूत्वाऽऽविरभूत् ।।40।।

तत्कारणं मद्भणितं हि मातः
खलु श्रुतं संशयमद्य किं ते ।
तदर्थमेवात्र ममावतारः
कृतो व्रजैतत्प्रतिकर्तुमाशु ।। 41 ।।

एवमत्यन्तचित्रविचित्रं तत्पूर्वचरित्रं श्रुत्वा बकुलाऽतिकुतूहला तदा श्रीलोलमिदमवोचत् ।। 42 ।।

गच्छामि देव नरदेवसभां सभास्थै-
स्सम्पूर्णसर्वनिगमार्थविशारदैस्तै-
र्युक्तामनन्तनृपपूर्वकमाशु देवै-
स्संस्तूयमानमधुना स रमाविनोदम् ।। 43 ।।

तन्निशम्य भगवान्जगदीशश्श्रीनिवासस्तदा तां बकुलानाम-वनितां दिव्यतुरङ्गीमधिरोप्य तन्मार्गं प्रदर्शयन् गगननृपनगरीं प्रति प्रैषयत्।।44।।

In Public domain. Digitization Muthulakshmi Research Academy

तदा गता सा बकुलाश्रयाना
स्नात्वा क्रमात्कापिलपद्मतीर्थे ।
तत्रत्य देवान् हररामकृष्णान्
सम्पूज्य भक्त्या मनसा नमन्ती ।। 45 ।।
सुवर्णमुखरीं तीर्त्वा अगस्त्येश्वरमन्दिरम् ।
सा गता तत्सखीः दृष्ट्वा इदं वचनमब्रवीत् ।। 46 ।।
का यूयं कस्य सम्बन्धाः किमर्थमिह चागताः ।
वदध्वमखिलं बालाः वृत्तान्तं मे यथाक्रमम् ।। 47 ।।
तदा स्ताः कन्यकास्तां वकुलां प्रतीदमूचुः -
वयं वियद्भूधवसन्निधानं
गतास्सदा वै शृणु भामिनि त्वम् ।
पद्मावती नामक राजपुत्र्याः
प्राणैस्समास्सख्य इव स्थितास्स्मः ।। 48 ।।
पद्मावती गतदिने सुमसङ्ग्रहार्थ-
मस्माभिरेव सहितोपवनं प्रयाता ।
तत्रागतो मदनसुन्दरमूर्तिरेकः
कश्चित्पुमान् तुरगसंस्थितवान् किरतः ।। 49 ।।
तं पर्यपृच्छाम वयं तु सर्वा-
स्तेनाप्यवाच्यं भणितं तदेव ।
प्रताडितोऽस्माभिरलं शिलाभि-
र्हयो मृतस्सोत्तरदिङ्मुखोऽगात् ।। 50 ।।

In Public domain. Digitization Muthulakshmi Research Academy

गते किराते कमलोद्भवा सा
मूर्छामुपागम्य पपात भूमौ ।
वयं ततस्तामुपवेश्य याने
स्वकं वियद्राजगृहं गतास्स्मः ।। 51 ।।

नृपस्तु ताम्मूर्छगतां समीक्ष्य
चिन्तामुपागम्य रुरोद दीनः ।
अङ्के निधायात्मसुतां प्रपश्य-
न्मुखं मुदा हीनमभाषमाणाम् ।। 52 ।।

किं वा भवेन्मे दुहितुर्दुरापं
तापं च प्राप्तं किमु कार्यमत्र ।
इति प्रचिन्त्यामरपूज्यमिज्यं
तमाह्वयत्तत्र नृपस्सुतेन ।। 53 ।।

तदाऽगतं तं प्रसमीक्ष्य राजा
मत्वेव पुण्यं परिपक्वमाशु ।
सत्कृत्य दैत्यारिगुरुं प्रणम्य
पुत्र्याधिशान्तं परिपृच्छति स्म ।। 54 ।।

ततस्सुराचार्यस्सम्यग्विचार्य तद्धियन्नृपं प्रतीदमबोधयत् ।।55।।

रुद्राभिषेकं कुरु भूप सद्भि-
श्शिवस्य चैकादश संख्ययाऽशु ।
तथा कृतश्चेत्तव पुत्रिकाया-
स्तदाऽधिशान्तिर्भविता शुभं स्यात् ।। 56 ।।

एवं धिषणोक्तप्रकारेणानिमिषपथाभिधनृपेणानुशासिता

In Public domain. Digitization Muthulakshmi Research Academy

वयमेभिर्ब्राह्मणगणैस्सहेदमगस्त्येश्वरमन्दिरं प्रत्यागतास्स्मः ।।57।।

त्वं का कुतो यास्यबले प्रयासा-
त्किमर्थमत्रागमनं विचित्रम् ।
कुत्राधिवासस्तव का प्रवृत्तिः
सर्वं वदेत्येवमथाब्रुवन् ताः ।। 58 ।।

तदुक्ता बकुला तदा ताः प्रतीत्थं स्ववृत्तान्तं कथयति स्म ।।59।।

अहं तु तद्वेङ्कटशैलधाम्नो
दासी तदाज्ञा वशगाऽऽगतास्मि ।
तद्राजपत्न्यास्सविधे धरण्याः
ममास्ति कार्यं महदस्ति शस्तम् ।। 60 ।।

नारायणाख्यं पुरमप्रमेयं
दिव्यं त्वभेद्यं परदेशिभिस्तत् ।
ततो भवद्भ्यस्सह यामि सख्य-
स्तां राजधानीं धरणीं त्विदानीम् ।। 61 ।।

इत्युक्त्वा वकुलाऽबलाऽतिकुतुका तत्कन्यकाभिस्सह सङ्गम्य प्रियवल्गुवाक्यनिचयैस्तत्स्नेहमापादिता। किञ्च स्वागमकार्य-सिद्धिविषये साऽऽलोचनेन तत्परा तत्रागस्त्यमहेशमन्दिरवरे सन्तोष-युक्ताऽवसत् ।।62।।

।। इति श्रीशिरशिनहलान्वयसञ्जात-कौण्डिन्यगोत्र-
श्रीमद्वेङ्कटाचार्यपुत्र-श्रीरङ्गमाम्बागर्भसम्भूत-

In Public domain. Digitization Muthulakshmi Research Academy

श्रीकृष्णमाचार्यविद्वद्वर्यकृपालब्धविद्येन
पेरुमाण्डूलाचार्यकविना विरचिते
श्रीवेङ्कटेशचम्पूप्रबन्धे चतुर्थोऽयं स्तबकः ॥

In Public domain. Digitization Muthulakshmi Research Academy

अथ पञ्चमस्तबकः

एवं गतायां वकुला युवत्यां
शौरिर्निविश्वासमगाद्विचार्य ।
स्त्रीभिश्च कार्यं कृतमर्थसिद्धिं
नाप्नोति यत्तद्धि यथैकनेत्र ॥ 1 ॥

इत्थं विचार्य भगवानथ कामरूपो
मायापुलिन्दवनिताऽद्भुतवेषधारी ।
तद्देशभूषणमसंस्कृतभाषणं च
चक्रे स्वयं सकललोकविचित्रहेतुम् ॥ 2 ॥

सचीरचेलं शतछिद्रचोलं
प्रधृत्य बालं विधिमुग्रयष्टिम् ।
ब्रह्माण्डमेनं परिकल्प्य गुल्मं
योषाकृतिं संविदधे विशेषाम् ॥ 3 ॥

सा धर्मदेवी शतपञ्चवर्षा
वृद्धासु गुञ्जामणिशङ्खहारा ।
लम्बोदरी लम्बपयोदरी चा-
प्यदन्तशुष्काननलम्बकर्णा ॥ 4 ॥

यष्टिं त्ववष्टभ्य करे च वस्त्रे
मुदा शिशुं मूर्ध्नि च वेणुगुल्मम् ।

In Public domain. Digitization Muthulakshmi Research Academy

धृत्वा वियद्भूपपुरं प्रविश्य
वीथ्यां तथा नृत्यति गर्जयन्ती ॥ 5 ॥

भूतं भविष्यं त्वथ वर्तमानं
मनोगतं सर्वमपीरयामि।
सुतान्सतीन्बन्धुगणांश्च सर्वान्
ददामि पौरास्त्वरिता भवन्तु ॥ 6 ॥

इतीरितं तद्वचनं निशम्य
पौरा गतास्ता धरणीं तदाऽऽहुः।
आनीय शीघ्रं त्विह धर्मदेवी
सुताङ्गशोषं प्रतिपृच्छ देवि ॥ 7 ॥

तदानीमेवैवं सुव्यक्तं तदुक्तया तया तदाऽऽनयनायाज्ञापिता स्ताः पुरवनितास्तदा गतास्तां धर्मदेवतां नर्मवाग्भिराहूय अये धर्मदेवि त्वामनन्तराजपत्नी समाह्वयतीत आयाहीत्युक्ता सा तास्तदेदमवादीत्॥8॥

अहं दरिद्रा कुटिला प्रवृद्धा
सा भाग्ययुक्ता युवतिश्च राज्ञी।
किमर्थमाह्वानमहो विचित्रं
नायामिहास्यार्थमिदं हि सर्वम् ॥ 9 ॥

मत्पुत्रमेनं शिशुमन्नहीनं
मद्वेणुगुल्मं नवधान्यपूर्णम्।
दृष्ट्वा च मां सा परिहासितुं वा
नैवागमिष्यामि किमत्र कार्यम् ॥ 10 ॥

In Public domain. Digitization Muthulakshmi Research Academy

इत्युक्तां तदुक्तिं श्रुत्वा तास्तां धरणीं प्रति तदुक्तं सर्वमाचख्युः।।11।।

तां धर्मदेवीमथ राजपत्नी
स्वयं गता तत्र समाह्वयत्सा।
याह्यत्र भद्रे शुभदायिनि त्वं
मद्दैव योगादिह चागतासि ।। 12 ।।

एवमुक्त्वा स्तुत्वा गत्वा च तां धर्मदेवतां साक्षात्प्रत्यक्षदेवतामिव मन्यमाना तदा स्वान्तःपुरमानीय तत्र विचित्रतरकनकरत्नचित्रितासनमधिरोप्य मज्जनभोजनताम्बूलवस्त्राद्यलङ्कारैस्सत्कृत्य सा विनतिपूर्विकामिमां वाचमुवाच ।। 13 ।।

सत्यं मनस्थं मम धर्मदेवि
सर्वं वदाद्यात्मभवाधिहेतुम्।
मद्दुःखदूरीकरणाय मन्ये
प्रत्यक्षदेवी त्वमिहागतेति ।। 14 ।।

इत्थं तदुक्तिं निशम्य सा धर्मदेवता तदा तां धरणीं प्रत्येवमाह।।15।।

मया यदुक्तं वचनं हि सत्यं
भवेन्नचेत्तच्छृणु भामिनि त्वम्।
निष्कास्य मामद्य पुराद्बहिस्ते
मद्धस्तभङ्गं कुरु देवि शीघ्रम्।। 16 ।।

इत्युक्त्वाऽनन्तरमनन्तराजपत्न्या गुरुतरगुरुदेवं नमस्कारादिकं कारयित्वा स्वयं वायनादिकं गृहीत्वाऽनुक्तमूल्यमुक्ताफलतण्डुल-

In Public domain. Digitization Muthulakshmi Research Academy

प्रपूरितं सुवर्णशूर्पवरमानीय तदा धर्मदेवता पूर्वाभिमुखी भूत्वा स्वपुत्रमङ्के निधाय पुरतो गुल्ममास्थाप्य पादावास्तीर्य संस्थितौ सत्यादौ नारायणं पश्चाल्लक्ष्मीं च ध्यात्वा ततः पितामहं सरस्वतीं शिवं शिवां च शचीशं शचीञ्च तथेन्द्राद्यष्टदिक्पालकान्सूर्यादि-नवग्रहान्देवर्षिराजर्षिगणपितृगणगन्धर्वगणांश्च काशीगयाप्रयागादि-पुण्यक्षेत्राणि तत्रत्य देवताश्च श्रीरङ्गादिदिव्यक्षेत्राणि तत्रत्य दिव्य-देवताश्च गङ्गादिपुण्यतीर्थानि सर्वाणि संस्मृत्य तथा मूकाम्बिकां भैरवं कालभैरवञ्च कामाक्षीं कमलाक्षीं च ध्यात्वा हे रमे कोल्लापुर-अध्यक्षे पाहि मां परदेशगामित्यतिभक्तिभावेन स्मृत्वा नत्वा च ततस्तां धरणीं प्रत्यवोचत् ।। 17 ।।

सत्यं वचो मे न कदाप्यसत्यं
सर्वं शपे त्वत्र सुतं च गुल्मम् ।
भर्तारमाद्यं बदरीनिवासं
गुरुं च मातापितरौ च बन्धून् ।। 18 ।।

मद्भर्ता परमः श्रीमान्नरनारायणो हरिः ।
तदाऽज्ञां शिरसा धृत्वा सम्प्राप्ता तव मन्दिरम् ।। 19 ।।
मदाश्रितानां सर्वेषां मनोगतमथेप्सितम् ।
भूतं भव्यं वर्तमानं वदामि नृपवल्लभे ।। 20 ।।

कठिनं मम वाक्यमेव चे-
दनृतं तत्कुरु हस्तच्छेदनम् ।
श्रुणु राज्ञि मयोदितं च य-
त्सकलं सत्यमितीह विद्धि तत् ।। 21 ।।

In Public domain. Digitization Muthulakshmi Research Academy

इत्युक्त्वा तत्करे न्यस्य वरां यष्टिं शुभप्रदाम् ।
वदामि श्रुणु भद्रे त्वं दुहितुस्तेऽङ्गशोषणम् ।। 22 ।।
आगतं पुरुषेणास्याः मन्मथाकृतिना शुभे ।
सविस्तारं प्रवक्ष्यामि तन्निबोध शुभानने ।। 23 ।।

सुता सखीभिस्सह ते सुमार्थं
गताऽगतं तत्र वनं दिने ह्यः ।
कञ्चित्स्मराकारनरं निरीक्ष्य
मुमोह कामज्वरपीडिता सा ।। 24 ।।

ततोऽस्या अभवद्राज्ञि दुहितुस्तेऽङ्गशोषणम् ।
तच्छान्त्यर्थं वरारोहे देया तत्पुरुषाय वै ।। 25 ।।

इत्थं तद्धर्मदेवतोक्तां सा धरणीदेवी स्वयं कदाप्यश्रुताम् अननुभूतामदृष्टपूर्वां स्वदुहितृविषयकां प्रवृत्तिं निशम्यात्यन्तपरितप्तचित्तासतीत्थं तां प्रति व्यजिज्ञपत् ।। 26 ।।

तस्मै देयेति वाक्यं तदुपशमनकृद्धेतुनोक्तं त्वयाद्य
कस्मै देया मदीयाऽपरिचितचरितायाऽत्मजा राजकन्या ।
सः को वाऽज्ञातवासः कुलमपि सकलं तस्य गोत्रा किं वा
हा कष्टम्मे प्रभूतं कथमिह वद तद्देवि सर्वं विचार्य ।।27।।

अथ धर्मदेवता तां प्रति तत्समधिगतसंशयनिवारणायेदम् अभाषत।।28।।

वैकुण्ठवासी हरिरेव साक्षा-
दिहाऽगतो वेङ्कटशैलमूर्ध्नि ।

In Public domain. Digitization Muthulakshmi Research Academy

सश्श्रीनिवासाभिधया प्रसिद्धः
विद्वान्विवेकी धनवांश्चकास्ते ।।29।।

पुत्र्या हतस्तवहयोत्तम एव यस्य
तत्पृच्छ तत्प्रियसखीः पतितो मृतोऽभूत् ।
आरामकस्य निकटे जगदीश्वरेण
तेनैव तत्कृतमघः क्षमितं च सर्वम् ।। 30 ।।

सत्यं हि वच्मि श्रुणु राज्ञि सुता तवाद्य
दत्ता सुखं यदि भवेत्पुरुषाय तस्मै ।
नोचेत्सुखेतरमनन्तमतः परं सा
प्राप्नोति चाद्य मरणं दिवसैकमात्रम् ।। 31 ।।

तदा तद्वचनादतिभीतां रुदन्तीं वसुमतीं राज्ञीमयाचिता मया सुता कस्मै देयेत्यत्यन्तचिन्ताकुलस्वान्ता तां प्रति धर्मदेवी इदमब्रवीत्।।32।।

अयाचितेयं कथमद्य देये-
त्याशङ्कमाना न भवात्र राज्ञि ।
इहागमिष्यत्यबला सुवृद्धा
प्रष्टुं सुतां ते घटिकोत्तरेण ।। 33 ।।

नायाति यावदबला तव सन्निधिं सा
तावच्च ते पतिसुतान्सुहृदात्मबन्धून् ।
सम्बोध्य सर्वमथवा भव निश्चितात्मा
सङ्कल्पमत्र कुरु मत्सविधे तदीयम् ।। 34 ।।

In Public domain. Digitization Muthulakshmi Research Academy

इत्येवं बहुधाऽप्युक्तं तद्धर्मदेवतावचस्सत्यमित्यत्र तं विश्वसन्ती वियन्नृपसती तथाऽतिभीतमतिः परिचिन्तयन्ती तां धर्मदेवतां प्रतीदमवादीत् ।।

केनाप्युपायेन च येन पुत्री
मे जीविता स्याद्भवदीयवाक्यात् ।
तस्मै हि दास्यामि सुतां मदीयां
शपे पतिं तद्गिरिवासिनेऽपि ।। 36 ।।

तदा धर्मदेवताऽतिकुतुका स्वागमनकार्यं सर्वं निर्वर्त्य स्वधामप्रति गन्तुकामा सतीदमभाषत ।। 37।।

एवं कृतं चेन्नृपदेवि नूनं
सुजीविता ते भविता सुताऽद्य ।
मद्वाक्य विश्वासपरा भव त्वं
व्रजाम्यहं मत्पतिसन्निधानम् ।। 38 ।।

ततस्तथोक्त्वा वरधर्मदेवी
पुराद्बहिश्शीघ्रतरं प्रयाता ।
कक्षे सुतं मूर्ध्नि सशूर्पगुल्मं
धृत्वा ययावुत्तरदिङ्मुखी सा ।। 39 ।।

एनं विचित्रीकृतरूपमस्य
हरेश्च तत्प्राकृतवैखरीं च ।
तद्द्रष्टुकामास्ससुतास्सदाराः
खेऽवस्थिताः प्रोचुरिदं सुरेशाः ।। 40 ।।

In Public domain. Digitization Muthulakshmi Research Academy

तया कृतं किं सुकृतं हि पूर्वं
ययाऽधुना तत्र खराजपत्न्या।
लक्ष्मीसहायो भगवान्मुरारिः
संसेव्यते प्राकृतवेषधारी ।। 41 ।।

मुहुर्मुहुस्ते जगदीश्वरीं तां
प्रणम्य तच्चित्र पवित्रलीलाम्।
बुधाश्च सर्वे बहुधा स्तुवन्तः
ययुस्स्वधामानि मुदावहानि ।। 42 ।।

एवं विधं तज्जगदीश्वरस्य
चित्रं चरित्रं विबुधा स्तुवन्ति।
कलौ युगे पापकृतां नराणाम्
उत्तारणार्थं जगदीशचेष्टा ।। 43 ।।

।। इति श्रीशिरशिनहलान्वयसञ्जात-कौण्डिन्यगोत्र-
श्रीमद्वेङ्कटाचार्यपुत्र-श्रीरङ्गमाम्बागर्भसम्भूत-
श्रीकृष्णमाचार्यविद्वद्वर्यकृपालब्धविद्येन
पेरुमाण्डूलाचार्यकविना विरचिते
श्रीवेङ्कटेशचम्पूप्रबन्धे पञ्चमोऽयं स्तबकः ।।

In Public domain. Digitization Muthulakshmi Research Academy

अथ षष्ठस्स्तबकः

अथ वसुमती सती चाश्रुमती स्वसुतानिकेतनं प्राप्यातिदुःखिता भृशं रुदन्ती सत्येवं तामवोचत् ॥1॥

मनोगतं ते प्रवदिष्यसि त्वं
न किञ्च मां मातरमप्यवेक्ष्य ।
लोके शुभे मातृसमं हि मित्रं
न विद्यते तत्खलु पुत्रिकाणाम् ॥ 2 ॥

किं गोपितं स्यान्मम भामिनि त्वं
वृथाङ्गशोषं कुरुषे किमर्थम् ।
कार्यंत्वकार्यं वद शीघ्रमद्य
करोमि पूर्वं तव तन्मनस्थम् ॥ 3 ॥

एवं प्रभाषमाणामप्यभाषमाणां स्वसुतां तामुच्चैरुदन्ती वसुधासती पुनरप्येवमभाषत ॥ 4 ॥

सुते त्वमेतत्छृणु भाग्यहीनां
मां किञ्चिदप्यद्य न भाषसे चे-
द्विषं हि प्राश्यान्तमहं गमिष्ये
त्वया विना मे खलु जीवितं धिक् ॥ 5 ॥

इत्थं विलपन्तीं तां स्वमातरमालोक्य तदा पद्मावती किञ्चिदात्मगतं मन्दं मन्दमेवं वदति स्म ॥ 6 ॥

In Public domain. Digitization Muthulakshmi Research Academy

स्त्रीणां हि कष्टं कतिचित्परेषां
केषाञ्चिदर्थास्त्वतिगोपनीयाः ।
वक्तुं न योग्यास्स्वयमेव लोके
कथं वदिष्ये किमिति स्वतोऽम्ब ॥ 7 ॥

काङ्क्षोदिता सम्प्रति मेऽद्य तां तु
वक्तुं न शक्नोमि तथा स्वतोऽम्ब ।
तथापि वक्ष्याम्यतिगोपितां तां
मातृत्वहेतोस्तव देवि सर्वाम् ॥ 8 ॥

त्वयाऽज्ञप्ता गता ह्योऽम्ब सुमारामं सखीयुता ।
तत्र कश्चित्पुमान्प्राप्तः पुराणपुरुषोत्तमः ॥ 9 ॥

मातस्स्मरामि मनसा सततं महान्तं
तं पुण्डरीकनयनाञ्चितदिव्यवक्त्रम् ।
कन्दर्पदर्पहरसुन्दरदिव्यगात्रं
श्रीशं त्रिलोकजनकं श्रितपारिजातम् ॥ 10 ॥

तद्दर्शनधिया मेऽद्य जायते मेऽङ्गशोषणम् ।
तं विना न हि जीवामि सत्यमित्यवधारय ॥ 11 ॥

एवं तदुक्तं निशम्य तथैव स्वात्मजात्मगतमखिलं ज्ञात्वा ततः पुत्र्यङ्गसंशोषणसंक्षुब्धहृदयचिन्तासन्तापसंयुतं स्वपतिं प्राप्य तस्मै सविनया स्वकायसंशोषणकारणं तथा तद्धर्मदेव्युक्ततन्निवारण-कारणं च सर्वमतिकुतुकमतिर्वसुमती वियन्नृपसती न्यवेदयत् (अत्रान्तरे) ॥ 12 ॥

In Public domain. Digitization Muthulakshmi Research Academy

समागतास्तद्वकुलान्विताास्ताः
स्त्रियो महेशं त्वभिषिच्य शीघ्रम् ।
समस्तसम्भारभरान्वहन्त्यः
अगस्त्यदेवालयतो द्विजेन्द्रैः ॥ 13 ॥
तदाऽगतान्तान् प्रसमीक्ष्य राजा
स्रक्चन्दनाद्यैरखिलैर्विशेषैः ।
सम्पूज्य सर्वानथ तत्र पुत्रीं
सम्मार्जयत्तैर्द्विजवेदमन्त्रैः ॥ 14 ॥
ततो धरित्री बहिरागता तां
विलोक्य सौम्यां वकुलां नवीनाम् ।
तत्तक्षणादेव हि धर्मदेव्याः
स्मृत्वा वचस्तत्सविधं प्रपेदे ॥ 15 ॥
सूर्यातपाज्जातशरीरतापं
चन्द्रावलोकौ त्यजतीव लोकः ।
पुत्र्यङ्गसंशोषणजाततापं
जहात्यसौ तद्वकुलावलोकात् ॥ 16 ॥
स्वकन्यकाभिस्सह तत्प्रवृत्तिं
ज्ञात्वाऽथ तां सद्बहुमानपूर्वम् ।
निवेश्य भद्रे घनरत्नपीठे
सुखोपविष्ठां वकुलां बभाषे ॥ 17 ॥
त्वत्स्वागतं मे सुकृतस्य मूलं
कृतार्थमात्मानमहं तु मन्ये ।

In Public domain. Digitization Muthulakshmi Research Academy

किमर्थमत्रागमनं तवाद्य
किमस्ति कार्यं वद देवमातः ॥ 18 ॥

इत्युक्ता वकुलादेवी बभाषे धरणिं प्रति ।
कन्यापेक्षा मुख्यकार्यं पुनः कार्यशतेन किम् ॥19॥

तच्छ्रुत्वातिप्रकृष्टहर्षोत्पुल्लपुलकाङ्कितगात्रा सती धरणी तां प्रति अपृच्छत् ॥ 20 ॥

को वा वरः कश्च निवासदेशः
कौ तस्य मातापितरौ वयः किम् ।
किं तस्य गोत्रं किमु तच्चरित्रं
कीदृक्प्रवृत्तिर्वद देवि सर्वम् ॥ 21 ॥

तदा वकुलाऽबलाऽतिकुतूहलैवं वदति स्म ॥ 22 ॥

श्रुणु राज्ञि प्रवक्ष्यामि गोत्रनक्षत्रबान्धवान् ।
देवकीवसुदेवौ तु पितरौ तस्य सम्मतौ ॥ 23 ॥

तस्य प्रशस्तहिमरश्मिकुलं प्रसिद्धं
वासिष्ठगोत्रममलं श्रवणं च ऋक्षम् ।
नाम्ना तथैव भुवि कृष्ण इतीरितोऽसौ
संराजतेऽद्य वरवेङ्कटशैलधाम्नि ॥ 24 ॥

विद्यावान्धनवांवाग्मी रूपवान्गुणसम्मतः ।
विवाहकालयोग्योऽयं वयसा पञ्चविंशकः ॥ 25 ॥

तच्चरित्रं जगच्चित्रं पवित्रमिह विद्यते ।
किं बहूक्तेन मे देवि प्रत्यक्षमिह पश्यसि ॥ 26 ॥

In Public domain. Digitization Muthulakshmi Research Academy

तत्सर्वं निशम्योर्वीसती सशङ्कासती पुनरप्येवं परिपृच्छति ।।27।।

सभाग्यसम्पन्नगुणाधिकश्चेत्
कुतोऽभवन्नैवकृतो विवाहः ।
एतावदित्येवमतीव शङ्का
जाता शुभे मे भवदीयवाक्यात् ।। 28 ।।

तदानीं वकुलाऽतिव्याकुलाऽनन्तरं विचार्य तत्समयानुकूलप्रयुक्तिं कल्पयित्वा तामेवं समाधत्ते ।। 29 ।।

कृतं च वैवाहिकमेव बाल्ये
देवी रमा तस्य समुद्रपुत्री ।
तत्रानपत्यत्वमवेक्ष्य भूयः
प्रेम्णा द्वितीयां त्वथकर्तुमैच्छत् ।। 30 ।।

तद्वृत्तमेवमखिलं विशदं निशम्य
पुत्रेण नीतमनुगं स्वपतिं तदा सा-
-प्यूचे गुरुं गुरुतरं त्वरमानयाहि
शैलात्सुतार्थममला वकुलाऽगतेति ।। 31 ।।

पद्मावतीहृद्गतमेतदेव
तद्धर्मदेवीवचनं तदेव ।
सर्वं समालोच्य वरस्य वृत्तं
कन्याप्रदानं कुरु देव शीघ्रम् ।। 32 ।।

इति तदुदितश्रुतिपुटपेयामृतवाक्यपटलात्सनृपतिरमन्दान-

In Public domain. Digitization Muthulakshmi Research Academy

न्दभरितस्वान्तस्स्वात्मानं धन्यं मन्यमानोऽत्यन्ततृषाविवशीकृतकाले वलाहकोदकपतनाच्चातक इव पन्नगनगेशजगदीशमुद्दिश्य कन्यार्थं वकुलाऽगमनात्प्रकर्षेण हृष्टस्सन् तदा पद्मावत्यनुरूपसुरूपवरलाभैक-विषयदुरन्तचिन्तान्तमध्यगच्छत्।।33।।

तत्क्षणे तं धिषणं सुतेन
स्वर्गात्समानीय विचारणाय ।
सत्कृत्य शीघ्रं विधिवन्नृपस्तं
इदं त्ववोचद्विनयान्वितस्सः ।। 34 ।।

भो सुरगुरो विदितं खलु सर्वं भवता श्रीनिवासस्य सम्बन्धवैशिष्ट्यं पन्नगनगादागता वकुला नाम वनिता कन्यार्थं तदर्थं भवदनुमोदितः पद्मावती परिणयकरणोत्सुकोऽहमतो भवतो यदि रोचते तदाज्ञाधीयताम् इत्यत्यन्तं तं प्रार्थये ।। 35 ।।

इत्थं प्रणतिपूर्वकभणितनृपभाषणं निशम्य निपुणधिषणो-धिषणस्तं प्रत्यभाषत ।। 36 ।।

आश्रित्य वृक्षं सफलं धरित्र्यां
जीवन्ति भूतानि यथा बहूनि ।
तथा वयं भाग्ययुतं भवन्त-
माश्रित्य जीवाम इहैव देव ।। 37 ।।

कदाचिदेवात्र समागतोऽहं
स्थितिं न जानामि रमापतेश्च ।
सम्यग्विजानाति शुकस्तु सर्वं
तद्वृत्तमत्रानय तं तु शीघ्रम् ।। 38 ।।

In Public domain. Digitization Muthulakshmi Research Academy

तन्निशम्याथ वियन्नृपतिरपि वाक्पत्युक्तप्रकारेण सत्वरं स्वभ्रातरं तोण्डमानं श्रीशुकमुनितिलकानयनाय तं प्रैषयत् ।।39।।

स तोण्डमानोऽप्यथ वायुवेगा-
द्रथेन गत्वाऽग्रजसन्नियोगात् ।
तं ध्यानयोगाच्च विरम्य संस्थं
दृष्ट्वा च नत्वा मुनिमाबभाषे ।। 40 ।।

पद्मावती परिणयार्हवयः प्रयुक्ता
तां कन्यकामहिगिरीशवराय दातुम् ।
भूपस्तु काङ्क्षति मुनेऽद्य तदर्थमेव
सस्त्वां समाह्वयति शीघ्रतरं प्रयाहि ।। 41 ।।

ततस्सश्शुकमुनितिलकस्तद्भणितकल्याणवाणीमाकर्ण्य तत्क्षणादेवाक्षीणसम्भ्रमादुत्थाय सम्भ्रमाद्विभ्रमन्निव तदा स्वकरमण्डित-कमण्डलुं भिन्दन् कृष्णाजिनं छिन्दन् अनर्घमणिमालां च विच्छिद्य प्रकृष्टहर्षेणात्यन्तपुलकितगात्रस्सन्मुहूर्तमित्थं सन्नृत्य ततस्सबुद्धि-वशङ्गतस्तमेवमवादीत् ।।42।।

साधूदितं भूपकुलावतंस
त्वयाऽधुना वेङ्कटशैलधाम्ने ।
सुताप्रदानं सुकृतस्य मूलं
समस्तलोकस्य मुदावहं तत् ।। 43 ।।

तस्याद्य वेङ्कटपतेस्स्वसुतां प्रदातुं
या बुद्धिरत्र जनिता भुवि सा सुजाता ।

In Public domain. Digitization Muthulakshmi Research Academy

प्राक्जन्मकोटिकृतपुण्यफलातिरेकात्
दैवादियं च जनितेति दृढं हि मन्ये ॥ 44 ॥

आकाशराजधिषणा श्रीनिवासकृपाबलात् ।
महादानवरादेत्थं वृद्धिर्भूयाद्दिने दिने ॥ 45 ॥

इत्याशिषाऽनिमेषपथाभिदवसुधाधिपमभिनन्द्य समुनिरथ पद्मसरसि अवगाह्य तत्रोपासितमाध्याह्निकसन्ध्यावन्दनादिकस्तदा जीर्णोपबर्हणानुत्छृज्य प्रत्यग्रकुशाग्रग्रथितकिरीटकटकाङ्गुलीयककवच-कर्णकण्ठभूषणानि अलङ्कृत्यापादलम्बिकृष्णामृगत्वक्कवचैः अलङ्कृतस्सन्नथ तुरङ्गवरमधिरुह्य स नृपानुजोवियन्नृपनगरं प्रत्यागच्छत् ॥46॥

स्वदेहभासां विसरैर्ज्वलन्त-
माशान्तमायान्तमिवांशुमन्तम् ।
विलोक्य मौनिं वियदाख्यभूपो
ननाम भक्त्या सबलोऽभियातः ॥ 47 ॥

ततो निवेश्य स्वनिकेतनान्तः
पुरे मुनीनां प्रवरं स राजा ।
सम्पूज्य सम्यग्धिषणाग्रतस्तं
विद्यातपोज्ञानखनिं बभाषे ॥ 48 ॥

भगवान् श्रीशुकमुनितिलकभवदनुमोदितः पद्मावतीं पन्नग-नगनिवासाय श्रीनिवासाय दास्यामीति ममाभिलषत्येषा मनीषा भवता यथाभिलाषामाज्ञा दीयतामित्यत्यर्थं प्रार्थये ॥49॥

In Public domain. Digitization Muthulakshmi Research Academy

तच्छुत्वा शुकमुनितिलकस्तदाऽमन्दानन्दजलधिमग्नस्सन् अतिकुतुकयुतमेवमभाषत ॥50॥

धन्योऽसि राजन्तवबुद्धिरेषा
जिता हरेस्तस्य कृपाबलाद्वै
सन्देहमत्राण्वपि मा कुरुष्व
तद्दानकर्मण्यति शोभनं ते ॥ 51 ॥

कुलं पवित्रं गतमद्य भूमौ
दिवङ्गतास्ते पितरस्तु सर्वे ।
त्वया कृतं किं सुकृतं हि पूर्वे
यतो हरिस्त्वद्दुहितुः पतिस्स्यात् ॥ 52 ॥

धन्याः कृतार्थाश्च वयं तवाद्य
सङ्गाद्धरिं तं प्रभुमीक्षमाणाः ।
आराध्यनित्यं तपसा यतोऽयं
नालोकयामः फलमूलतृप्ताः ॥ 53 ॥

त्वत्तोऽधिकः कोऽन्यतरो हि लोके
नास्त्यत्र भूतो भविता न कश्चित् ।
जामातृभावं गतवान्मुकुन्दः
यतस्ततस्त्वं खलु पुण्यवान् स्याः ॥ 54 ॥

एवं विष्णुपथाभिधभूधवं तमुक्त्वा तूष्णीमास कार्ष्णद्वैपायनिः स भगवान्मुनिः ॥ 55 ॥

तत शुकमुखाब्जविनिसृतवचोमृतमापीय श्रुतिपुटाभ्याम्

In Public domain. Digitization Muthulakshmi Research Academy

अतिकुतुकमतिः क्षितिपतिरत्यन्तमात्मानं धन्यं मन्यमानस्तदनन्तर-कर्तव्यकोविदार्यं सुराचार्यं प्रणतिपूर्वकमेवं व्यजिज्ञपत् ।।56।।

पद्मावती वेङ्कटशैलदाम्नोः
गतिर्ग्रहाणामुभयोर्बलैक्यम् ।
नक्षत्रयोगम् ऋषिगोत्रयोगं
पश्यन् गुरो ब्रूहि विचार्य सर्वम् ।। 57 ।।

ततो बृहस्पतिस्तत्र्यत्यां त्वां वकुलां श्रीनिवासस्य जन्म-नक्षत्रं गोत्रं चापृच्छत् ।। 58 ।।

तदा तं वकुला प्रत्यवादीत् ।। 59 ।।

अजन्मनस्तस्य कुतो भजन्म
तथापि लोके खलु तद्विशिष्टम् ।
वशिष्ठगोत्रं प्रवदन्ति सन्तः
मत्स्यादिरूपस्य हरेर्मुरारेः ।। 60 ।।

अनन्तरमनन्तभूपतिरेवमवदत् ।। 61 ।।

अयोनिजायाः खलु पद्मजायाः
जन्मोडुतामप्युडुराड्विचित्रम् ।
गतोऽत्रिगोत्रं प्रवदन्ति सन्तः
सीतादिरूपप्रथितादिलक्ष्म्याः ।। 62 ।।

एवमुभयोर्जन्मनक्षत्रं गोत्रादिकं श्रुत्वाऽथ सुरगुरुस्तत्सर्वं विचार्य ग्रहनक्षत्रगोत्रयोनिनाडिराशिकूटादिकं सर्वं सम्यग्विशेषतया सुसम्पन्नं किमपि नात्रसन्देहस्सत्वरं बन्धुमित्राद्यखिलजनैस्सम्मन्त्र्य

In Public domain. Digitization Muthulakshmi Research Academy

महापुण्यनिदानं कन्यादानं कुर्वित्याकाशोर्वीपतिमर्वागादिदेश ।।63।।

सम्मन्त्र्य सर्वैरथबन्धुमित्रैः
पौरैश्च वृद्धैरनुमोदितस्तैः ।
सरत्नसिंहासनगस्सभाया-
मुद्धृत्य राजा भुजमेव मूचे ।। 64 ।।

पद्मावतीं प्रदास्यामि पन्नगाचलवासिने ।
भवन्तो बान्धवास्सर्वे दयां कुर्वन्तु मां प्रति ।। 65 ।।

इत्थं कन्यादानवाग्दानसङ्कल्पमविकल्पं कृत्वाऽनन्तरकर्तव्य-कार्यं प्रति स नरपतिस्तत्प्राज्ञं सुरदैवज्ञं व्यजिज्ञिपत् ।।66।।

तदा गुरुरव्यप्राकृतस्य यत्प्राकृतम् अमेयस्य यदननुमेयम् आनन्दा-द्यहेयककल्याणगुणस्य यदनुगुण्यम् अवाप्तसमस्तकामस्य यत्काम्यमच्युतस्यापि यदौचित्यं तत्सर्वं सम्यग्विचार्य बृवन् तेन राज्ञा तस्मै श्रीकल्याणमहोत्सवसमाह्वानलेखामेवं व्यलेखयत् ।।67।।

❁❁❁❁❁❁❁❁❁

श्रीः

अप्राकृतानन्दमयाय देव
देवादिदेवाय जगन्नियन्त्रे ।
नित्याय सत्याय निरामयाय
स्वस्त्यस्तु श्रीवेङ्कटशैलधाम्ने ।। ६८ ।।

त्वत्पादपद्मसंवीक्षा कामुकोऽऽकाशनामकः ।
आशीर्वादं पुरस्कृत्य बन्धुत्वाद्बन्धुवत्सलः ।। ६९ ।।

In Public domain. Digitization Muthulakshmi Research Academy

उभयोः कुशलप्रश्नानन्तरं लिखिता मया ।
विज्ञापनां मदीयां च श्रुणु देव दयानिधे ॥ ७० ॥

पद्मावतीं प्रदास्यामि पद्मजातामयोनिजाम् ।
दास्यामि विष्णवे तुभ्यं कन्यादानपुरस्सरम् ॥ ७१ ॥

वैशाखशुक्लदशमी भृगुवासरेऽच्छे
रात्रौ शुभग्रहयुते शुभदे सुलग्ने ।
सर्वैस्सुपर्वमुनिबृन्दगणैस्समेत्य
पद्मावतीशुभकरग्रहणं कुरुष्व ॥ ७२ ॥

❀❀❀❀❀❀❀❀❀

इत्थं लिखित्वा शुभपत्रिकां तु
तदा नरेशो जगदीशधाम ।
सम्प्रेषयामास शुकं मुनीशं
सम्बोध्य सर्वं वरदक्षिणादिम् ॥ 73 ॥

ततश्शुकोऽहीशगिरीशधाम
मध्यं गते भानुमतिप्रयातः ।
यथाऽतिभक्त्या व्रजगोकुलेशं
अक्रूरनामा यदुवंशदीपः ॥ 74 ॥

तदानीमेव मातृभूता बकुलानाम वनिता किमर्थमेतावत्पर्यन्तं नागतेति चिन्तानिमग्नस्वान्त इव स्थितः श्रीकान्तस्स्वसमीपमायान्तं तपोवन्तं शिरः पाणिं पदे पदे प्रणमन्तं श्रीशुकमुनिकान्तं दृष्ट्वा धृततरमासनादुत्थितस्सः प्रकृष्टहर्षेणेदमवोचत् ॥75॥

In Public domain. Digitization Muthulakshmi Research Academy

कार्यं मदीयं सफलं सुजातं
मन्येऽद्य मौने तव दर्शनेन ।
भवादृशानां महतां हि सङ्गात्
किं किं न कार्यं सफलं भुवि स्यात् ॥ 76 ॥

तच्छ्रुत्वा शुकोऽप्येवं सभक्तिहर्षोद्रेकं भणति ॥ 77 ॥

तत्कार्यमार्य करुणावर देवदेव
सर्वं न केवलमहो मम जन्मपक्कम् ।
यद्वेदगोचरमनन्तगुणं महान्तं
पश्यामि चाद्य पुरुषं परमं भवन्तम् ॥ 78 ॥

इत्युक्त्वाऽतिभक्त्या दण्डवत्प्रणमन्तं मुनिगणतिलकं श्रीशुकं सम्यगाश्लिष्य सुखासीनं तमतिचित्रविचित्रचरित्रो भगवान् इदमाह श्रीजानिः ॥79॥

वदन्ति लोकास्त्वनृतान्यजस्रं
विवाहकार्ये नरजन्मनो ये ।
ते यान्तिमद्धाम किमत्र वाच्यं
जगत्कुटुम्बस्य विवाहकार्ये ॥ 80 ॥

नरो बिभर्ति स्वसुतं स्वभार्यां
स्वबन्धुमित्रं स्वजनं गृहञ्च ।
ब्रह्माण्डमेनं भवनञ्च विद्धि
ब्रह्माऽत्मजो मे वरनाभिजन्मा ॥ 81 ॥

याश्रीर्ममाद्यानुचरी शुभाङ्गी
सर्वे प्रजा ये मम चौरसास्ते ।

In Public domain. Digitization Muthulakshmi Research Academy

जीवास्त्वनेके भुवि सन्ति तेषां
संरक्षणेऽहं खलु बद्धदीक्षः ॥ 82 ॥

महाकुटुम्बस्य ममास्य मौने
विवाहकार्ये भवताऽत्र मिथ्या ।
यद्भाषितं ते प्रतिदातुमस्य
कृतोपकारस्य न चास्ति किञ्चित् ॥ 83 ॥

तस्माद्धरिष्टं सर्वस्मात्मदङ्गालिङ्गनं तव ।
दास्यामि शुभदं मौने सर्वैरपि सुदुर्लभम् ॥ 84 ॥

यथा हि पूर्वं कृतवान् हरीशो
सीतानिमित्तं वरकर्म चित्रम् ।
तस्माद्धरिष्टं भवता कृतं य-
त्तत्कर्म मन्ये मुनिराण्मदर्थम् ॥ 85 ॥

एवं भगवदुक्तप्रियोक्तिभिरत्यनुक्तानन्दसन्दोहाम्बुधिमग्नम्-अनुद्विग्नमानसं तापसाधीशं तद्भक्तिपरवशतया विस्मृतस्वागमन-प्रयोजनं तं विलोक्य तत्कक्षविनिक्षिप्तशुभलेखां पश्यन् भगवन्तव कक्षे किं विभाति भानुवत्तदित्यवोचद्भगवान् शार्ङ्गपाणिः ॥86॥

तदा स्मृतिवशंगतस्समुनिरधः स्वकक्षस्थां शुभपत्रिकाम् आदायेदं वदन् तस्मै अददात् ॥87॥

गृहाण कल्याणगुणैकसिन्धो
कल्याणलेखां लिखितां नृपेण ।
इमां समालोक्य विलिख्य देहि
प्रत्युत्तरेणान्वितपत्रिकाञ्च ॥ 88 ॥

In Public domain. Digitization Muthulakshmi Research Academy

इत्युक्तश्श्रितजनानुरक्तश्श्रीसक्तो भगवान् श्रीनिवासस्तत् प्रसादितामाकाशनरेशलिखितां मुक्ताफलमालातुल्यसुव्यक्तशुभाक्षर-मालाविराजितां शुभलेखां शिरसा धृत्वा तां सम्यगालोक्य तदाऽति-कुतूहलमलभत।। 89।।

ततस्सपत्रं व्यलिखद्विचित्रं
स्वयं पवित्रं महदर्थयुक्तम्।
प्रकृष्टसंहृष्ट मनःप्रसूतं
कृष्णावतारे प्रति रुक्मिणीं वा[1]।। 90।।

श्रीः

श्रीमद्द्राजाधिराजविराजन्मकुटकोटिविकटप्रकटितमणि-राजराजनीराजितपादारविन्दाय, सर्वतोदिगन्तव्याप्तकीर्तिकान्ताय, सुधर्मतनयाय, सधर्मराज्यपरिपालकायाऽस्मद्बन्धुवरायाकाशभूमीशाय नमो नमस्ते।। 91।।

भो राजन्निदानीं भवल्लिखितलेखाऽलोकनकुतूहलेन श्रीनिवासबालकेन लिखितेऽयं विज्ञप्तिः किमिति चेद्भवल्लिखित-अनुमतिवचनमनुस्मृत्य तदैव वैशाखशुक्लदशमीभृगुवासरमहोत्सवे सुहृन्मित्रबन्धुवराद्यैस्सहाऽगत्य तव पुत्रीं पद्मावतीं नाम्नीं कन्यां पाणिग्रहणपुरस्सरमङ्गीकरिष्यामि यथा सागरस्तथा त्वं मे कन्यां दत्वा बहुकीर्तिमान् भवेति प्रणतिपूर्वकमिदं विज्ञापनमलम्।। 92।।

---

1) वा इवेत्यर्थः ।। श्लो।। वास्याद्विकल्पोपमयो सेवार्थे च समुच्छय इति विश्वः।

In Public domain. Digitization Muthulakshmi Research Academy

इत्थं लिखित्वा शुभपत्रिकां तां
वृषाद्रिनाथो मुनिना शुकेन।
सम्प्रेषयामास वियन्नृपस्य
नारायणाख्यं पुरमिन्द्रपूज्यम् ॥ 93 ॥

तस्मिन्समये भगवान्नाश्चर्यं गतवानिव पुनरेवंविधम् अभाषत॥94॥

अविदितकुलगोत्रस्थाननामालयस्य
कथमपि मम कन्यां दास्यतीत्थं स मौने।
इति मतिरतिचिन्ता दिग्धमुग्धाऽद्य जाता
ह्युभयसुहृदभिज्ञो हेतुरत्र त्वमेव ॥ 95 ॥

तं निशम्य श्रीशुकमुनिस्तं भगवन्तं प्रत्येवमाह ॥ 96 ॥

कुतोऽस्य गोत्रं हि कुलं च जन्म
मृत्युः कुतस्ते भगवन्रमेश।
मद्वाक्यविश्वासपरः खराजः
कन्याप्रदानोत्कमना बभूव ॥ 97 ॥

अत्र सदा भवदनुग्रहकांक्ष्यहं कियान् स्वसङ्कल्पविकल्पमात्रेण जगदुत्पत्तिस्थितिलयादिकारणं त्रिभुवनविदितं भवन्तं को न विजानाति तथापि ॥ 98 ॥

तस्मात्त्वमप्यद्य यथा खराज-
स्तथैव मद्वाक्यगुरुत्वतस्ताम्।
पद्मावतीनामकराजपुत्रीं
गृहाण शीघ्रं कृपया रमेश ॥ 99 ॥

In Public domain. Digitization Muthulakshmi Research Academy

इत्युक्त्वा तं तथा भक्त्या स्तुत्वा तदनुज्ञापिततद्भगवद्दर्शनलब्धहर्षो महर्षिश्श्रीमदाकाशसुधाधीशनगरमरं ययौ ।। 100 ।।

।। इति श्रीशिरशिनहलान्वयसञ्जात-कौण्डिन्यगोत्र-
श्रीमद्वेङ्कटाचार्यपुत्र-श्रीरङ्गमाम्बागर्भसम्भूत-
श्रीकृष्णमाचार्यविद्वद्वर्यकृपालब्धविद्येन
पेरुमाण्डूलाचार्यकविना विरचिते
श्रीवेङ्कटेशचम्पूप्रबन्धे षष्ठोऽयं स्तबकः ।।

In Public domain. Digitization Muthulakshmi Research Academy

अथ सप्तमस्तबकः

अथाऽगतायां वकुलां सुनीतां
पश्यन्नपृच्छत्प्रणिपत्य शौरिः ।
मातः किमर्थं ह्यभवद्विलम्बः
का तत्र वार्ता वद देवि सर्वम् ॥ 1 ॥

सापीत्थमवदत् -

बहुप्रयत्नेन सुसाधिता सा
कन्या शुभा ते पुरुषोत्तमाद्य ।
दैवं हि मन्ये न च पौरुषं त-
द्धेतुं वदिष्ये श्रुणु तत्र चित्रम् ॥ 2 ॥

तत्रैका धर्मदेवी धरणिमुपगता सत्यवाक्या पुलिन्दा
कन्या देया तवेति स्वयमलमवदद्दैवयोगात्सुवृत्या ।
कन्यापि त्वद्दतेऽन्यं नरमिह न भजामीति सङ्कल्पवाणी
चैतत्सर्वं विदित्वा खपतिरपि सुतां दातुमुद्यक्तवांस्ते
॥3॥

इमां कन्यां प्रदास्यामि वेङ्कटाचलवासिने ।
दास्यामीति सभामध्ये सङ्कल्पमकरोन्नृपः ॥ 4 ॥

त्वयैव कृतमेतद्धि न दैवं भवतः परम् ।
मन्ये किञ्चित्तृणमपि न चलेत्तत्त्वया विना ॥ 5 ॥

In Public domain. Digitization Muthulakshmi Research Academy

इति तदुदितं निशम्य तदा किञ्चिन्मन्दस्मितवदनो मधुसूदनस्साधुकृतं त्वयेति मातरमभिनन्द्य ततः क्षणानन्तरं चिन्तयन्निव पुनरेवमवदत् ।। 6 ।।

विवाहकार्यं न विधातुमुक्ता
बुद्धिर्ममाद्याम्ब विचारिता चे-
दबन्धुरेकोहमनेकबन्धु-
स्सह्यस्ति राजा कथमत्र शंस्यः ।। 7 ।।

ययोस्समत्वं धनवंशवृत्तेः
सम्बन्धमैत्री कुशला तयोस्स्यात् ।
वादो विवाहस्समयोस्सुशोभः
यथा तथा नोत्तमनीचयोश्च ।। 8 ।।

कथं नृपस्यास्य मयोचितस्स्यात्
अबन्धुना बन्धुयुतस्य सङ्गः ।
भवेत्सुखं नेति वदन्ति सन्त-
स्ततोऽद्य चिन्ता खलु बाधते माम् ।। 9 ।।

इति भगवदुदितमुदासीनवचनं निशम्य बकुलाऽतिकुशला तदा तमिदमवादीत् ।। 10 ।।

त्वादृक्पुमान्क्वचिदप्यनृतं न वक्ति
सत्यं सदैव मुनयोऽप्यभिशंसयन्ति ।
द्वैपायनिस्तु भगवान्तव कार्यनिष्ठ-
स्त्वां वीक्षतेऽद्य गुरुणा प्रभुणा समेतः ।। 11 ।।

In Public domain. Digitization Muthulakshmi Research Academy

अत्याशया काशनृपोऽस्ति तत्र
तत्तां वृथा मा कुरु चक्रपाणे ।
स्मराद्य बन्धून्विधिशङ्कराद्यान्
सर्वान्सुरान्तान् तव पुत्रपौत्रान् ॥ 12 ॥

इति मातुरनुमतिमनुसृत्य वेङ्कटपतिस्मृतमात्रेणातिमातृ-भक्त्या नतशिरस्कौ पुरतस्थितावनन्तविनतासुतौ दृष्ट्वा तदा चतुराननानयनाय पतगेशं सत्यलोकमहिभूषणानयनायाहीशं कैलासं प्रति प्रैषयत् ॥ 13॥

स सत्यलोकं त्वरितेन गत्वा
चतुर्मुखं तं प्रणपत्य भक्त्या ।
पित्रा तवाहीन्द्रगिरीश्वरेण
सम्प्रेषितं मा गरुडं च विद्धि ॥ 14 ॥

विवाहकार्यं प्रविधातुमुक्त-
स्समाह्वयत्वद्य मुदा पिता ते ।
प्रयाहि शीघ्रं भगवान्वृषाद्रिं
त्वद्दर्शनार्थं भुवि सर्वयुक्तः ॥ 15 ॥

इत्युक्त्वा पतगपतिश्श्रीपतिलिखितशुभलेखां वाग्सतीपतये व्यदात्॥16॥

तदा तद्वैनतेयानीतनक्षत्रमालालङ्कृतां तरिक्षवच्छुभाक्षर-मालाविलासितमापतिलिखितशुभलेखामालोक्य प्रजापतिः प्रजातकुतुकम् अतिस्तदनुक्षणमेव द्वारपालकैः प्रयाणभेरीं ताडयित्वा सत्यलोकस्थितान्

In Public domain. Digitization Muthulakshmi Research Academy

सर्वान् सुपर्वगन्धर्वकिन्नरमहोरगसिद्धचारणादीनष्टदिक्पालकान् समाहूय भवन्तः सर्वेऽनुमोदन्तः कलौ श्रीनिवासस्य दिव्यकल्याणमहोत्सवसेवनाय भूलोके अस्मिन्भरतवर्षे जम्बूद्वीपस्य दक्षिणभागे विलसन्तमनन्ताचलं प्रति प्रयाणं कुर्वन्तो भवन्तो दयावन्तो मया सह समागच्छन्त्विति तास्समादिशत्॥17॥

अथ चतुराननोऽपि कनकरत्नखचितदिव्यकिरीटमणिमयकुण्डलकटककेयूरनूपुराङ्गदप्ररत्नमुक्ताफलमालाजालाभिरलङ्कृतः सन् चन्द्रसदृशहंसेन्द्रमारुह्य सालङ्कृताभिस्सरस्वतीगायित्रीसावित्रीसतीभिरनुसेव्यमानः सकलदिक्पालकबृन्दैर्वन्दितस्सन् नवसहस्रसंख्यापरिमितभेरीश्च शतत्रयपरिमितदुन्दुभिश्च तथा ढक्कामृदङ्गपणवानकमडुविस्साणवीणाडिण्डिमझर्जरबर्भरगोमुखशतशृङ्गदीर्घशृङ्गाद्यनेकनानाविधवाद्यानि वादयन् सुस्वरसप्तस्वरसप्तरागैस्सर्पाणामपि सम्मोहकैर्गायद्भिर्हाहाहूहूप्रमुखगन्धर्वगणैः तथा रम्भादिअप्सरसाङ्गणैर्नर्तकीनटकैस्सूतमागधिवन्दिभिश्च संवृतस्सन् गगनलिहत्समुच्छ्रितध्वजपताकततिभिर्विराजितानां गजाश्वरथसंस्थितानां नानाविधायुधधराणां शौर्यधैर्यवीर्यगाम्भीर्याप्रतिहतशक्तियुक्तानां सर्वेषां वीराणां सुराणाञ्च मध्ये गगनोडुमध्ये विद्योतमानसितद्युतिमानिव प्रद्योतमानहेमदण्डपरिमण्डितकनकरत्नकुम्भयुतपवित्रश्वेतच्छत्रोपशोभितस्साग्निहोत्रशिष्यपुत्रकलत्रैस्सत्यलोकसमहिसुरैः अनुसेवितस्सस्नेहं विभवमास्थाय, सत्यलोकात्तपोलोकजनोलोकमहर्लोकसुवर्लोकस्वर्गलोकानतीत्य तत्तल्लोकलोकपालैस्सह महीतलं प्रविश्य क्रमक्रमाच्छेषाचलमगमद्भगवान्कमलासनः ॥ 18 ॥

In Public domain. Digitization Muthulakshmi Research Academy

तदाऽगमने निबिडीकृतजनकोलाहलरावैर्वादित्राणां निस्वनैः दुन्दुभीनां महारावैश्च सशैलवनकाननं जगदिदमापूरितमभूत् ।। 19 ।।

एतस्मिन्नेव समये भगवान् लौकिकीतनुः ।
किन्नागतो वैनतेय इति मात्राप्यचिन्तयत् ।। 20 ।।

तदाऽजगाम गरुडश्चतुराननचोदितः ।
नत्वा हरिं प्राह पुत्रस्तवायातीतिसानुगः ।। 21 ।।

तच्छ्रुत्वा जातसन्तोषः पुत्रस्नेहपरिप्लुतः ।
हरिर्गरुडमारुह्य ययावभिमुखं विधेः ।। 22 ।।

अथागतं तं गरुडाधिरूढं
दृष्ट्वा विधाता पितरं समोदः ।
क्षणात्समुत्तीर्य मरालयानात्
पपात तत्पादसरोजयुग्मे ।। 23 ।।

उत्थाप्यालिङ्ग्य गाढं विधिमधमधुजिन्माधवस्तं तु प्रेम्णा
तातस्ते स्वागतं किं तव चिरसमयेनाद्यमद्दर्शनेच्छा ।
जाता किं त्वद्दते मत्प्रियकरतनयो नापरोऽस्तीति मन्ये
सर्वं भव्यं त्वदीयं खलु जनमिति तद्वाक्यमूचेऽतिहर्षः ।।24।।

एवं प्रभाषमाणेऽपि हृषीकेशे तद्भगवत्पितृसन्दर्शनजनित-आनन्दपरवशतया भाषापतिर्नाभाषत ।। 25 ।।

तथैव श्रीनिवासोऽपि प्रियतनयचिरकालागमनकुतूहलातिशयात् मुहूर्तमात्रं नोक्तवान् ।। 26 ।।

आनन्दभाषसन्दिग्धमुग्धनेत्रौ परस्परम् ।

In Public domain. Digitization Muthulakshmi Research Academy

तौ स्नेहोत्फुल्लवदनौ मुखं ददृशतुर्मुदा ॥ 27 ॥

ततस्समाश्वास्य सुतं हि तस्य
पाणिं गृहीत्वा वरवामलूर्वोः ।
अन्तर्गतस्तं निजगाद सर्वं
स्वपूर्ववृत्तान्तमिदं रमेशः ॥ 28 ॥

कृशं हि मां पश्य सुताद्य धातः
मद्दुःखमूलं श्रुणु किं वदेयम् ।
वैकुण्ठमागत्य भृगुः पदान्मां
तताड वक्षस्युरगेशशायिनम् ॥ 29 ॥

तदा रमा ते जननीप्रकोपा-
त्पुरङ्गता सा करवीर नाम ।
तद्दुःखसन्तप्तहृदाऽगतोऽस्मि
सन्त्यक्तवैकुण्ठ इहाहिशैलम् ॥ 30 ॥

वल्मीकगं मामथ चोलभृत्यः
कुठारतः प्राहरदत्र मुर्ध्नि।
प्राप्तं व्रणं क्षीरदगोनिमित्तात्
जीवामि जीवौषधसेवनेन ॥ 31 ॥

पूर्वं यशोदा वकुलाभिधेया
जाताऽद्य शेषाद्रिवरेऽत्र संस्था ।
तयाऽम्बयाऽहं परिरक्षितोऽस्मि
नोचेत्तदा सा मम दुर्गतिस्स्यात् ॥ 32 ॥

In Public domain. Digitization Muthulakshmi Research Academy

एवं स्थिते सति जात्वहं मृगयासक्तो वनाद्वनान्तरं प्रविश्य तत्र पद्मतीर्थोपवने महाविटपमूले सखीबृन्दमध्ये तारागणमध्ये विद्योतमानशितद्युतिकशामिव विराजन्तीमाकाशराजपुत्रीं पद्मावती-मालोक्यातिमोहपरवशङ्गतोऽस्यतो मन्मनस्तामेव काङ्क्षति तस्मात्तां कथमपि घटयाशु त्वमेव प्रियकृत्तनयोऽसीति वदति स्म (अत्रान्तरे) ।। 33 ।।

मलयाचलदनिलस्सगन्धमादाय भारतीसमेतस्सपरिवारस्सन् तत्र समाजगाम ।। 34 ।।

अथ रुद्रोऽप्यद्रिजासमेतः षण्मुखगजमुखप्रमुखप्रमथगणैस्सह तुण्डिवाहनारूढस्सन् सशेषेणान्वपद्यत ।। 35 ।।

ततो जलपतिरपि सजायस्सधनपरिवर्गस्सन्नागमत् ।।36।।

अनन्तरमग्निहोत्रोऽपि सत्रास्वाहास्वधाभ्यां मेषवाहनारूढ-सन्नाययौ।।

पश्चात्प्रेतपतिस्स्वदूतैश्चित्रगुप्तादिमहाप्राज्ञैस्सह सभार्यः सायुधस्सपरिकरो महिषवाहनारूढस्सन्नाजगाम ।। 38 ।।

तदा त्रिदशेशोऽपि पुलोमजासमेतस्त्रयस्त्रिंशत्कोटि-त्रिदशैः स्वपुत्रमित्रपरिजनवर्गैस्सहितस्सन्नैरावतमारुह्याहीन्द्रगिरीन्द्रम् आययौ ।। 39 ।।

तदनु चन्द्रसूर्यौ सग्रहौ समागतौ च ।। 40 ।।

तथा च मन्मथोऽपि मूलरूपेण रतीसतीसमेतस्सन्तुरङ्गमधिरुह्य जवादुरगगिरिवरमाजगाम ।। 41 ।।

In Public domain. Digitization Muthulakshmi Research Academy

एवं कश्यपात्रिभरद्वाजविश्वामित्रजमदग्निवसिष्ठवामदेव-वाल्मीकिव्यासगौतमपुलस्त्यागस्त्यपुलहक्रतुगार्ग्यगालवदधीचि-शुकशकुनि श्शेफादयो महर्षयस्सपुत्रपरिग्रहाश्च सिद्धचारणसाध्य-किन्नरमहोरगाश्च चतुर्दशभुवनसंस्थिताः ये ये विष्णुभक्तास्ते ते महर्षयो राजर्षयो मुनयो राजानश्चापि सर्वे ससम्भ्रमाश्श्रीनिवासस्य कल्याणमहोत्सवं सेवितुमागतास्सन्तो भगवन्तं प्रणमन्ति स्म ||42||

तदा तत्रागतान्सर्वान्देवर्षिराजर्षिनृपगणान्यथायोग्यं सत्कृत्य स्थीयतामित्यवदद्भगवान् गोविन्दः || 43 ||

इन्द्रं समाहूय ततस्सुरेन्द्रम्
अहीन्द्रशैलेन्द्रपतिस्तमूचे ।
सभां शुभां कारय वासवाशु
त्वष्ट्रा सदर्थं मुनिदेवतार्थम् ।। 44 ।।
एवं संशासितश्शक्रश्चक्रिणा विश्वकर्मणा ।
कारयामास विपुलां विचित्रां महतीं सभाम् ।। 45 ।।
पञ्चाशद्योजनास्तीर्णां त्रिंशद्योजनमायताम् ।
कामगां तां हरिर्दृष्ट्वा पुनरिन्द्रमभाषत ।। 46 ।।

हे शचीश त्वमधुनाऽनेनाकाशभूमीशपुरमाशु गत्वा तत्रार्यं नृपवर्यं कार्यकर्मणि सम्यग्प्रबोध्य सद्यो विद्योतमानविविधविचित्र-रत्नचित्रानुक्तमूल्यमुक्ताफलमालालङ्कृतनानामणिगुम्भितशातकुम्भः तम्बकदम्बशोभितशुभसभाभवनदिव्यकल्याणमण्टपाद्यनेकचित्र-विचित्रविविधमण्टपान्यत्युच्छ्रितनवनवध्वजपताकततिभिरलङ्कृ-तानि महितरत्नतोरणमण्डितानि वापीकूपशतयुतानि धनधान्यादि-

In Public domain. Digitization Muthulakshmi Research Academy

समस्तवस्तुसंयुतानि कर्तव्यानि किञ्च विशालवीथी परिशोभितं सुधाधौतसौधराजिविराजितं बहुयोजनपरिमितविस्तारं कलधौत-कलशोपेतशृङ्गारानेकगोपुरशेखरं गोपुरसमाकारं तत्पुरं कर्तव्यमिति तं समादिशद्भगवान्मुकुन्दः ।। 47 ।।

तदैव तत्र तेन विश्वकर्मयुतेन तद्भगवन्निदेशमनुसृत्य गत्वा तद्वियन्नृपवरानुमतिपुरस्सरं सर्वं सम्पूर्णमाचरितमभूत् ।। 48 ।।

तश्श्रीवासुदेवस्सर्वान्सुपर्ववरांस्समाहूयैवमब्रवीत् ।। 49 ।।

वियन्नृपस्यात्मभवाऽद्य याऽस्ति
तस्याश्च पाणिग्रहणे ममेच्छा ।
अङ्गीकृतं चेदखिलैर्भवद्भिः
अङ्गीकरोम्यत्र तु तां सुरेन्द्राः ।। 50 ।।

तच्छ्रुत्वा तदा ब्रह्मादिदेवतास्सर्वे बद्धाञ्जलिपुटास्तं भगवन्तमेवम् ऊचुः ।। 51 ।।

वयं तु सर्वे भवदीयदासाः स्थितास्त्वदाज्ञां शिरसा वहन्तः।
महोत्सवं ते भवतः प्रसादादीक्षामहे चात्र दयासमुद्र।।52।।

ततश्श्रीपतिरतिकुतुकमतिस्सर्वान्सुरोत्तमान् तत्तत्कार्येष्वित्थं निरू-पयति स्म ।। 53 ।।

पौरोहित्ये वसिष्टं सकलसुरपतिं याजमान्ये मुनीनां
देवानां पार्वतीशं शरवणभवं देवताऽह्वानकार्ये ।
वह्निं पाके सुगन्धे पवनमथ यमं दण्डनेऽप्सूदकेशं
प्रत्युत्थाने रतीशं समदिशदलकेशं धने वेङ्कटेशः ।।54।।

In Public domain. Digitization Muthulakshmi Research Academy

प्रदीपकर्मण्यथ चारुचन्द्रं
वसून्समस्तानपि भाण्डशुद्धौ ।
स द्रोणपात्रग्रथने ग्रहांश्च
संयोजयामास तथा रमेशः ॥ 55 ॥

एवं संशासितास्ते समस्तास्सुराः भगवता तन्निदेशमनुसृत्य स्वस्वकृत्येषु स्वस्थास्तिष्ठन्ति ततः पितामहश्श्रीपतिं प्रतीदमब्रवीत् ॥56॥

सर्वं सज्जीकृतं देव मज्जनं कुरु मङ्गलम् ।
पुण्याहवाचनादीनि कर्तव्यानीह माधव ॥ 57 ॥

एवमुक्तश्शिरसि न्यस्तहस्तश्श्रीधरस्तदा रमामनुस्मरन् प्राकृतवच्चतुर्मुखमुखं पश्यन्नेवं रुदन्वदति स्म ॥ 58 ॥

रमां विना मे रमतेऽत्र नो मन-
स्सभापि दिव्या न हि शोभते शुभा ।
भवानहं चापि सुरा न शोभनाः
विनेन्दुशोभां भगणा यथाऽम्बरे ॥ 59 ॥

यथामहारण्यमपादपं खगाः
विहीनपक्षा अफला महद्रुमाः ।
यथाऽधुना बन्धुसुहृद्गणादयः
तथा वयं श्रीरहीताः पितामह ॥ 60 ॥

एवं रुदन्नथ मधुमदनो विधिना सम्यगसम्मन्त्र्य तथा भानुमन्तमाहूय तं प्रतीत्थं त्वद्भर्ता श्रीनिवासोऽप्यशक्तस्त्वन्मुख-सन्दर्शनबद्धजीवस्सन् भूमिमधिशेत इत्युक्त्वा तां श्रियं शीघ्रतरम्

In Public domain, Digitization Muthulakshmi Research Academy

आनीयतामिति कोल्लापुरं प्रति प्रेषयति स्म ॥ 61 ॥

उपायमुक्त्वा त्वथ चोदितेन
नीताऽगता भानुमता रमा सा ।
विधीशयुक्तं मधुविद्विषन्तं
तथा नटन्तं ददृशेऽभियान्तम् ॥62॥

तत्पादपद्मयोर्भक्त्या क्षिप्त्वा पुष्पाञ्जलिं तदा ।
पपात दण्डवत्पद्मा तद्दर्शनकुतूहला ॥ 63 ॥

रमां समालिङ्ग्य समागतां तां
स्वपादपद्मे पतितां सुनीताम् ।
उद्धृत्य तत्पाणितलं गृहीत्वा
विवेश वल्मीकबिलं रमेशः ॥ 64 ॥

तत्र उभयोः परस्परयोगक्षेमादिसम्भाषणानन्तरं तया तदुदितपूर्ववृत्तान्तं सर्वं स्मारयन्निदमाह रमापतिः ॥ 65 ॥

रामावतारे कथितं त्वया य-
त्तदद्य देवि स्मर वेदवत्याः ।
प्राप्तो विवाहस्य तु काल एषः
तत्कर्तुकामस्तव सन्निधाने ॥ 66 ॥

भणत्येवं भगवति सा स्मृतिमवगम्य साङ्गीकारां गिरमुवाच रमा ॥ 67 ॥

अवश्यमङ्गीकुरु देवदेव
विवाहकार्ये विधिपूर्वकं ताम् ।

In Public domain. Digitization Muthulakshmi Research Academy

पूर्वं मयोक्तं वचनं हि सत्यं
तदद्य शीघ्रं सफलं कुरुष्व ॥ 68 ॥

इति प्रणयपूर्वकेरितरमाप्रीतिवचनेनामितानन्दपुलकितगात्रो वेङ्कटशैलमित्रोऽथ विधिं विधिवदपश्यः कार्याणि कर्तव्यानीति आदिदेश ॥ 69 ॥

तदा विधिरपीनप्रमुखैर्वीरैरनेककटाहभाण्डनिचयानि समानीय तेषु जलपतिनाऽनिलेन च सुगन्धमिश्रितानि दिव्यतीर्थोद्भवानि तीर्थान्या-पूरयत् ॥ 70 ॥

एवं प्रवृत्ते श्रीनिवासस्य महोत्सवे वैशाखशुक्लसप्तमीदिने त्वरुन्धत्यनसूयादयो ऋषिमुख्याङ्गनास्सरस्वतीसावित्रीगायत्रीपार्वती-प्रमुखाः देवताङ्गनाश्च शुद्धास्सिद्धवैखासनाङ्गनाश्च सर्वास्सुवासिन्यः सुवस्त्राभरणालङ्कृतास्सत्यस्साक्षाल्लक्ष्मीं वकुलाञ्च पुरतः कृत्वा भगवतो दशाकृतिकृतचरित्रयुक्तानि शुभनामानि गायन्त्योऽनुमोदन्त्यो हसन्त्यः विश्वकर्मनिर्मितभर्ममयमणिमण्टपे चतुर्दिक्षु चतुःकनक-कलशानि दिव्यजलपूरितानि संस्थाप्य नूतनसूत्रेण वेष्टयित्वा तन्मध्यमे रत्नपीठं विन्यस्य मङ्गलाभिषेचनस्वीकरणार्थमुत्तिष्ठ पुरुष-श्रेष्ठ तिष्ठ त्वं सूत्रमण्डल इति सुसम्भ्रमास्सुपर्वाङ्गनाः भगवन्तं श्रीकान्तं प्रार्थयामासुः ॥ 71 ॥

तन्निशम्य भगवान् तत्र सर्वेषां ब्रह्मादीनां पुरतः प्राकृतजनवत्पुनरप्येवं रुदन् वदति स्म ॥ 72 ॥

कल्याणकार्ये त्वभिषेचनं मे
तैलेन चाशीर्वचनक्रमेण ।

In Public domain, Digitization Muthulakshmi Research Academy

अनाप्तबन्धोरिह कः करोति
मातापिताबन्धुगणोऽपि नास्ति ।। 73 ।।

मित्रं मातृसमं न चास्ति पितृणा तुल्यं सुखं वै तथा
भाग्यं नास्ति सुभार्यया सममहो पुत्रेण तुल्या गतिः।
स्नेहः भ्रातृसमश्च नास्ति परमो विष्णोः परादेवता
तद्भाग्यं मम नास्ति मज्जनविधौ को वा करोति स्वयम्
।।74।।

तदा विधाता पुरत आगत्य माधवमेवं समाधत्ते ।।75।।

अस्मान्मोहयसे किमर्थमधुना साक्षाद्रमा तेऽङ्गना
पुत्रोऽहं तव पौत्र एव गिरिजानाथः प्रपौत्रो महान् ।
स्कन्दोऽन्यो मदनस्सुतोऽपि पवनो ज्येष्ठात्मजो गीस्स्नुषा
एवं दासगणास्सुरास्सदयिताः किं न्यूनमस्त्यत्र ते
।।76।।

(ततश्शङ्करः)

विनोदार्थमिदं मन्ये त्वत्कृतं पुरुषोत्तम ।
एवं विभवमास्थाय प्रलोभयसि नः प्रभो ।। 77 ।।

तत्सर्वं विदित्वा रमापि तदा भगवत्सविधमुपगतासु विनता तं प्रति वदति स्मैवम् ।। 78 ।।

जानामि हृस्थं भगवन्तवाद्य
सन्त्यज्य दुःखं विश रत्नपीठम् ।
तैलेन चाभ्यङ्गनपूर्वकाणि
सर्वाणि कर्माण्यपि ते करिष्ये ।। 79 ।।

In Public domain. Digitization Muthulakshmi Research Academy

इत्युक्तो रमया त्यक्तदुःखोऽत्यन्तकुतूहलः ।
वशिष्ठानुमतश्श्रीशो रत्नपीठं विवेश सः ॥ 80 ॥

सा रुक्मपात्रं घनतैलयुक्त-
मादाय देवी भगवन्तमीशम् ।
अभ्यञ्जयत्तं दिविजाङ्गनाभिः
तैलेन चाशीर्वचनक्रमेण ॥ 81 ॥

दीर्घायुर्बहुपुत्रवांश्च धनवान्त्रैलोक्यनाथो भवे-
त्येवं तैलसुगन्धिना भगवतीत्याशीर्भिरामन्त्र्य तम् ।
कस्तूरीघनसारचन्दनयुतैर्दिव्यैश्च पिष्टैश्शुभैः
देवाङ्गं परिमर्थ्य सा परमया भक्त्याऽभ्यषिञ्चद्रमा ॥82॥

अपि च रमा मङ्गलदेवता तदा दिगन्तविश्रान्तविविध-मङ्गलवाद्यघोषैस्सह सर्वपरिच्छदैस्समन्तात्कुम्भीकुम्भोपाहृतसकल-पुण्यतीर्थस्थपुण्यतीर्थपरिपूरितनवरत्नस्थगितशातकुम्भकुम्भमुखात् अच्छाच्छाम्ब्ववच्छिन्नधाराभिस्तमभिषिञ्च्य तदाऽऽपादमौलिपर्यन्तम् उद्वर्तनं कृत्वा तद्भगवतस्सेवयाऽत्यर्थमात्मानं कृतार्थं मेने ॥ 83 ॥

तदानीमेव सकलसुराङ्गनानां मध्ये चतस्रस्सुवासिन्यश्चतुर्दिक्षु स्थापितसूत्रावेष्टितकनककलशानि पाणिभिर्गृहीत्वा सरत्नमौक्तिक-तोयैस्तमभ्यषिञ्चन् ॥ 84 ॥

किञ्च सर्वास्सुपर्वाङ्गनाः ऋष्यङ्गनाश्च तं भगवन्तं पुत्रवान् धनवान् भवेत्याशीर्वदन्त्यर्जलैर्नीराजयन्त्यश्शुभगीतानि गायन्त्यः कुङ्कुमोदकैर्माङ्गलिकीमारातिकां चक्रुः ॥ 85 ॥

In Public domain. Digitization Muthulakshmi Research Academy

सावित्र्यानीतवस्त्रेण सर्वाङ्गं जगदीशितुः ।
ममार्ज विधिवत्पद्मा स्वयं कमलपाणिना ।। 86 ।।

श्वेतच्छत्रं दधाराशु भारती भक्तिसंयुता ।
पादुके प्रददौ दिव्यौ भद्रा भागीरथी तदा ।। 87 ।।

पादौ निवेश्य मृदुपादुकयोस्तदानीं
प्रागात्प्रसन्नजनतार्तिहरोहरिस्तु ।
याभ्यां मुनेरधिकशापवशाच्छिलात्वं
प्राप्ता सती भुवि पुराऽमलतां गताऽभूत् ।। 88 ।।

पीताम्बरं स भगवान्परिधाय भूरि
रत्नासने परिवसन्नथ वेङ्कटेशः ।
चार्वष्टमीन्दुशकलाकृतिके ललाटे
दिव्योर्ध्वपुण्ड्रतिलकं च दधार धीरः ।। 89 ।।

ततः कुबेरं प्रतियाचयित्वा
चादाय सर्वाणि सुभूषणानि ।
तै रत्नचित्रैः कनकैश्च दिव्यैः
रमा रमेशं समभूषयत्तम् ।। 90 ।।

कन्दर्पकोटिहरसुन्दरदिव्यगात्रं
श्रीवेङ्कटेशमतुलं श्रितपारिजातम् ।
संवीक्ष्य देवतगणा ऋषिपुङ्गवास्ते
सिद्धा स्तुवन्ति च नरास्सकला नमन्ति ।। 91 ।।

In Public domain. Digitization Muthulakshmi Research Academy

एवं प्रवृत्ते मायामानुषविग्रहस्य पुरुषोत्तमस्य कल्याण-महोत्सवे तत्र भगवान्वसिष्टः पुरोहितस्तत्र समागतैर्ब्रह्मरुद्रादि-अमरवर्यैरिन्द्राद्यष्टदिक्पालकैस्सनकादियोगीन्द्रैः कश्यपादिमुनीन्द्रैः भृग्वादिऋषिवर्यैश्चार्यमादिपितृगणैः परिसेवितं रम्भादिनर्तकीभिः सूतमागधवन्दिभिरुपासितं भगवन्तं श्रीकान्तं मौक्तिकैर्विरचित-चतुरस्त्रिकायां वेदिकायां प्रतिष्ठाप्य सङ्कल्पविधिपूर्वकमष्टवर्गयुतं पुण्याहवाचनं ततः शमीशाखापशोभितकुलदेवताप्रतिष्ठापनादिकं च सर्वं सम्पूर्णमकरोत् ।। 92 ।।

अथ भगवानभोजनेन गन्तव्यं नारायणपुरं प्रतीत्युद्देशेन चतुराननमाहूय चतुरङ्गसेनामाबालवृद्धसुरनरमुनि ऋषिद्विजपुङ्गवान् सर्वानद्यैव गगननृपपुरं प्रति गन्तुं शीघ्रं नियुंक्ष्वेति तमेवं समादिशत् ।। 93 ।।

तद्वाक्यमाकर्ण्य विधिर्विधिज्ञो
विनम्रकायो भगवन्तमीशम् ।
सुरेश्वराणां पुरतस्त्विमां तं
उवाच वाचं महदर्थयुक्ताम् ।। 94 ।।

कुलेश्वरीस्थापनमद्य कृत्वा
पुण्याहकर्माणि च देवदेव ।
सर्वे क्षुधार्ताः खलु बालवृद्धाः
कथं हि गन्तव्यमभोजनेन ।।95।।

तच्छ्रुत्वा भगवान्साक्रोशमिदं तमाह ।। 96 ।।

In Public domain. Digitization Muthulakshmi Research Academy

कार्यन्त्वकार्यं न हि पुत्र वेत्सि
महार्घवाक्यानि बभाषसे त्वम् ।
ज्ञात्वापि सर्वं मम रिक्ततां तु
कथं वदस्येवमहो विचित्रम् ।। 97 ।।

अथैवं ब्रुवन्तं श्रीपतिं प्रति पशुपतिरिदमवदत् ।। 98 ।।

पुरैव कृत्वा धनवस्तुसङ्ग्रहं
समस्तसम्भारयुतं च पुष्कलम् ।
विवाहकार्यं गृहकर्म वा तदा
समाचरेद्यस्स पुमान्हि कथ्यते ।। 99 ।।

तन्नालन्तु भवेच्च चेदृणमलं कृत्वापि कार्यं शुभं
तस्मादत्र विचारणीयमपि किं लक्ष्मीपतिस्त्वं स्वयम् ।
तद्भृत्यो बहुलार्थदानविषये सिद्धो धनेशो महान्
सर्वं लोकविडम्बनन्त्विदमहो किं न्यूनता ते हरे ।।100।।

इत्थं मृडेन कृतहेडनमसहिष्णुर्विष्णुस्तत्क्षणमेव यक्षपतिम् आहूय श्री स्वामितीर्थस्य पश्चिमतटस्थादश्वत्थमूलं प्रविश्य तत्र सुराध्यक्षविरूपाक्षयोस्समक्षं तं ऋणमयाचत ।। 101 ।।

यद्दृष्टिपाताद्धनवान्दरिद्रो
भवेत्सदा सन्पतिरेव तस्याः ।
यथाऽधनस्तं धनदं ययाचे
धनाय शौरिर्युगधर्मकारी ।। 102 ।।

विधीश साक्षी प्रयुतम् ऋणस्य
पत्रं कुबेराय ददौ विलिख्य ।

In Public domain. Digitization Muthulakshmi Research Academy

तदर्थराशिं शुभकार्यपूर्त्यै
गृहीतवान्वेङ्कटशैलनाथः ।। 103 ।।

निष्काणां राममुद्राणां स्वर्णानाञ्च चतुर्दश ।
लक्षांश्च तत्करे दत्वा पुनस्तं चेदमब्रवीत् ।। 104 ।।

भो धनेशेतद्धनेन त्वमधुना धृततरमानीयतां तण्डुलप्रस्थराशीन्माषमुग्धचणकगोधूमादीन्तिलजीरहिङ्गुमरीचिमेधिकादीनेलाज्यक्षीरदधिमधुगुडशर्करादींश्च किञ्चामूल्ययोग्यवस्त्राणि सोत्तरीयाणि चानय द्विजयोषितां हरिद्राक्तानि वस्त्राणि कुर्वीथाः देवानां चोत्तरीयाणि उत्तमानि तत्स्त्रीणां महन्ति दुकूलानि वस्त्राणि किञ्चैलालवङ्गघनसारसारकस्तूरीपुरस्सराणि दिव्यपूगीफलानि नागवल्लीदलानि च तथा पादाङ्गुष्ठमुद्रिकासमेतां कन्यार्थं माङ्गल्यतन्तुमपि मेऽद्य हस्ताङ्गुलीयकान्यपि शीघ्रं कुर्वित्यादेशितो भगवता यक्षपतिस्तक्षणमेव सर्वं सज्जीकृत्वा पाकार्थं पावकं नियुङ्क्ष्वेति भगवन्तं विज्ञापयाञ्चकार ।। 105 ।।

तदा पावकमाहूय पाकार्थं भगवानेवं निर्दिशति स्म।।106।।

अन्नं स्वामिसरस्यघविनाशिन्यां च सूपं तथा
स्वर्णद्यां परमान्नमेव सगुडं सद्वेव तुम्बाख्ययोः ।
शाकं चित्रकमाम्लकस्य तु रसं श्रीपाण्डुतीर्थेऽमले
भक्षाण्यन्यसरस्सु लेह्यनिचयं पेयानि कार्याणि वै ।।107।।

ततोऽग्निरेवाशु सुपाकमद्भुतं
स्वयं तु कृत्वा हरये न्यवेदयत् ।

In Public domain. Digitization Muthulakshmi Research Academy

निशम्य तच्छ्रीनिलयो मुनीनृषीन्
सुरांश्च सर्वानथ तान्समाह्वयत् ।। 108 ।।

अहो बिलस्येश निवेदितान्नं
हरित्पतीभिः परिवेषितं त-
त्सामुद्रमारभ्य घृतान्तमाशु
सर्वेऽमृतप्रायमदन्यथेष्ठम् ।। 109 ।।

ततस्तु भगवान् जगदीश्वरोऽपि यथा तृप्तिर्जगद्यनन्तरं दिव्यताम्बूलादिना तद्दिविजद्विजऋषिमुनिपुङ्गवान्सत्कृत्य भवतां ज्ञानपूर्णानां किमनेन पूर्णता तदपि मद्दत्तं लघ्वपि बहूकृत्य स्वीकृतवन्तो दयावन्तो भवन्त इतीत्थं प्राकृतवत्प्रार्थनाम् अकरोत्।।110।।

अथ स्वयं भोजनमाचरत्स-
श्श्रिया समेतो वृषशैलनाथः ।
शम्भुस्वयंभ्वग्निहरित्पतीभि-
र्द्विजेन्द्रयुक्तो द्विजवैरिरिक्तः ।। 111 ।।

तत्रान्तरे सवितर्यस्तङ्गते सति कुमुदमित्रेण सह रात्रिः समभवत्।।112।।

शयनं कृतवान्देवो विनिद्रोऽपि स्वयं हरिः ।
रमया सह पर्यङ्के तद्रात्रौ प्राकृतो यथा ।। 113 ।।
ब्रह्मादिसुरवर्याश्च कश्यपादिमुनिद्विजाः ।
स्त्रीबालवृद्धास्सर्वेऽपि शयनं चक्रिरे मुदा ।। 114 ।।
तत्र केचित्कन्दरेषु केचिद्वरगृहेषु च ।
केचिद्दरीगह्वरेषु शयन्तस्तरुमूलगाः ।। 115 ।।

In Public domain. Digitization Muthulakshmi Research Academy

।। इति श्रीशिरशिनहलान्वयसञ्जात-कौण्डिन्यगोत्र-
श्रीमद्वेङ्कटाचार्यपुत्र-श्रीरङ्गमाम्बागर्भसम्भूत-श्रीकृष्णमाचार्य-
विद्वद्वर्यकृपालब्धविद्येन पेरुमाण्डूलाचार्यकविना विरचिते
श्रीवेङ्कटेशचम्पूप्रबन्धे सप्तमोऽयं स्तबकः ।।

In Public domain. Digitization Muthulakshmi Research Academy

अथ अष्टमस्तबकः

ततः प्रभाते विमले प्रजाते
सतां गतिश्श्रीपतिरात्मजेन ।
गन्तुं वियद्भूपपुरं प्रतीशो
प्रयाणभेरीं समताडयन् सः ॥ 1 ॥

कृत्वाऽग्रतः पद्मजमाशु सव्ये-
प्युग्रञ्च वामे मरुतं कुमारम् ।
पृष्ठे निधायाब्जभवा समेतो
ययौ रमेशो गरुडाधिरूढः ॥ 2 ॥

सितातपत्रं शशिमण्डलप्रभं
दधार शेषश्चसनश्च चामरे ।
सुवर्णदण्डव्यजनेन माधवं
चमूपतिर्वीजयति स्म तं स्वयम् ॥ 3 ॥

भेरीमृदङ्गपणवानकगोमुखादि-
वादित्रघोषपरिघोषितदिङ्नभोन्तम् ।
सङ्गीतनाट्यनटनर्तकगायकानां
व्यूहैस्तुतो हरिरगाद्द्विजवेदघोषैः ॥ 4 ॥

तमनुसृत्य सुपर्वगन्धर्वमहोरगकिन्नरकिम्पुरुषाप्सरससिद्ध-
चारणसाध्यगणास्सकलऋषिमुनिद्विजपुङ्गवाश्चाबालवृद्धजनास्सर्वेऽपि

In Public domain. Digitization Muthulakshmi Research Academy

स्त्रियश्च सर्वास्सपरिवारास्सपरिकराधृतशस्त्रास्त्रकराश्शूराश्च गजाश्व-रथशकटाधिरूढाः सन्तः केचित्पादचारिणोऽपि जग्मुः ।।5।।

केचिद्धसन्ति विलपन्ति विलासयन्ति
केचित्पतन्ति पतितांश्च समुद्धरन्ति ।
केचिन्नटन्ति कथयन्ति विचित्रगाथाः
केचित्प्रयान्ति सकलान्त्वरयन्ति केचित् ॥ 6 ॥

सुराङ्गनाश्चारुविलोचनास्ताः
गन्धर्वकन्या ऋषिमौनिपत्न्यः ।
वैखानसानां वनिताश्च सर्वाः
अवातरन् श्रीभुजगेन्द्रशैलात् ॥ 7 ॥

वृषाद्रिमारभ्य वियन्नृपस्य
पुरावधीशस्य जनप्रमर्दः ।
तन्मार्गमध्ये तिलमात्रभूमि-
र्न दृश्यते किञ्चिदपीक्षणस्य ॥ 8 ॥

शैलावरोहाज्जनबृन्दमाला
अब्ध्यूर्मिमालेव गता स घोषा ।
श्रीशस्य कल्याणमहोत्सवस्य
संशेवना याति कुतूहलेन ॥ 9 ॥

एवं विभवमास्थाय श्रीनिवासो जगद्गुरुः ।
तन्मध्ये पद्मतीर्थाख्यं महातीर्थं समासदत् ॥ 10 ॥

प्राप्तं च विष्णुं पतगाधिरूढं
ब्रह्मेन्द्ररुद्राद्यमरैस्समेतम् ।

In Public domain. Digitization Muthulakshmi Research Academy

वेदोपगीतं ऋषिभिस्तुवन्तं
दृष्ट्वा ववन्दे शुकयोगिवर्यः ।। 11 ।।

यं ब्रह्मरुद्रसुरयोगिवरैरगम्यं
वाचामगोचरमहं त्वधुना भवन्तम् ।
पश्यामि देववरनेत्रयुगेन तस्मा-
दद्यैव मत्कृततपस्सफलं हि मन्ये ।। 12 ।।

सपुत्रमित्राखिललोकपालं
श्रियाऽहिनाथेन युतं यतोऽहम् ।
पश्यामि दृग्भ्यां मम भाग्ययोगात्
त्वदङ्घ्रिपूजा सफला ततस्स्यात् ।। 13 ।।

निष्किञ्चनोऽहं श्रुणु देववाक्यं
मद्दत्तमन्नं फलकन्दमूलम् ।
भुक्त्वाऽत्र गन्तव्यममेयकीर्ते
भुक्ते त्वयीशे निखिलं हि भुक्तम् ।। 14 ।।

इत्युक्तो भक्तानुरक्तो भगवांस्तत्र शुकेन भक्त्युपचितापचतिं स्वीकृत्य तद्दत्तमन्नममृततुल्यं भुक्त्वा तदा पूत्कारेण तृप्तीकृतदिविज-द्विजऋषिमुनिगणस्सन् तद्दिवसं तत्रैव नीत्वा ततः परेद्युरुषस्युत्थाय चतुरङ्गबलसमेतं शतधृतिं पुरोधाय श्रीपतिर्विनतासुतमधिरुह्य नवम्यां गुरुवासरे रव्यस्तमयसमये तद्वियन्नृपपुरवरमरं ययौ ।।15 ।।

वियन्नृपोऽथ स्वसुतां सुभूषा-
मारोप्य चैरावतनामनागम् ।

In Public domain. Digitization Muthulakshmi Research Academy

पद्मावतीं पुत्रपुरोहिताभ्यां
भ्रात्रायुतो गोत्रभिदा ययौ सः ॥ 16 ॥

बलैरनेकैर्गजवाजिपत्तिभिः
रथैरनेकैर्ध्वजचिह्नितैश्शुभैः ।
अनेकभेरीघनदुन्दुभिस्स्वनैः
स तूर्यघोषैरखिलैश्च संवृतः ॥ 17 ॥

सूतैस्तथा मागधवन्दिभिश्च
संस्तूयमानो नटनर्तकाग्रैः ।
पौरैश्च राजा घनसैन्यमध्ये
रराज खे चन्द्र इवोडुमध्ये ॥ 18 ॥

एवं महद्वैभवयुङ्नरेन्द्र-
स्तं द्रष्टुकामः कुतुकातिरेकात् ।
ततः पुरद्वारमुपेत्य शौरिं
ददर्श शक्रेण च दर्शितं तम् ॥ 19 ॥

श्रीवेङ्कटेशं स्मितचारुवक्त्रं
राजीवनेत्रं रमणीयगात्रम् ।
ब्रह्मेन्द्ररुद्राद्यमरैस्स्तुवन्तं
ताक्ष्यधिरूढं तरुणारुणाभम् ॥ 20 ॥

दृष्ट्वाऽथ सन्तुष्टमनास्सराजा
रथात्समुत्तीर्य मुदा स्वपुत्रीम् ।
पद्मावतीं तां पुरतो निधाय
बद्धाञ्जलिश्चेदमुवाच शौरिम् ॥ 21 ॥

In Public domain. Digitization Muthulakshmi Research Academy

धन्योऽस्मि देव कृतकृत्यपवित्रजन्मा
स्वर्मार्गगोऽहमतिरिक्त भवाब्धिदुर्गः ।
मत्पूर्वजन्मकृतपुण्यफलं सुपक्वं
मन्ये त्वदीयपदपङ्कजदर्शनेन ॥ 22 ॥

इत्युक्त्वाऽतिभक्त्याऽनेकधा स्तुत्वा भक्तजनानुरक्तं श्रीयुक्तं जामातरममूल्यस्त्रग्वस्त्राभरणादिभिरनेकदिव्यसुगन्धद्रव्यैस्तैलैश्च समपूजयत्॥23॥

लज्जाविनम्रवदना परिमोहिता सा
पद्मावतीपतिमतीव ददर्श मुग्धा ।
तां स्वानुरूपकुलशीलवयः प्रवृत्तां
कन्यां च धन्यचरितां हरिराददर्श ॥ 24 ॥

एवमन्योऽन्यविलोकनलोलयोः पद्मावतीश्रीनिवासयोस्सतोः तदुत्सवसन्दर्शनोत्सुकजनितानन्दभरिताः वासुदेवस्य ये भक्तास्ते सर्वेऽप्यत्यन्तानुरक्ताः परस्परं परिरेभिरे ॥ 25 ॥

ततश्च सहस्रायुतसंख्यापरिमिततैलसंसिक्तोद्दीपकदीपजालैः रितस्ततो लाजापुष्टाऽक्षतान्विकिरन्तीभिस्सुवासिनीभिस्स्तुवद्भिस्सूत-मागधवन्दिभिर्वेदघोषपुरस्सरमाशीर्वादं प्रकुर्वद्भिर्ब्रह्मादिभिस्सुरवरैः शुकप्रमुखऋषिवर्यैर्भूसुरैश्च भगवन्तं प्रशंसयद्भिः पौरनारीनरैश्च संवृतो वियन्नृपतिस्सुतामात्यपुरोहितसहितस्स पद्मावतीसमेतं पतगपति-वाहनाधिरूढं श्रीनिवासं शनैश्शनैर्नारायणपुरे समन्तात्सञ्चारयामास ॥26॥

In Public domain. Digitization Muthulakshmi Research Academy

किञ्च रम्भास्तम्बकदम्बगुम्भितेक्षुदण्डषण्डमण्डितं पूगीपोतनारिकेलखर्जूरविशालशाजाभिरूपशोभितं रसालपल्लवोल्लसितशातकुम्भमयपूर्णकुम्भैरलङ्कृतमनुक्तमूल्यमुक्ताफलजालमालालङ्कृतं वज्रवैदूर्यगोमेधिकपुष्यरागमहारागपद्मरागशतमखनीलमरकतमणि प्रख्यतोरणैर्विलसितं कस्तूरी घनसारकर्दममर्दितचन्दनोदकैस्संसिक्तं कुङ्कुमोदकसम्पूर्णं तूर्णं चकत्कनकभाजनैस्त्रीजनैर्नीराजयद्भिर्विराजितं चतुष्पथं वेदीत्रयं परिक्रम्य विश्वकर्मनिर्मिते बहुरत्नसमञ्चितभर्ममयसुन्दरमन्दिरे श्रीकान्तं प्रियबन्धुजनबृन्दसंयुतं प्रवेशयामास स नृपतिः ।। 27 ।।

तदा तु पञ्चघटिका रात्रिस्समभवत्ततः ।
जगाम भवनं राजा वासुदेवाज्ञया स्वयम् ।। 28 ।।

तदाऽगतं तं प्रियतोण्डमान-
माहूय शौरिर्भगवानवोचत् ।
सर्वे क्षुदार्ता नृप सन्ति शीघ्रं
तत्पावकेन क्रियतां सुपाकः ।। 29 ।।

स कारयित्वा ज्वलनेन पाकं
नृपार्हमन्नं विविधं क्षणेन।
सयोषितां देवऋषिद्विजानां
समर्पयामास सदक्षणाकम् ।। 30 ।।

चतुर्विधान्नं मधुभक्ष्ययुक्तं
सापूपमानीय जनात्समेत्य ।

In Public domain. Digitization Muthulakshmi Research Academy

अकल्पयद्भोजनमस्य शौरेः
वियन्नृपालोऽथ विनम्रशीलः ॥ 31 ॥

शेक्षेण तार्क्ष्येण नृपश्रिया च
मात्रा विधात्रा कृतभोजनस्य ।
दिव्यानि वस्त्राणि हरेश्च दत्वा
तदाऽज्ञयाऽथ स्वगृहं ययौ सः ॥ 32 ॥

ततो गतेऽऽकाशपतौ रमेश-
स्सुखान्वितस्तत्र सुखासनस्थः ।
निद्रामनिद्रोऽपि चकार भद्रां
यथा युगान्ते वटपत्रशायी ॥ 33 ॥

एवं गता सा च निशा निराशा
प्रभाववेशात्वभवत्तथैव ।
उत्थाय शीघ्रं कृतमज्जनादिः
तदा वसिष्टं हरिराबभाषे ॥ 34 ॥

समया भोजनं कार्यं रमया परमेष्टिना ।
मात्रा पुरोहितेनापि वयं पञ्चान्नवर्जिताः ॥ 35 ॥

राज्ञस्तु भवने राजा राजभार्या पतिव्रता ।
कन्या पुरोहितो भ्राता तेऽपि पञ्चान्नवर्जिताः ॥36॥

मुहूर्तकालः खलु नाडिकानां
त्रयोदशाद्याभिहितस्तु रात्रौ ।
सुरद्विजानाम्मधुकुल्यजग्धिः
कार्या ऋषीणामपि पूर्वमेव ॥ 37 ॥

In Public domain. Digitization Muthulakshmi Research Academy

इत्येवं तेन सम्यगालोच्य लक्ष्मीपतिर्यक्षपतिमाहूय तक्षणमेव सुरनरऋषिमुनिद्विजानां सर्वेषां प्रशस्तभोजनव्यवस्था कारयितव्येति आकाशभूमीशसमीपं प्रेषयित्वा तेन सह सर्वं सक्रममकारयत् ॥38॥

ततो दशम्यां भृगुवासरे तु
सायाह्नकाले सबलो नृपालः ।
श्रीवेङ्कटेशानयनार्थमाशु
ययौ मुदैरावतनागयुक्तः ॥ 39 ॥

तत्र विश्वकर्मनिर्मितभर्ममयचित्रविचित्रानल्पशिल्पचित्रित-प्ररत्नरत्नखचितायुतस्तम्बकदम्बशोभितसुधर्मासधर्मसभामध्ये विद्योतमानरत्नकम्बलपरिष्कृतदिव्यपीठे वसन्तं ब्रह्मेन्द्ररुद्राद्यमरबृन्द-वन्दितं सकलऋषिगणसेवितं श्रीरमणं प्राप्य ततस्तत्कृतपरिरम्भणा-दिकसत्कृतिं स्वीकृत्याविलम्बेनारुन्धतीं पुरस्कृत्य रमापतेरपचितिं कुर्विति स्वसहधर्मिणीं धरणीं समादिशत्सनृपतिः ॥ 40 ॥

सवेगमुत्थाय सकौतुका सती
हरेर्मुखं सा प्रथमं विलोक्य ।
कृतार्थमात्मानमतीव मत्वा
तदाऽतिभक्त्या समपूजयत्तम् ॥ 41 ॥

सुगन्धतैलेन सुचन्दनेन
अमूल्यवस्त्राभरणैरनेकैः ।
लज्जाधिकानन्दयुताऽतिभक्त्या
जामातरं श्रीवरमर्चयत्सा ॥ 42 ॥

तमनन्तरमनन्तविभुरनन्तगिरीशं रमेशं जामातरमैरावत-करीशमध्यवासयत्तदा ॥ 43 ॥

In Public domain. Digitization Muthulakshmi Research Academy

ब्रह्मेन्द्ररुद्रसुरयोगिमुनिद्विजेन्द्रै-
र्दिक्पालकैर्नृपवरैरखिलैर्जनौघैः ।
तूर्याद्यनेकघनमङ्गलवाद्यघोषै-
राकाशराजभवनं प्रययौ रमेशः ।। 44 ।।

तत्रान्तरे [1]तुमाऽऽगत्य मन्दिरद्वारतोरणे ।
हरिं नीराजयन्ती सा वासुदेवमपूजयत् ।। 45 ।।

चतुरङ्गबलं हित्वा तद्द्वारनिकटे स्वयम् ।
ततः पश्चाच्छ्रीनिवासः प्राविशद्राजमन्दिरम् ।। 46 ।।

प्रदीप्तदीपायुतदीपितं शुभं
सचित्ररत्नाञ्चिततोरणान्वितम् ।
सुवाद्यघोषैः परिनादितं भृशं
विवेश तद्राजगृहं जनाकुलम् ।। 47 ।।

द्वाराणि सर्वाण्यथ सूधवस्तान्यतीत्य राज्ञा भवनं प्रविश्य ।
रत्नासने राजविनिर्मितेऽसौ रराज राजीवसमाननेत्रः ।।48।।

रत्नवेदीं चतुस्स्तम्भां मुक्ताजालैरलङ्कृताम् ।
अधिष्ठाप्य जगन्नाथं तस्थुस्ते मुनयो द्विजाः ।। 49 ।।

कृत्वाग्रतश्शतधृतिं परिवार्य देवं
सर्वे स्थिता अनिमिषाः कनकासनस्थाः ।
कल्याणदिव्यविभवानुभवाय तस्य
पश्यन्त एव कुतुकान्नयनोत्सवं ते ।। 50 ।।

ततस्सराजा सजायस्सालङ्कृतस्सपुरोहितश्श्रीस्वामिसमीपम्

1) तुमा नाम्नी तोण्डमाननृपस्य पत्नी ।

In Public domain. Digitization Muthulakshmi Research Academy

उपेत्य तत्र ब्रह्मघोषयद्भिर्ब्राह्मणैश्श्रीस्वामिपुष्करिणिपुण्यपुष्करप्रपूरितशौतकुम्भकुम्भमानीय तदाऽऽदावगण्यपुण्यनिदानस्य कन्यादानं सविधिवत्सङ्कल्पमविकल्पमथमधुपर्कमतर्क्यञ्च किञ्च मधुमधनपादावने जनं भूमिस्राविंतैश्श्रीस्वामितीर्थजलैः कृत्वा तच्चरणकमलविमलसलिलं स्वशिरसि धृत्वा स्वात्मानं धन्यं मन्यमानस्स्वकलत्रपुत्रभ्रातृकोशगजाश्वरथवस्त्रागाराणि सर्वाण्यमार्जयत्॥51॥

जीवः पुरोहितवतो भगवान्वसिष्ट-
शिशष्टाश्शुकादिमुनियोगिवराश्च सर्वे ।
कृत्वा पटं नववधूवरयोश्च मध्ये
सन्मङ्गलाष्टकमलं क्रमशोऽपठंस्ते ॥ 52 ॥

कन्याप्रदानसमये वरदक्षिणार्थं
तन्निष्ककोटिधनराशिममूल्यहैमम् ।
सद्वज्ररत्नमकुटं शतभारभारं
श्रीवेङ्कटेशाय तु प्रददौ नृपालः ॥ 53 ॥

किञ्च ग्रैवेयहारकटककेयूरनूपुराङ्गुलीयककटिसूत्रयज्ञसूत्रकटिभूषणकण्ठभूषणकर्णभूषणभुजभूषणनागभूषणपादुकद्वयाद्यनेकानेकभूषणानि वज्रवैडूर्यगोमेधिकपुष्यरागादिदिव्यमणिदीप्तानि च दत्वाऽथ नृपतिः पत्न्या सह 'इमां कन्यां प्रदास्यामि गृहाण पुरुषोत्तम' इति सकलभूषणभूषितस्य श्रीनिवासस्य दक्षिणकरे धरण्यास्रावितमन्त्रपूतश्रीस्वामितीर्थपुण्यतीर्थधारां सकार्तस्वरां प्रक्षिपन् सालङ्कृतां श्रीमतीं पद्मावतीं कन्यां च प्रददौ ॥ 54 ॥ (ततश्च)

रक्षासूत्रमबन्धयद्भगवतश्श्रीवेङ्कटेशस्य त-
द्भक्तानामभयं करे त्रिभुवनक्षेमङ्करे शङ्करे।

In Public domain. Digitization Muthulakshmi Research Academy

लोकानां कलिकल्मषापहरणे दक्षे करे दक्षिणे
मौनीनां तिलकोपशिष्टभगवान्तस्मिन्विवाहे शुभे ।।55।।

तथा गुरुः कङ्कणमेव दिव्यं
पद्मावतीपद्मकरे बबन्ध ।
माङ्गल्यसूत्रं त्वथ माधवोऽपि
तत्कण्ठमध्ये स्वयमाबबन्ध ।।56।।

ततोऽनन्तरकर्तव्यानि वैवाहिककार्यकलापानि सर्वाणि भगवद्वसिष्टगुरुपुरोहिताभ्यां विधिवत्सम्पूर्णं कृतान्यभूवन् ।। 57 ।।

पद्मावतीयुतश्श्रीशो रत्नसिंहासने स्थितः ।
भाति विद्युल्लतायुक्तो नीलमेघ इवाम्बरे ।। 58 ।।

ततो वसिष्ठप्रमुखा मुनीन्द्राः
आशीर्वदन्तो जगदीशमूर्ध्नि ।
प्रचिक्षुपुर्रत्नघनाक्षतास्ते
नक्षत्रपुञ्जा इव भात्यनन्ते ।। 59 ।।

तस्मिन्काले महोत्साहो राजा सन्तुष्टमानसः ।
ताम्बूलपूर्वकं देव विदुषां दक्षिणां ददौ ।। 60 ।।

गवाङ्कोटिसहस्राणि अश्वानामयुतं तथा ।
वस्त्राणां निचयं राजा विप्रेभ्यो दत्तवान्मुदा ।। 61 ।।

पद्मावतीवेङ्कटशैलदाम्नोर्यदा
विवाहो महदद्भुतोऽभूत् ।
तदा नृणां तत्र वियन्नृपस्य
पुरे स्थितानां नयनोत्सवोऽभूत् ।।62।।

In Public domain. Digitization Muthulakshmi Research Academy

एवं दिनचतुष्टयमदृष्टपूर्वं प्रकृष्टसन्तुष्टविशिष्टं श्रीशस्य कल्याणमहोत्सवं महद्वैभवोपेतमवाङ्मानसगोचरमभूत्तत्र निवासिनाम्॥63॥

नास्तीतिवादो न हि तत्र विद्यते
लोपो ममासीदिति यत्र कुत्र ।
वार्तापि किञ्चिन्नहि श्रूयतेऽत्र
तत्र स्थितानामखिलं समृद्धम् ॥ 64 ॥

एवं प्रहृष्टा मधुसूदनस्य
मुखारविन्दं नयनैः पिबन्त्यः ।
राज्ञा मुदा सत्कृतभोजनादि-
सत्कारपूता अभवन् जनास्ते ॥ 65 ॥

ततोऽह्नि पञ्चमे प्राप्ते कृत्वा नाकबलिं नृपः ।
पद्मावतीं भूषिताङ्गीमर्पयामास विष्णवे ॥ 66 ॥

पद्मावतीयुतं श्रीशं गजमारोप्य वै नृपः ।
गृहप्रवेशमकरोन्महद्वैभवसंयुतः ॥ 67 ॥

तदाऽनुक्षणमेव कृपाकटाक्षेण श्वशुरं प्रसाद्य तद्दत्तगजवाजि-रथदासदासीजनान् किञ्चिदप्यन्यूनतण्डुलादिसकलसामग्रीं स्वीकृत्य ततः पद्मावतीयुतो गरुडाधिरूढस्सभगवान्हरिर्ब्रह्मादिभिर्निर्गतस्सन् सुवर्णमुखरीं प्राप्य षण्मासावधि नूतनवधूवरौ पर्वतारोहणं न कुर्यास्तमिति शास्त्रमनुसृत्य तत्रैव अगस्त्याश्रमे निवासम् अकरोत् ॥ 68 ॥

महोत्सवं तं त्वनुभूय देवताः
विधीशपूर्वा ऋषिमौनिसत्तमाः ।

In Public domain. Digitization Muthulakshmi Research Academy

ययुस्स्वकं दाम रमेशसत्कृताः
यथाऽधिकारं धनवस्त्रभूषणैः ॥ 69 ॥

मासैकमात्रं त्वथ तत्र नीत्वा
हरेरनुज्ञां प्रतिपद्य हृद्याम् ।
तदा च लक्ष्मीः करवीरनामकं
पुरञ्जुगामाशु वरं स्वधाम ॥ 70 ॥

तत्रास्ते कलशोद्भवस्य निलये प्राप्याच्युतस्स्वेच्छया
लीलामानुषवेषभूषिततनुर्नीलाभ्रनीलद्युतिः ।
पद्मावत्यनुमोदकस्त्रिजगतां सम्पालयल्लीलया
भुञ्जानो भगवान्स्वयं सुरिचिरान्भोगानमेयान्बहून् ॥71॥

॥ इति श्रीशिरशिनहलान्वयसञ्जात-कौण्डिन्यगोत्र-श्रीमद्वेङ्कटाचार्यपुत्र-श्रीरङ्गमाम्बागर्भसम्भूत-श्रीकृष्णमाचार्य-विद्वद्वर्यकृपालब्धविद्येन पेरुमाण्डूलाचार्यकविना विरचिते श्रीवेङ्कटेशचम्पूप्रबन्धे अष्टमोऽयं स्तबकः ॥

In Public domain. Digitization Muthulakshmi Research Academy

अथ नवमस्तबकः

अथ नियमितकालेऽप्यागते तत्र दूतं
गगननृपपुराद्वै प्राप्तमुद्वीक्ष्य पद्मा।
अवददिति तदा तं केन सम्प्रेषितोऽसि
वद मम पितृमातृभ्रातरः किं प्रशस्ताः ॥ 1॥

तयैवमुक्तं तु निशम्य दूतो
दुःखेन सन्दिग्धविलोचनस्सन्-
उवाच वाचं बहुदुःखरूपां
तां राजपुत्रीं जगदेकधात्रीम् ॥ 2॥

मातस्ते तातपादः क्षितितलपतितश्श्वासमात्रावशिष्ट-
स्तान्तं त्वामेव नित्यं प्रलपति तव सन्दर्शने बद्धजीवः।
स्वर्गन्ताराज्यमेतत्स्वयमपि निखिलं हेयकायं विसृज्य
तस्माद्देवेन साकं धृततरमधुना माधवेन प्रयाहि ॥ 3॥

तद्वाक्यमाकर्ण्य पपात भूमौ
पद्मावती वातहता लतेव।
तां मूर्छितां कुम्भभवप्रिया सा-
प्युत्थाय निन्ये मधुजित्समीपम् ॥ 4 ॥

तद्वार्तामवदद्देवि दुःखार्ता विष्णवे तदा।
तच्छ्रुत्वा श्रीनिवासोऽपि रुरोद नरवत्प्रभुः ॥ 5॥

In Public domain. Digitization Muthulakshmi Research Academy

ततः पद्मावतीं नीत्वा शौरिर्वकुलया सह ।
अगस्त्यमुनिना वेगान्नारायणपुरं ययौ ॥ 6॥

प्रविश्यचान्तर्भवनं शयानं
निश्वासमात्रैकयुतं नृपं तम् ।
दृष्ट्वाऽस्य काये पतितो रमेशः
रुरोद दीर्घं नरवद्धिचित्रम् ॥ 7 ॥

मुखे मुखं नेत्रयुगे स्वनेत्र-
युगं ललाटस्य तले ललाटम् ।
उरस्युरोऽरं श्वशुरस्य तस्य
न्यस्याङ्गसङ्गं प्रददौ हरिस्स्वयम् ॥ 8 ॥

हा तात नाथ मम बान्धवभूधवस्त्वां
पुत्रीं च पुत्रमपि सोदरमद्यकायम् ।
राज्यं सराष्ट्रकमिदं निखिलं त्वदीयं
हित्वा क्व यास्यसि तथेह विहाय मां त्वम् ॥ 9 ॥

इत्यद्भुतं रोदनमाचकार
विडम्बयन्तत्र जनं रमेशः ।
यथा कुरूणां रणरङ्गमध्ये
कर्णे हते धर्मसुतश्चकार ॥ 10 ॥

रुदत्येवं भगवति किञ्चित्संज्ञायुतो नृपः ।
पुत्रं सभ्रातरं त्राहीत्युक्त्वा तस्य करे ददौ ॥ 11 ॥

भार्यां स्वलोकगमनाय समादिशन् सः
पद्मावतीयुतमहीन्द्रगिरीन्द्रनाथम् ।

In Public domain. Digitization Muthulakshmi Research Academy

संसेव्य विष्णुमनघं भवभीतिकृन्तं
ध्यात्वा तदा नरपतिर्विजहौ स्वकायम् ।। 12 ।।

ततश्श्रीधवस्तन्मृताकाशभूमीशस्य सभार्यस्य कश्यपादि-महर्षिभिस्सह ब्रह्ममेधसंस्कारपूर्वकाणि प्रेतकार्याणि विधिवत् अकारयत् ।। 13 ।।

एवं सर्वं समाप्य ततस्सभगवान्वेङ्कटेशः पद्मावतीसहितः अगस्त्यनिलयं प्राप्य तत्र सुखमास्त ।। 14 ।।

यदा मृते राज्ञि गते रमेशे
तदा महान्वै कलहोऽत्र जातः ।
राज्यार्थमाकाशनृपात्मजस्य
तत्तोण्डमान्नामकभूधवस्य ।। 15 ।।

राज्यं ममैवास्त्विति तोण्डमानो
ज्येष्ठे कनिष्टस्य मृते प्रसिद्धम् ।
पित्र्या पराक्रम्य समार्जितं त-
द्राज्यं ममैवेति नृपात्मजोऽपि ।। 16 ।।

एवं राज्यार्थमत्यर्थमन्योऽन्यमन्यूनमन्युना कलहमलङ्कुर्वन्तौ अथ युद्धसिद्धमिदं राज्यं सर्वं सर्वसम्पूज्यं यस्य जयस्तस्य स्यादिति समयं कृतवन्तौ महत्सङ्गरसम्भारसमीकरणत्वरमाणौ तौ तोण्डमान-वसुधानावुभावपि तत्सहायाशया श्रीनिवासस्य समीपमुपेत्य युगपत्तच्चरणारणारविन्दौ शरणङ्गतावभूताम् ।। 17 ।।

कृष्णस्य सान्निध्यमुपेयिवन्तौ
युद्धार्थिनौ पार्थकुरुप्रवीरौ ।

In Public domain. Digitization Muthulakshmi Research Academy

यथा तथा राजसुतानुजौ तौ
हरेस्समीपं युगपत्समेतौ ॥ 18 ॥

तावागतौ श्रीपतिरेवमीक्ष्य
हृष्टप्रकृष्टेन समालिलिङ्ग ।
पृष्ट्वाऽथ दत्वा कुशलं च पीठं
प्रीत्या मनोज्ञं वचनं बभाषे ॥ 19 ॥

हे प्रियबान्धवाविदानीं युगपद्भवदागमनं किं निमित्तकं तद्विशदीक्रियतामिति तदुक्तयोस्तयोः प्रप्रथमं वसुधानस्सावधान इदमवादीत्॥20॥

युद्धं कनिष्टजनकेन मम प्रसक्तं
राज्यार्थमेव पितृमातृविवर्जितस्य ।
साहाय्यमद्य कुरु देव विना त्वया मे
कोऽन्योऽस्ति बन्धुरधिकः प्रियकृत्तमोऽपि ॥ 21 ॥

इति वदति वसुधाने सति तदैव भगवन्मम पुरस्थितं महत्सङ्गरकार्यनिर्वहणं कुर्विति तोण्डमानोऽप्ययाचत ॥ 22 ॥

उभयोर्वाक्यमाकर्ण्य भगवान्त्रिजगतत्पतिः ।
एकोऽहं कस्य साहाय्यं करोमीति विचिन्तयन् ॥23॥

ततस्तदानीमेवान्तर्भवनं प्रविश्य तत्रत्यां पद्मावतीमाहूयेदम् उवाच भगवान्मधुसूदनः ॥ 24 ॥

पद्मे महत्कष्टतरं हि कार्य
मासन्नमेतच्छृणु मत्समीपम् ।

In Public domain. Digitization Muthulakshmi Research Academy

त्वत्सोदरस्त्वज्ञनकानुजश्च
तावागतौ युद्धसहायकामौ ।।25।।

अतस्तावुभावप्यतिमात्रप्रियबान्धवौ तव तातपादेन स्वमरणवेलायां मामाहूय मम पुत्रं भ्रातरं च त्राहीति मद्धस्ते न्यस्तवन्तौ खल्वनयोर्मध्ये एकोऽहं कस्य साहाय्यं करोमीति मम जातामतिविचिकित्सामुत्सारयितुमत्यर्थं समर्थासीत्यहं मन्येऽतस्त्वं देवि तव यद्रोचते तत्सर्वं सम्यगालोच्य मां नियोजयेति वदन्तं भगवन्तं प्रतीदं पद्मावत्यवोचत् ।। 26 ।।

भगवन् सर्वज्ञस्सर्वजगन्नियामकोऽपि भवान् त्वच्चरणकमल-रेण्वणुकणसदृशामपि मां परिपृच्छसि भवतेदानीं किं वदेयं तदपि भवत्प्रसादितनिदेशमनुसृत्यैव मया यत्किञ्चिदुच्यते तत्सर्वं सावधानेन श्रूयताम् ।। 27 ।।

धर्माधर्मौ संस्थितौ सन्नराणां
नित्यं प्राज्ञा धर्ममेवाश्रयन्ति ।
धर्माधारो धर्ममेवाचरत्वं
धर्मो लोके कीर्तिदः पुण्यदस्स्यात् ।। 28 ।।

अतः बलाधिकाद्बलहीनस्यैव सहायकरणं धर्म इति मन्ये ।।29।।

पितृमातृविवर्जितोऽधनः
कृशगात्रो बलहीनबालकः ।
असहायकृदाप्तबन्धुकः
तव पाल्यो वसुधा न एव सः ।। 30 ।।

In Public domain. Digitization Muthulakshmi Research Academy

सहायसम्पत्तिसमृद्धिमान्नृप-
स्सतोण्डमानो बलवान्बलाधिकः ।
वृथा पितुः काङ्क्षति राज्यमद्य मे
अधर्ममेवास्य हि पालनं तव ॥ 31 ॥

इति युक्तियुक्तं तदुक्तं व्यक्तं निशम्य तद्धृद्गताशयं चापि सम्यग्ज्ञात्वाऽनन्तरमित्थमकरोच्चक्रपाणिः ॥ 32॥

स्वशङ्खचक्रे प्रपदौ स तोण्डमा-
न्नृपस्य देवोऽप्यथ शालकस्य च ।
स्वयं विचार्य प्रियया सहायकृ-
द्ययौ रमेशस्तुरगाधिसंस्थितः ॥ 33 ॥

नारायणपुरप्रान्ते दक्षिणे रणमेदिनीम् ।
पद्मगृध्रव्यूहमध्ये कृत्वा विद्योतवान् हरिः ॥ 34 ॥

यथा कुरूणामथ पाण्डवानां
युद्धं प्रवृद्धं बहुवीरपातम् ।
तथैव चाकाशसुतस्य तोण्डमा-
न्नृपस्य युद्धं त्वभवत्सुघोरम् ॥ 35 ॥

समरे गजवाजिपत्तिभिः
परिवृत्ते रथिकैः परस्परम् ।
विरथीकृततोण्डमान्सुतो
हरिणा तत्र सुवीरकर्मणा ॥ 36 ॥

रथादवत्प्लुत्य ततस्सकोपा-
च्छिक्षेप चक्रं त्रिदशं नृवीरः ।

In Public domain. Digitization Muthulakshmi Research Academy

हरौ हरौ चौरसि भूरि वैरि
विदापकं वासववज्रकल्पम् ॥ 37 ॥
तेन प्रविद्धो रणरङ्गमूर्ध्नि
पपात छत्रेण स विक्रमेण ।
त्रिविक्रमेऽप्याहव चक्रसंस्थान्
मनुष्यभावेन विडम्बयन्तान् ॥ 38 ॥
प्राकारसंस्था परिशोचयन्ती
पद्मावती मूर्छितमात्मनाथम् ।
दृष्ट्वाऽगताऽगस्त्यतपोधनेन
सहाजिरे शौरिसमीपमाप ॥ 39 ॥
शीतोदकामोदकतालवृन्तै-
स्सम्मार्जितस्सन्प्रियया रमेशः ।
स्थित्वेवमूर्च्छां गतवान्मुहूर्तं
विडम्बयन् लोकमिमं प्रबुद्धः ॥ 40 ॥
उत्थाय चापशरभृद्रणरङ्गमूर्ध्नि
पश्यन्दिशोदश हरिः प्रथमं प्रदृश्य ।
पद्मावतीं च भृकुटीकृतलोचनस्सन्
तां गर्हयन्निदमुवाच कृधा मुनीन्द्रम् ॥ 41 ॥
घोरे रणेऽगणितशस्त्रमहास्त्रपाते
स्त्रीणामिहागमनमत्र न शोभनं स्यात्
एषाऽद्य गच्छतु मुने प्रथमन्तु गेहं
सल्लापनाय मृदुकेलितलं नहीदम् ॥ 42 ॥

In Public domain. Digitization Muthulakshmi Research Academy

तन्निशम्य मुनिस्तं प्रतीत्थं प्रवक्ति ।। 43 ।।

सन्धिरत्र प्रकर्तव्या स्वबन्धुमरणं प्रति ।
शोचत्येषा समाधानं कर्तुकामाऽगता हरे ।। 44 ।।

तत्समये कृताञ्जलिपुटा पद्मा तत्पादपद्मयोः पतित्वा शोच्यन्त्येवं प्रार्थयति स्म ।। 45 ।।

स्वामिन्श्रीनाथ मन्नाथ कृपां कुरु दयानिधे ।
किमनेन जगन्नाथ लोकनाशनकारिणा ।। 46 ।।

मा युद्धं भवतु प्रदेहि निखिलं राज्यं विभज्यानयोः
पूज्यं पूर्वतरक्रमादनुगतं चेदं समालोच्य तत्
कार्यं प्रार्यजनेढ्यमत्पितृकुलं सत्कीर्तिपात्रं त्वये-
त्येवं पार्थसखेऽर्थयेऽहमधुना सत्प्रार्थनापूर्वकम् ।।47।।

तन्निशम्य भगवानत्यन्ताघर्षवानिव तां भर्त्सयन्निदम् आह ।।48 ।।

गच्छ त्वमाशु रणरङ्गमुखादमुष्मा-
ज्ञानासि किञ्चिदपि तन्नहि राजधर्मम् ।
अद्यैव तोण्डनृपतत्सुतयोश्च भूरि
कायाद्धरामि शिरसि भुवि श्यालकार्थे ।। 49 ।।

इत्युक्तां भगवतीं पद्मावतीं तत्कोपशमनार्थं पुनः प्रार्थयितुमा-गच्छन्तीं तामप्येवमभाषत भगवान् शाङ्गपाणिः ।। 50 ।।

दूरं प्रयाहि मम सम्मुखमद्य देवि
स्थातुं न चार्हसि न शत्रुभयोऽत्र मेऽस्ति ।

In Public domain. Digitization Muthulakshmi Research Academy

त्वत्सोदरस्य परिरक्षणकार्यसिद्धौ
प्राणांस्त्यजाम्यपि न युद्धमिदं तु विद्धि ।। 51 ।।

एवं निशम्य तदा साऽत्यन्तकम्पमाना सती कथमपि रणाद्भगवन्तं निवर्तस्वेति मुनिमतीवायाचत ।। 52 ।।

तद्विज्ञापितोऽगस्त्यमुनिरथ तद्भगवत्समीपमुपेत्य तं प्रतीदमवोचत् ।।

रुषं किमर्थं कुरुषेऽद्य माधव
प्रवृद्धयुद्धं प्रियबन्धुनाशकम् ।
करोषि चेद्दुःखमतीव ते भवेत्
जयाजयौ दैववशौ हि दुर्ग्रहौ ।। 54 ।।

स तोण्डमानश्श्वशुरस्य सोदर-
स्सदैवपाल्यस्तव च प्रियानुजः ।
कथं कमेकं च तयोर्हनिष्यसि
वदाऽद्य सर्वज्ञ हरे दयाकर ।। 55 ।।

युद्धं त्यक्त्वा क्षमायुक्तः वधून्त्वरितमानय ।
समं विभज्य गोविन्द राज्यं कोशं तयोर्ददौ ।। 56 ।।

इत्यगस्त्योक्तं प्रशस्तं युक्तियुक्तमिति मत्वाऽथ सन्धिकारो भगवान् तत्क्षणमेव रणं प्रशाम्य तत्तोण्डमानवसुधानावाहूय युवयोः सन्धिं प्रकाङ्क्षति पद्मावत्यत्र भवतोर्मनोगतं किं तद्वक्तव्यमिति अपृच्छत् ।। 57 ।।

तदा बद्धाञ्जलिपुटौ तौ तोण्डमानवसुधानावुभावप्येवं भगवन्तं प्रत्यवदताम् ।। 58 ।।

In Public domain. Digitization Muthulakshmi Research Academy

त्वमेव गतिरस्माकं त्वय्येव रमते मनः ।
तव यद्रोचते शीघ्रं तत्कुरुष्व दयानिधे ॥ 59 ॥

तच्छ्रुत्वा तदनन्तरं निष्पक्षपातमतिश्श्रीपतिरित्थम् अकरोत् ॥ 60 ॥

विभज्य राज्यं क्रमशो यथार्हं
दत्वा तयोः षोडशभागमस्मिन् ।
सख्यं च कृत्वा समयानुकूलं
स्वयं गृहीत्वा स ययौ सजायः ॥ 61 ॥

॥ इति श्रीशिरशिनहलान्वयसञ्जात-कौण्डिन्यगोत्र-श्रीमद्वेङ्कटाचार्यपुत्र-श्रीरङ्गमाम्बागर्भसम्भूत-श्रीकृष्णमाचार्य-विद्वद्वर्यकृपालब्धविद्येन पेरुमाण्ड्लाचार्यकविना विरचिते श्रीवेङ्कटेशचम्पूप्रबन्धे नवमोऽयं स्तबकः ॥

In Public domain. Digitization Muthulakshmi Research Academy

अथ दशमस्तबकः

अगस्त्यनिलयं प्राप्य सुखमास्ते हरिस्स्वयम् ।
पद्मावतीसमायुक्तो भाविकार्यं विचिन्तयन् ॥ 1 ॥

तद्दर्शनार्थं त्वथ तोण्डमानो
नृपस्समागत्य समीपमेत्य ।
नत्वा हरेः पादसरोजयुग्मं
भक्त्योपतस्थे भगवन्तमाद्यम् ॥ 2 ॥

तदा नृपं तं प्रियतोण्डमानं
दृष्ट्वा समालिङ्ग्य हरिस्तु प्रेम्णा ।
राजन् तवेहाऽगमनं किमर्थं
शीघ्रं वदेति प्रमुदा बभाषे ॥ 3 ॥

ततस्स नृपतिस्सविनतिरिदमाह ॥ 4 ॥

त्वद्दर्शनादधिकमद्य किमस्ति देव
कार्यं ममात्र जगदेकशरण्यमूर्ते ।
त्वां चिन्तयामि जगदुद्भवपालनादि-
हेतुं त्वहेतुमसकृत्प्रणतोऽस्मि नित्यम् ॥ 5 ॥

नमश्शान्ताय दान्ताय नमस्तेऽद्भुतकर्मणे ।
अप्राकृतशरीराय श्रीनिवासाय ते नमः ॥ 6 ॥

In Public domain. Digitization Muthulakshmi Research Academy

इति स्तुत्वा मुहुर्नत्वा भक्त्या तं परिसेव्य च ।
विरराम महाराजस्तोण्डमानस्तदन्तिके ।। 7 ।।

तदानीं तद्भक्तिसन्तुष्टो हरिस्तमिदमब्रवीत् ।। 8 ।।

राजन् भवता कृतस्तोत्रेणात्यन्तसन्तृप्तिरद्यैव मे समजायत यथा वियन्नृपस्तवाग्रजस्तथैव मे त्वमाप्तबन्धुश्श्वशुरोऽत्यन्तप्रियभक्तो धर्मात्माचेत्यलम्मन्ये तत इदानीं मद्भणतिश्श्रूयतां सावधानेन ।। 9 ।।

गिरिगह्वरवासिनेऽपि मे
ह्यविचार्य प्रियनन्दिनीं नृपः ।
अददाद्यत एव तत्तथा
भुवि मन्ये बहुभाग्यवानिति ।। 10 ।।

गृहागतं मां परिदृश्य राजा
सन्तोषितार्थो विनिमज्जितोऽभूत् ।
कृत्वा विवाहं बहुवैभवेन
कृतार्थमात्मानमलं स मेने ।। 11 ।।

सोऽप्यद्यराजन् भुवि कीर्तिशेषः
दिवङ्गतोऽभूद्धरदृष्टतो मे ।
येन प्रसिद्धोऽहमतीव लोके
कुटुम्बयुक्तो नृपबन्धुरक्तः ।। 12 ।।

त्वद्भ्रात्रा च वियन्नृपेन महताऽहं सत्कुटुम्बीकृतः
वासार्थं दुहितुस्तवाद्य भवनं कुत्रासि नास्त्यत्र त-
ज्जामाता परमन्दिरे तु वसती त्येषाऽपकीर्तिर्महद्-
दुस्सोढा भवतां ममापि नृपते किं कार्यमत्रोह्यताम् ।।13।।

In Public domain. Digitization Muthulakshmi Research Academy

तस्मान्मे भवनं त्वयाऽशु शुभदं कार्यं सुचित्रमह-
च्छोभाढ्यं सुरशिल्पिकल्पितमलङ्कारान्वितं भूरित-
त्कीर्तिं स्थापयितुं वरां शुभकरामाचन्द्रतारस्थिरां
नाके नागवरालयेऽपि भुवि वा कस्त्वां समर्थो विना ॥14॥

वदत्येवं भगवति वासुदेवे तथास्त्विति तोण्डमानोऽपि अङ्गीकृतवान् ॥15॥

ततश्श्रीपतिश्शुभतिथिवारनक्षत्रयुक्ते सुमुहूर्ते सतोण्डमान-नराधिपस्सन् कमलावकुलाभ्यां सहोरगराजगिरिवरमारुह्य तत्र श्रीस्वामिपुष्करिणीतीरे श्रीमद्वराहस्वाम्यनुमतेन स्वनिलयस्थलं प्रदर्शयन्तदेवं समादिशत् ॥ 16 ॥

अत्रैव कार्यं घनशिल्पयुक्तं
चैत्यं च चित्रं विबुधैरचिन्त्यम् ।
अत्यन्तपूर्वाभिमुखं मनोज्ञं
दिव्यं ध्वजस्तम्भयुतं च भव्यम् ॥ 17 ॥

शृङ्गारगोपुरयुगेन युतं महत्त्रि-
प्राकारभूरिपरिवेष्ठितहेमकुम्भम् ।
तद्द्वारसप्तकवृतं घनदेहलीभि-
स्संराजितं कनकतोरणराजिराजम् ॥ 18 ॥

आस्थानमण्टपं दिव्यमद्भुतं यागमण्टपम् ।
कल्याणमण्टपं चित्रं सोपस्करगृहं तथा ॥ 19 ॥

गोशालां धान्यशालां च पाकशालां महत्तराम् ।
वस्त्रशालां तैलशालां घृतशालां विशालकाम् ॥20॥

In Public domain. Digitization Muthulakshmi Research Academy

भक्ष्यशालां विशालाञ्च भूषणानां गृहं तथा ।
कर्पूरगन्धमार्जारतैलकस्तूरिका गृहान् ॥ 21 ॥
गजाश्वरथशालाश्च धर्मशाला अनेकशः ।
एवमादीनि सर्वाणि कल्पयाशु पृथक्पृथक् ॥ 22 ॥

किञ्च -

पूर्वं त्वया निर्मितमद्यभर्म
ताम्रैश्च पत्रैः परितोऽनुबद्धम् ।
श्रीतीर्थभूतीर्थकमन्नशालाः
पुरेऽत्र संस्थं कुरु शोभयाऽढ्यम् ॥ 23 ॥

एवं भगवदाज्ञापितस्सनृपतिस्तत्क्षणमेवानल्पकर्मप्रवीण-विश्वकर्मणा सम्यग्विचित्रविविधरत्नचित्रितमवर्ण्यकलशवरेण्य-विलसितं चतुर्मूर्तिसमोपेतं वैनतेयविभूषितं महदद्भुतोन्नतमनुपमान-विमानं किञ्च गतागतभक्तजनानामनाये सेनारोहापरोहणाय योजन-विस्तीर्णमार्गं ससोपानञ्च कारयित्वा ततस्स्वयं गत्वा भगवन्तं श्रीपतिं भक्त्या प्रार्थयामास ॥ 24 ॥

देव त्वया नियमितं सकलं सुशीघ्रं
सम्पूर्णतामिह गतं घनशोभयाढ्यम् ।
चैत्यं सुवर्णकलशोच्छ्रितरत्नचित्र-
मागच्छ पूर्णकृपया रमया सहाद्य ॥ 25 ॥

तन्निशम्य भगवन् श्रियःपतिरत्यन्तकुतुकमतिस्तंन्नृपतिम् अभिनन्द्येवमवदत् ॥ 26 ॥

In Public domain. Digitization Muthulakshmi Research Academy

अवश्यमनुगच्छामि तव भक्त्या प्रतोषितः ।
इत्युक्त्वा प्रस्थितो देवो तदा पद्मावतीयुतः ॥27॥

देवैश्चेन्द्रपुरोगमैः ऋषिवरैर्वैखानसैर्ब्राह्मणैः
ऋक्सामागमगायकैर्विधिमुखैर्वेदोक्तमन्त्रैस्स्तुतम् ।
भेरीदुन्दुभितूर्यवाद्यनिकरैसङ्घोषयद्भिर्दिशः
एवं सुन्दरमन्दिरे नरपतिः प्रावेशयच्छ्रीपतिम् ॥28॥

पुष्पाण्यवर्षन्हरिमूर्ध्नि हर्षा-
द्विमानवर्ये ऋभवश्च सर्वे ।
समस्तलोकैर्मुनिभिस्समेता-
स्तम्पूजयन्तो ऋषयः प्रमोदाः ॥ 29 ॥

सुन्दरानन्दनिलये तोण्डमान्नृपनिर्मिते ।
विमानाग्रे श्रीनिवासो रराज भगवान्स्वयम् ॥ 30 ॥
आनन्दनिलयानन्दजनकत्वादिहेतुना ।
तदानन्दविदः प्राज्ञारानन्दनिलयं जगुः ॥ 31 ॥

पद्मालयां पद्मवरासनस्थां
पद्मावतीं वक्षसि चात्मनस्स्थाम् ।
विधाय शम्भारि विवर्जितोऽसौ
विराजते वेङ्कटशैलमूर्ध्नि ॥ 32 ॥

कलौ नराणामिदमेव सर्वं
परं पदं सद्गतिरेव चेति ।
प्रदर्शयन्दक्षिणपाणिनाद्या-
प्येकेन शौरिर्निजपादपद्मम् ॥33॥

In Public domain. Digitization Muthulakshmi Research Academy

स्वपादपद्मं भजतां नराणां
भवाम्बुधिस्यात्कटिदघ्न एव ।
सदेति सन्दर्श्य कटिस्थहस्तो
विराजते वेङ्कटशैलनाथः ॥ 34 ॥

प्रकल्प्य दीपद्वयमाशु धाता
तदा हरिं त्वेकवरं ययाचे ।
यावत्कलिस्तावदिहाभिवृद्धिं
गतः प्रदीपो ज्वलतान्ममेति ॥ 35 ॥
(तच्छ्रुत्वा हरिस्ससन्तोषं)

एतद्विमानपतनं भविता यदा वा
त्वत्क्षिप्तदीपशमनं च यदा तदैव ।
सम्पूर्ण एव ममचात्र कृतावतारः
तूर्णं भविष्यति विधे श्रुणु निश्चितम्मे ॥ 36 ॥
इत्येवं वरं दत्वा भगवानथ विधिमिदमादिदेश ॥ 37 ॥
उत्सवं कुरु वत्स त्वं श्रीवत्साङ्कस्य मेऽनघ ।
ध्वजारोहणमारभ्य रथान्तञ्च स वाहनम् ॥ 38 ॥
पुण्यं परमकल्याणं ब्रह्मघोषपुरस्सरम् ।
त्रिकालमर्चनं चित्रं नैवेद्यं भक्तिपूर्वकम् ॥ 39 ॥
सर्वदेशजनाकीर्णं ब्राह्मणैर्वेदपारगैः ।
कर्तव्यञ्च सुरश्रेष्ठ वश्यतां नयनोत्सवम् ॥ 40 ॥
इति मधुमधनादेशितो विधिरथ सुरपतिभूधवसोदरमाहूय

In Public domain. Digitization Muthulakshmi Research Academy

तदनुशासनाच्छिल्पप्रवीणविश्वकर्मणा तत्क्षणाद्विहगपतिप्रमुखानि शुभप्रदबृहद्रथंसितछत्रचामरव्यजनान्यतिचित्राणि सर्वाणि कारयामास॥41॥

ततस्तोण्डमानोऽपि भगवन्निदेशमनुसृत्य त्वरितगतिकान् दूतान् प्रेषयित्वा सकलदेशस्थदेशपालानपि समाह्वयत् ॥ 42 ॥

यावद्भारतवर्षवासवसुधाधीशास्समस्ताः प्रजाः
ब्रह्मक्षत्रियवैश्यशूद्रनिकरास्त्यक्त्वा तुरष्कान्त्यजान् ।
भक्तास्ते स्वकलत्रपुत्रसहितास्सर्वे समभ्यागताः
श्रीनाथस्य विवाहवैभवमलं संशेवनामोत्सुकाः ॥ 43 ॥

अनन्तशैलोन्नतशृङ्गरङ्गे
भास्वद्रमानाथमुखाब्जबिम्बम् ।
संसेवकानामभितो जनानां
नेत्राणि भानीव विभान्ति तानि ॥ 44 ॥

एवं प्रवृत्ते [1]विवाहस्य विवाहमहोत्सवे वैखानसागमोक्तप्रकारेण सक्रममुपक्रमिते कन्यां गते भानुमति शुक्लद्वितीयायां ध्वजारोहणकर्मकर्तुं तत्पूर्ववासरे सायाह्नकाले त्वनन्तगरुडविष्वक्सेनप्रमुखसूरिवर्गैर्नारदादिसुरर्षिभिर्वसिष्टव्यासादिब्रह्मर्षिभिरिन्द्राद्यमरबृन्दैस्सनकसनन्दनसनत्कुमारादियोगिवर्यैर्वैखानसमुनिबृन्दैः राजर्षिभिर्भक्तबृन्दैश्च सर्वैस्सहनिर्गत्य नगराद्बहिस्तत्र ब्रह्मा सनृपस्स्वयं ब्रह्मघोषमङ्गलवाद्यघोषैः प्रतिघोषितदिङ्नभोरान्तराशैर्वैखानसयाज्ञिकैर्विधिवत्तनितां मन्त्रपूतां वल्मीकमृत्स्नामादाय वीथीषु

---

१) विवाहस्य विं गरुडं वहतीति विवाहः, तस्य गरुडवाहनस्येत्यर्थः ।

In Public domain. Digitization Muthulakshmi Research Academy

प्रदक्षिणक्रमेणोत्तमतौर्यत्रिकेण चातुर्जातपुरस्सरं सुन्दरोरगवरधराधरेश्वरमन्दिरमुपवेश्य पुण्याहवाचनपूर्वकं विधिवदङ्कुरारोपणकर्म प्रारम्भयामास ।। 45 ।।

तत्सेवकानां सुरमानवानां
गात्रेषु हर्षात्पुलकाङ्कुराणि ।
पात्रेषु वैखानसमन्त्रपूगैः
कृताङ्कुरारोपणतः प्रतेनुः ।। 46 ।।

ततः परेद्युरुषसि वैखानसयाज्ञिकास्सक्रमुपक्रमितगारुडाह्वानकृत्याः नूतनश्वेतपटगतं चटुलतरगतिं पतगपतिमावाह्यासह्यभूरिविषधरधरं धराधरकम्पनजङ्घालपक्षवातूलमालोकनमात्रत्रासाद्विद्रावितकद्रूतनयचयमत्युत्तमतौर्यत्रिकेणार्यवर्यसेवितं चातुर्जातपुरस्सरं सुन्दरहरिमन्दिरमुपवेश्य तत्सन्निधौ सवीननवीनपटेन तेन द्विजराजविराजितं ध्वजराजमाराजयाञ्चक्रुः ।। 47 ।।

सन्तानकामावनितास्त्वरं तु
मुद्गोदनं गारुडं मुद्ग्रहीतुम् ।
श्रुत्वेति वाक्यं मृदुयाज्ञिकानां
वन्ध्या युवत्यस्त्वरिताः प्रयान्ति ।। 48 ।।

तदनन्तरकार्यकलापानि सर्वाणि परिसमाप्य तद्भगवदर्चकपरिचारकादयस्सर्वेऽपि तत्तीर्थप्रसादानि स्वीकृत्य तं भक्त्या प्रणम्य तदनुज्ञातार्यथागतं जग्मुः ।। 49 ।।

In Public domain. Digitization Muthulakshmi Research Academy

ततः परेऽस्मिन्दिवसे मुहूर्ते
शुभे च कल्याणमहोत्सवं तम् ।
जगत्पतेस्तस्य जगज्जनन्या-
श्चक्रुर्बुधास्सज्जनतासमेताः ॥ 50 ॥

भेरीमृदङ्गपणवानकगोमुखाग्र्य-
तूर्याद्यनेकघनमङ्गलवाद्यघोषम् ।
श्रुत्वाऽद्रितस्तु हरितो हरिसेवनाय
यास्याम इत्यतिमुदा प्रतिघोषयन्ति ॥ 51 ॥

वीणाप्रणादस्वररञ्जितात्म-
सङ्गीतरागैर्विविधैर्मनोज्ञैः ।
देवर्षयस्तुम्बुरनारदाद्याः
भूयात्सदा मङ्गलमित्यगायन् ॥ 52 ॥

रम्भापुरस्सरवराप्सरसाङ्गनास्ताः
लोलत्पयोधरनितम्बतलास्सलीलाः ।
नाट्यं प्रचक्रुरमितं विविधं तदग्रे
पश्यन् जनान्मदनमोहवशान्नयन्त्यः ॥ 53 ॥

हाहाहूहूपूर्वगन्धर्वपूगा-
स्सम्यङ्माधुर्यात्मकण्ठस्वरास्ते ।
रागालापैस्सर्पसम्मोहकैस्ते-
स्सर्वे गाथा अप्यगायन्तदीयाः ॥ 54 ॥

In Public domain. Digitization Muthulakshmi Research Academy

पठन्ति वेदानृषिमौनिसत्तमा
स्तुवन्ति शौरिं विविधश्च वन्दिनः ।
नमन्ति भक्त्याऽखिलनिर्जरा नरा
भजन्ति तद्दिव्यकथाश्च गायका ।। 55 ।।

एवं महद्वैभवोपेतं श्रीमद्भगवतश्श्रीनिवासस्य कल्याण-महोत्सवसाकल्यमनुभूय तत्रागताश्रितजनास्सर्वे तन्निवेदितविविध-भोज्यनिखिलपदार्थानि तीर्थप्रसादादीनि स्वीकृत्य कृतकृत्याः घ्नताहंसस्सन्नभूवन् ।। 56 ।।

ततोऽष्टमीदिने श्रेष्ठे श्रीनिवासजगत्पतेः ।
रथोत्सवोऽभवद्दिव्यः पश्यतां नयनोत्सवः ।। 57 ।।

रथस्थदेवं परिपश्यतोऽस्य
जनस्य भक्त्या न पुनर्भवोऽस्ति ।
एवं वचो वृद्धजनेरितं त-
च्छ्रुत्वाऽऽगतास्तत्र जनास्समस्ताः ।। 58 ।।

प्रकृष्ठहर्षात्पुलकाङ्किताङ्गाः
बुधास्समस्तास्सुमनांस्य वर्ष-
न्नानन्दबाष्पाकुललोचनास्ते
रथस्थदेवोपरि तस्य मूर्ध्नि ।। 59 ।।

ततः परेऽस्मिन्दिवसे नवम्यां सुन्दरमङ्गलगिरियानाधिरूढस्य श्रीमद्भगवतश्श्रीनिवासस्य चैत्यप्रदक्षिणपूर्वकं श्रीस्वामितीर्थे ब्रह्म-

In Public domain. Digitization Muthulakshmi Research Academy

घोषयद्भिर्ब्राह्मणैर्महाजनैस्सह दीक्षान्तावभृतस्नानं किञ्च हरिद्राचूर्णादिकैर्मङ्गलचूर्णैरभिषेचनं चानन्तरं पुष्पयागश्च ततः परदिने तस्य श्रवणनक्षत्रे त्ववतारदिनोत्सवः पश्चाद्देशान्तरागतानां यथायोग्यं सत्कारोऽपि विधीयते ।। 60 ।।

एवंविधं स्वयम्भूस्सतोण्डमानभूधवस्सन् ध्वजारोहणदिवसादिपुष्पयागान्तं प्रतिदिनं द्वित्रिवारमान्दोलिकाशेषहंससिंहबकोत्तिकमण्टपकल्पवृक्षभूपालराजनौयानगरुडहनुमन्मङ्गलगिर्यैरावतगजसूर्यचन्द्रमहद्रथोच्चैश्रवहयमानैस्सह श्रीमद्भगवतश्श्रीनिवासस्य ध्वजारोहणाख्यं महोत्सवं महद्वैभवोपेतं कृत्वा कृतकृत्योऽभूत् ।। 61 ।।

ब्रह्मोत्सवं तं जगदीश्वरस्य
संसेव्य सम्यक्सफलात्मवन्तः ।
सर्वे सदाराद्विजनिर्जरा नराः
यथागतं जग्मुरतिप्रमोदाः ।। 62 ।।

समाप्य सर्वं महदुत्सवं तं
स तोण्डमानेन नृपेण युक्तः ।
हरेरनुज्ञां शिरसा गृहीत्वा
मुदा जगामाथ विधिस्स्वधाम ।। 63 ।।

स तोण्डमानोप्यथ वेङ्कटेशितु-
र्हरेरनुज्ञां प्रतिपद्य सत्वरम् ।
पुरं गतस्तत्र तदर्चनापरः
सुखेन राज्यं परिपालयन्स्थितः ।। 64 ।।

In Public domain. Digitization Muthulakshmi Research Academy

एवं श्रियःपतिरशेषजगज्जनानां
सम्पादयन्सततमीप्सितलाभमोदम् ।
क्रीडत्यनन्तविभवैश्च जगज्जनन्या
साकं हरिः कलिमलाहृति वेङ्कटाद्रौ ॥ 65 ॥

साक्षाच्छ्रीरमणस्स एव भगवान्तत्तिर्मलान्निर्मल-
ग्रामं प्राप्य सुदर्शनाभिधमहाभक्तां तदङ्गे विशन् ।
तत्रत्यैरखिलैश्च भक्तनिवहैर्भक्त्या सदा संस्तुत-
श्श्रीमद्देवरकोटमन्दिरवरे संराजतेऽद्य प्रभुः ॥ 66 ॥

तत्रत्य वैभवमलं हरिरत्र तिष्ठ-
न्सम्यक्प्रदर्शयति सर्वजनेप्सितानि ।
दत्वा मुदा वरमया कृपया च साक्षा-
न्नित्यं श्रिया सह सुनिर्मलवेङ्कटेशः ॥ 67 ॥

तदर्चकं मां प्रतिपद्य नित्यं
स्वप्ने यदाज्ञामकरोत्स्वयं सः ।
तदा तदाज्ञां शिरसा गृहीत्वा
कृतिर्मयैषा कृपया कृताऽस्य ॥ 68 ॥

एषा भविष्योत्तरसत्पुराण
कथामनुसृत्य कृता मयाऽद्य ।
श्रीवेङ्कटेशाभिधदिव्यचम्पू-
स्समर्पिताऽसीद्धरिपादपद्मे ॥ 69 ॥

इतीरितं तज्जगदीश्वरस्य
विचित्रलीलाद्भुतकर्मणोऽस्य ।

In Public domain. Digitization Muthulakshmi Research Academy

चित्रं चरित्रं श्रुणुत प्रकृष्टं
जना विरुद्धन्त्विह मा चरध्वम् ।। 70 ।।

श्रीमन्महीन्द्रगिरिनायक मङ्गलं ते
श्रीरञ्जनाश्रितजनावन मङ्गलं ते ।
श्रीपद्मजालसितहृत्स्थल मङ्गलं ते
श्रीनिर्मलाख्यपुरपालक मङ्गलं ते ।। 71 ।।

।। इति श्रीशिरशिनहलान्वयसञ्जात-कौण्डिन्यगोत्र-
श्रीमद्वेङ्कटाचार्यपुत्र-श्रीरङ्गमाम्बागर्भसम्भूत-
श्रीकृष्णमाचार्यविद्वद्वर्यकृपालब्धविद्येन
पेरुमाण्डूलाचार्यकविना विरचिते
श्रीवेङ्कटेशचम्पूप्रबन्धे दशमोऽयं स्तबकः ।।

।। सम्पूर्णः विजयतेतराम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

SANSKRIT ACADEMY
Adarsha Shodha Sanstha
(Recognised by Central Sanskrit University)
Osmania University, Hyderabad - 500 007

ISBN - 978-93-80171-61-6